सामाजिक-विज्ञानम्

सामाजिक-विज्ञानम्



अस्माकम् अतीतः – III

भागः 2

अष्टमकक्षायै इतिहासस्य पाठ्यपुस्तकम्

सामाजिकविज्ञानम्

अस्माकम् अतीतः- III

भागः २

अष्टकक्षायै इतिहासस्य पाठ्यपुस्तकम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

दिसम्बरमासः 2014 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखः

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती । नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति । एतस्मिन् प्रयासे प्रत्येकं विषयम् एकया दृढतरया भित्त्या आवरणस्य अथ च सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति । आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति ।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकान् कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले च स्वस्य अनुभवैः चिन्तनस्य च अवसारान् कल्पयन्ति । अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभ्यां युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति । शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति । सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारितस्य मात्रायाः ग्राहकाः सन्ति इति मन्तव्यं त्यजन्तु ।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति । दैनन्दिन्यां समय-सारण्यां स्थितिस्थापकत्वं(लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतदिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् । शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारीकरिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति । भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः । एषः प्रयासः इतोऽपि गभीरतया स्यात् एतस्मिन् प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते आश्चर्यस्य लघुषु समूहेषु वार्तालापस्य कृते तथा च चर्चायाः कृते हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति । परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः नीलाद्रिभटाचार्यस्य विशेषरूपेण कृतज्ञा अस्ति । एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम् । एतं योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि कृतज्ञाः स्मः । वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः ।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा

नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वीकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः। व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नाविन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति। यतः भाविसंसोधनेषु स्वीकर्तुं शक्यं स्यात्।

निदेशकः
राष्ट्रिय-शैक्षिकानुसन्धानम्

प्रशिक्षण-परिषद् च

पाठ्यपुस्तक-निर्मातृ-समितिः

अध्यक्षः, सामाजिक-विज्ञान-पाठ्य-पुस्तक-परामर्श-समितिः

हरिवासुदेवनः, प्रोफेसरः, इतिहासविभागः, कलकत्तविश्वविद्यालयः,कोलकात्ता

मुख्यपरामर्शदः

नीलाद्रिभट्टचार्यः, प्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली

सदस्याः

अर्चनाप्रसादः, एसोसिएट-प्रोफेसरः, जवाहरलालनेहरू-अध्यनकेन्द्रम्,जामिया-मिल्लिया-इस्लामिया, नवदेहली।

अञ्जलिखुल्लरः, पीजीटी(इतिहासः) केम्ब्रिजविद्यालयः,नवदेहली।

अनिलसेठी, प्रोफेसरः, सामाजिकविज्ञान-शिक्षाविभागः, एनसीईआरटी, नवदेहली।

जानकीनायरः,प्रोफेसरः, सामाजिकविज्ञानाध्ययनकेन्द्रम्, कोलकात्ता।

तनिकासरकारः,प्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली।

ताप्तीगुहा-ठाकुरता,प्रोफेसरः, सामाजिकविज्ञानाध्ययनकेन्द्रम्, कोलकात्ता

प्रभुमाहापात्राः, एसोसिएटप्रोफेसरः, देहलीविश्वविद्यालयः, देहली।

रामचन्द्रगुहाः, स्वतन्त्रलेखकः, मानवशास्त्री इतिहासकारश्च, बेङ्गलुरुः।

रश्मिपालीवालः,एकलव्यः,होशंगाबादम्, मध्यप्रदेश॥

सञ्जयशर्मा, एसोसिएटप्रोफेसरः, जाकिरहुसैनमहाविद्यालयः, देहलीविश्वविद्यालयः, नवदेहली।

सतविन्दरकौरः, पीजीटी(इतिहासः), केन्द्रीयविद्यालयः सङ्ख्या -१,जालन्धरम्, पंचनदम्।

स्मितासहायभट्टाचार्या,पीजीटी(इतिहासम्), ब्ल्यूबेल्सविद्यालयः, नवदेहली।

एम.सिराजः अनवरः, प्रोफेसरः,पीपीएमईडी, एनसीईआरटी, नवदेहली।

एम.सिराजः अनवरः,प्रोफेसरः, पीपीएमईडी, एनसीईआरटी,नवदेहली।

हिन्द्यनुवादः

योगेन्द्रदत्तः,सराय-सी.एस.डी.एस.,देहली

रीतुसिंहः, सहायकप्रोफेसरः(इतिहासः), सामाजिक-विज्ञान-शिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदेहली।

सिराजः अनवरः, प्रोफेसरः,पीपीएमईडी, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदेहली।

सदस्य-समन्वयिका

रीतुसिंहः, सहायकाचार्या(इतिहासः), सामाजिकविज्ञान-विभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदेहली।

आभारः

इदं पुस्तकं बहूनाम् इतिहासकाराणां शिक्षाविदां शिक्षकाणां च सामूहिकप्रसायानां फलरूपम् अस्ति। अत्र प्रदत्तानाम् अध्ययानां लेखने संशोधने च अनेके मासाः अतीताः। एते अध्यायाः कार्यशालासु जातचर्चानाम् ई-मेलद्वारा संप्रेषितविचाराणां च आदानेन प्रदानेन च उद्भूताः सन्ति। एतस्यै प्रक्रियायै प्रत्येकं सदस्यः प्रकारान्तरेण स्वक्षमतायाः अनुरूपं योगदानं दत्तवान्।

अनेके जनाः संस्थानानि च एतत् पुस्तकं सज्जीकर्तुं साहाय्यम् अकुर्वन्। प्रोफेसरः मुजफ्फरः आलमः डा.कुमकुमरायः च एतस्य लेखान् अपठतां परिवर्तनाय च मुख्यभूतपरामर्शान् अयच्छन्। पुस्तके प्रदत्तचित्रेभ्यः वयम् अनेकासां संस्थानां संङ्ग्रहाणां प्रयोगं कृतवन्तः। देहलीनगरस्य १८५७ तमवर्षस्य घटनानाम् अनेकानि चित्राणि अल्काजी-फाउण्डेशन-फार-दि आटर्स-पक्षतः स्वीकृतानि सन्ति। ब्रिटिशराजस्य विषये लिखितानि एकोनविंशतिशताब्द्याः बहूनि सचित्राणि पुस्तकानि इण्डिया-इण्टरनेशनल-सेण्टर इत्यस्य बहुमूल्यस्य इण्डिया-कलेक्शन इत्यस्य च भागभूतानि आसन्। वयं सुनीलजानासाहबं प्रति कृतज्ञाः स्मः यः नवतिवर्षीयः सन् अपि स्वचित्राणि अन्वेष्टुं साहाय्यम् अकरोत् तानि च प्रकाशयितुम् अनुमतिम् अपि अददात्। चत्वारिंशततमस्य दशकस्य आरम्भादेव सः आदिवासिक्षेत्राणां निरीक्षणं करोति स्म अपि च सः असङ्ख्यसमुदायानां दैनन्दिनजीवनं स्वछायाचित्रयन्त्रे उटङ्कितवान्। एतेषु कानिचन चित्राणि अधुना प्रकाशितानि सन्ति – (द ट्राइबल्स आफ इण्डिया, आक्सफोर्ड यूनिवर्सिटी प्रेस, २००३) अपि च बहूनि चित्राणि इन्दिरा-गान्धिराष्ट्रियकलाकेन्द्रे सुरक्षितानि सन्ति।

परिषद् पाठ्यपुस्तकस्य निर्माय उल्लेखनीयसहयोगार्थम् अनिलशर्मणे, इन्द्रकुमाराय, (डी.पी.पी. आपरेटर),सतीशझावर्याय, (कापी-एडिटरः), दिनेशकुमाराय(कम्प्यूटर स्टेशन इंजार्ज) हार्दिकम् आभारं व्यक्तीकरोति। एतस्मिन् एव सन्दर्भे प्रकाशनविभागः, राष्ट्रियानुसन्धनप्रशिक्षणपरिषदः सहयोगः अपि प्रशंसनीयः अस्ति।

अत्र अस्माभिः सर्वेषाम् कृतज्ञताज्ञापनस्य प्रयासः कृतः अस्ति परन्तु पुनरपि यदि कस्यचित् जनस्य संस्थायाः वा नाम भ्रष्टं स्यात् तर्हि विस्मरणाय क्षमाप्रार्थिनः वयं स्मः।

विषय सूची

आमुखम्		iii
7.	तन्तुवायाः, लौहकाराः, यन्त्रागार-स्वामिनः च	79
8.	स्वदेशि-जनतायाः सभ्यीकरणम्, राष्ट्रस्य शिक्षीकरणम्	95
9.	महिलाः जातिः संशोधनं च	108
10.	दृश्यकलानां परिवर्तमान-संसारः	123
11.	राष्ट्रियान्दोलनस्य सङ्घटनम्, 1870 तमदशकात् आरभ्य 1947 तमदशकं यावत्	141
12.	स्वतन्त्रतायाः अनन्तरम्	160

अनुवादकः - रूपलालशर्मा

प्रथमस्य भागस्य विषय-सूची

आमुखम् iii

1. कथं कदा कुत्र च ? 1

2. वाणिज्यतः साम्राज्यं यावत् । 9
(संस्थायाः सत्तास्थापनम्)

3. ग्रामीण-क्षेत्रस्य शासनम् । 26

4. आदिवासिनां, दीकोः, कस्यचित् सुवर्णयुगस्य च कल्पना । 39

5. यदा जनता विद्रोहं करोति । 51
(सप्तपञ्चाशदधिकाष्टा-दश-शत-तम-वर्षं (1857) तदनन्तरकालश्च)

6. उपनिवेशवादः नगरं च 64
(कस्याश्चित राजकीयराजधान्याः कथा)

अनुवादकः - रूपलालशर्मा

7 तन्तुवायाः, लोहकाराः, यन्त्रागार-स्वामिनः च

चित्रम् – 1 *– सप्तदशशताब्द्यां सूरतस्थे पोतस्थानके वाणिज्यिक-जलयानानि ।*

भारतस्य पश्चिमतटे गुजरातस्थितं सूरतम् इति पोतस्थानकं हिन्दमहासागरस्य मार्गेण जायमानवाणिज्यस्य सर्वाधिक-महत्त्वपूर्ण-पोतस्थानकेषु किञ्चित् आसीत् । डच ब्रिटिश इत्येतयोः वाणिज्यिक-जलपोतानि सप्तदशशताब्द्याः आरम्भात् एव एतस्य पोतस्थानकस्य प्रयोगम् आरब्धवन्ति । अष्टादशशताब्द्याम् एतस्य पोतस्थानकस्य महत्त्वं न्यूनं जायमानम् आसीत् ।

अस्मिन् अध्याये वयं वस्त्रोद्योगस्य इस्पातोद्योगस्य च विशेषाध्ययनं कुर्वन्तः द्रक्ष्यामः यत् ब्रिटिशशासनस्य अन्तर्गतं भारतीयशिल्पस्य उद्योगानां च स्थितिः का आसीत् ? आधुनिकविश्वे औद्योगिकक्रान्तेः दृष्ट्या उपर्युक्तौ द्वौ अपि उद्योगौ महत्त्वपूर्णौ आस्ताम् । कार्पासवस्त्राणां यान्त्रिकोत्पादनेन एव नवदशशताब्द्यां ब्रिटेनदेशः विश्वस्य प्रमुखतमम् औद्योगिकराष्ट्रं कृतम् आसीत् । 1850 तमदशकात् यदा ब्रिटेनदेशस्य लोहोद्योगः इस्पातोद्योगः चापि विकासम् आरभत तदा ब्रिटेनदेशः 'विश्वस्य प्रमुखः उद्योगागारः' इति ख्यातिं प्राप्तवान् ।

ब्रिटेनस्य औद्योगिकीकरणस्य भारते च ब्रिटिशविजयस्य उपनिवेशीकरणस्य च मध्ये गहनसम्बन्धः आसीत् । भवन्तः द्वितीये अध्याये दृष्टवन्तः यत् ईस्ट-इण्डिया-कम्पनी इत्येतस्य व्यापारिकहितानां रक्षार्थं कथं भारतीयभूभागानाम् अधिग्रहणं जातं तथा च कथं वाणिज्यस्य संरचना अपि निरन्तरं परिवर्तिता । अष्टादशशताब्द्याः अन्तिमे कालखण्डे ईस्ट इण्डिया कम्पनी इति भारतात् वस्तूनि क्रीणाति स्म तथा च तानि वस्तूनि इङ्ग्लैण्डं यूरोपं च नीत्वा विक्रीणीते स्म । अनेन एव क्रयेण विक्रयेण च कम्पनी इति महान्तं लाभं प्राप्नोति स्म । यथा यथा ब्रिटेनस्य औद्योगिकोत्पादनं वर्धितुम् आरभत, तत्रत्याः उद्योगपतयः भारतं तेषाम् औद्योगिकोत्पादानां विशालविपणेः रूपेण द्रष्टुम् आरब्धवन्तः । अनेन प्रकारेण, ब्रिटेनतः सिद्धवस्तूनि भारतस्य विपणीः प्रति आगन्तुम् आरब्धानि । अनेन भारतीयशिल्पेषु उद्योगेषु च कीदृशाः प्रभावाः जाताः ? प्रस्तुताध्याये वयम् एतस्मिन् एव प्रश्ने चर्चां करिष्यामः ।

चित्रम् 2 – पटोला इत्यस्य वयनम्, नवदशशताब्द्याः मध्ये ।

पटोला-वयनम्, सूरते अहमदाबादे पाटने च भवति स्म। इण्डोनेशियायाम् एतादृशस्य वयनस्य व्यापकविपणिः आसीत् तथा च तत्र इदं स्थानीयवयनं परम्परायाः भागरूपेण जातम् आसीत्।

आयान्तु, आदौ वस्त्रोत्पादनस्य विषये दृष्टिपातं कुर्याम।

बङ्गाले आङ्ग्लीयानां विजयात् प्राक् प्रायः 1750 तमे वर्षे भारतदेशः सम्पूर्णजगति वस्त्रोत्पादनस्य क्षेत्रे अन्येभ्यः देशेभ्यः अथवा वस्त्रोत्पादकेभ्यः अतीव अग्रे आसीत्। भारतीयवस्त्राणि चिरकालात् गुणवत्ताकारणात् सूक्ष्मशिल्पस्य च कृते सम्पूर्णे विश्वे प्रसिद्धानि आसन्। दक्षिण-पूर्व-एशिया (जावा, सुमात्रा,पेनांग) इत्यस्मिन् तथा च पश्चिमे मध्यैशियायां च एतेषां वस्त्राणां पर्याप्तवाणिज्यम् आसीत्। षोडशशताब्दीतः यूरोपस्य व्यापारिक-समवायाः यूरोपे विक्रेतुं भारतीयवस्त्राणि क्रीणन्तः आसन्। अस्य सफलवाणिज्यस्य भारतीयतन्तुवायानां च कौशलस्मारकाः नैके शब्दाः आङ्ग्लभाषायाः अन्यभाषाणां च विविधशब्दैः अद्यापि सजीवाः सन्ति। एतादृशानां शब्दानां मूलान्वेषणं तथा च तेषाम् अर्थाभिगमनम् अतिरोचकम् अस्ति।

शब्देषु इतिहासः निहितः अस्ति –

यूरोपस्य व्यापारिणः भारतात् आगतं सूक्ष्मकार्पासवस्त्रं सर्वादौ वर्तमानस्य ईराकस्य मोसूल इति नगरे अरबस्य व्यापारिणां पार्श्वे दृष्टवन्तः आसन्। अनेन आधारेण एव ते सूक्ष्म-वयन-युक्तानि सर्वाणि वस्त्राणि 'मस्लिन, (मलमल) इति कथयितुम् आरब्धवन्तः। शीघ्रमेव अयं शब्दः अतीव प्रचलितः जातः। उपस्कराणाम् अन्वेषणे यदा प्रथमवारं पुर्तगालिनः भारतं प्रति आगतवन्तः तदा ते दक्षिण-पश्चिम-भारते केरलस्य तटे कालीकटे उषितवन्तः। इतः ते उपस्करैः सह कार्पासवस्त्रम् अपि सहैव नीतवन्तः। कालीकटतः निर्गतं शब्दं कैलिको इति रूपेण व्यवहर्तुम् आरब्धवन्तः। अनन्तरकाले सर्वविधम् अपि कार्पासवस्त्रं कैलिको इत्यनेन पदेन कथयितुम् आरब्धम्।

एतादृशाः नैके शब्दाः सन्ति ये पश्चिमविपणिषु भारतीयवस्त्राणां लोकप्रियतायाः कथां कथयन्ति। तृतीये चित्रे भवन्तः कस्यचित् वस्त्वादेशस्य पृष्ठं द्रष्टुं शक्नुवन्ति यत् 1730 तमे वर्षे ब्रिटिश ईस्ट इण्डिया कम्पनी इत्यनेन कलकत्तास्थितानां निजप्रतिनिधीनां समीपं प्रेषितम् आसीत्।

तत्रत्यस्य विवरणस्य अनुसारं, तस्मिन् वर्षे वस्त्रस्य 5,89,000 इति चयानाम् आदेशः प्राप्तः आसीत्। यदि भवन्तः एतस्य एव लेखापञ्चिकायाः पृष्ठानां पर्यालोचनं कुर्युः तर्हि भवन्तः अवगच्छेयुः यत् तत्र कार्पासवस्त्रस्य कौशेयवस्त्रस्य च 98 प्रकाराणां वर्णनं कृतम् अस्ति। यूरोपव्यापारिणः तादृशं वस्त्रं पीस गुड्स इति कथयन्ति स्म यत् सामान्यतः 20 गजपरिमितं दीर्घं 1 गजपरिमितं प्रथितं पटादिगुच्छं भवति स्म ।



List of Goods to be Provided in the Bay of Bengall for the Ships going out in the Year 1730.

		Peices	£	Tons
Addatias	of low Prices, Six thousand Peices	6000	2200	8 4/7
Ditto	Fine, with Gold Heads, Three thousand	3000	1500	4 2/7
Allaballies	low Prices, Five hundred	500	650	1 1/4
Baftaes	of low Prices, Eighteen Yards long, Six thousand	6000	1875	13 1/2
Ditto	very fine with Gold heads, Fifteen hundred	1500	625	2 3/4
Ditto Sugdea	of Twelve Yards long such as received by the Heathcote, Ten thousand	10000	3625	18 3/4
Bandanoes	or Taffa de Foolas, as by the Eyles, Six thousand	6000	3072	7 1/2
Carridarries	very good, such as the Fine Bale by the Heathcote (or else none) One thousand	1000	483	1 3/4
Carridarries	Sannoes, One thousand	1000	470	1 3/4
Chillaes	of the same goodness as the finest that came by the Heathcote, Three thousand	3000	750	5
Chowtars	of the low Price Sort, as by the Heathcote, Four thousand	4000	1060	6 3/4
Coopees	Two thousand	2000	880	3 1/2
Chints Patna	as directed last Year, Thirty thousand, and that Twenty thousand of them be plaid and the following Chints in proportion	30000	12000	73 3/4
Ditto Cossimbuzar	Ten thousand	10000	812	1 1/4
Ditto Calcutta	as Ordered last Year, Six thousand	6000	1254	6
Cuttannees	Allaja Plain, well Cover'd and good variety of Stripes and Colours, One thousand	1000	700	1 1/8
Ditto	Striped and Flower'd also well Cover'd, Five hundred	500	500	7/8
Cossaes	Fine, Yard and half broad, with Gold heads, at least as good as those by the Heathcote, Four thousand	4000	7000	10
Ditto	of an inferiour Sort, better than the Heathcote, Six thousand	6000	6000	15
Ditto	Fine, Yard and three eighths broad with Gold heads, better than the Heathcote, Two thousand	2000	4000	5
Ditto	of an inferiour Sort, Two thousand	2000	1750	5
Ditto Orua	Yard and eighth to Yard and three Sixteenths broad, Fifteen thousand	15000	12750	37 1/2
Ditto	Yard broad, of the lowest Prices, Eight thousand	8000	4440	20
Ditto Charpoores	Yard broad as by the Heathcote, Two thous.	2000	4000	5
Ditto	of the same Fabrick of a lower Sort, Two thousand	2000	2500	5

Cossaes Sorry

चित्रम् 3 – ईस्ट-इण्डिया-कम्पनी इत्यस्य आदेश-आयव्ययपञ्जेः किञ्चित् पृष्ठम्, 1730

सावधानं पश्यन्तु यत् आयव्ययपञ्जिमध्ये कथं प्रत्येकं वस्तुनः मूल्यं लन्दने एव निश्चयीक्रियते स्म। एतानि वस्तूनि प्रापयितुं समवायेन वर्षद्वयात् प्राक् एव आदेशः दातव्यः भवति स्म यतो हि वस्त्वादेशं भारतं प्रेषयितुम् आवश्यकवस्तूनि च निर्मापयितुं पुनः प्रतिप्रेषयितुं च एतावान् कालः तु अपेक्ष्यते स्म एव। यदा वस्त्रगुच्छाः लन्दनं प्रति प्राप्नुवन्ति स्म तदा ते लीलामयक्रयेण विक्रीयन्ते स्म।

आयान्तु, अधुना एतस्याम् एव आयव्ययपञ्चिकायां प्रदत्तानां विभिन्नवस्त्रप्रकाराणां नामानि पश्याम। राशिरूपेण येषां वस्त्राणाम् आदेशः प्रदत्तः आसीत् तत्र मुद्राङ्कितानि कार्पासवस्त्राणि अपि सम्मिलितानि आसन्। एतादृशानि वस्त्राणि एते व्यापारिणः शिंट्ज, कोसा (अथवा खस्सा) तथा च बण्डाना इत्यपि कथयन्ति स्म। किं भवन्तः जानन्ति यत् आङ्ग्लभाषायाः शिंट्ज इति शब्दः कुतः निर्गतः ? आम्, अयं हिन्द्याः छींट इति शब्दात् निष्पन्नः अस्ति। भारते छींट इति सवर्ण-पुष्प-पत्र-युक्तस्य लघुमुद्राङ्कितवस्त्रम् उच्यते। 1680 तमदशकं यावत् इङ्ग्लैण्डे यूरोपे च मुद्राङ्कितस्य भारतीयकार्पासवस्त्रस्य अतियाचना जाता आसीत्। आकर्षक-पुष्प-पत्र-कारणात् सूक्ष्मसूत्रत्वात् अल्पमूल्यत्वात् च भारतीयवस्त्रस्य पृथक् एव स्थानम् आसीत्। इङ्ग्लैण्डस्य धनाढ्याः एव नैव अपि तु स्वयं महाराज्ञी अपि भारतीयवस्त्रनिर्मितानि परिधानानि धरति स्म।

बण्डाना इति शब्दस्य प्रयोगः गले शिरसि च ध्रियमाणाय चित्रितस्य गहनवर्णस्य च मुद्राङ्कितस्य गलबन्धस्य कृते क्रियते। अयं शब्दः हिन्द्याः बाँधना इति शब्दात्

चित्रम् 4 – जामदानी इति वयनम्, विंशतिशताब्द्याः आरम्भे।

जामदानी इति एकविधं सूक्ष्ममलमल इति भवति यस्मिन् हस्तवयनयन्त्रे सज्जाचिह्नानि सीव्यन्ते। एतेषां वर्णः प्रायः सलेटी श्वेतः च भवति। सामान्यतः कार्पासस्य सुवर्णस्य च सूत्राणां प्रयोगः क्रियते स्म यत् च अस्मिन् चित्रे दृश्यते। बङ्गाले स्थितः ढाका, संयुक्तप्रान्ते च स्थितं लक्ष्मणपुरं जामदानी इत्येतादृशस्य वयनस्य अतिमहत्त्वपूर्णकेन्द्रे आस्ताम्।

चित्रम् 5 – मसूलीपट्टनम्, आन्ध्रप्रदेशे सूक्ष्मवस्त्रे मुद्राङ्कनम् (छींट),नवदशशताब्द्याः मध्यकाले।

ईरानाय यूरोपाय च क्रियमाणाय निर्याताय छींट इत्यस्य उत्कृष्टोदाहरणम् अस्ति।

निर्गतः अस्ति । एतस्यां श्रेण्यां शोभमानवर्णयुक्तानि बहुप्रकारकाणि वस्त्राणि विद्यन्ते स्म यानि बन्धनयुक्तैः रागस्य च विधिभिः एव निर्मीयन्ते स्म।

आयव्ययविवरणपञ्चिकायां नैकान्यविधानां वस्त्राणाम् अपि वर्णनम् अस्ति येषां नाम तेषां जन्मस्थानकस्य अनुसारं लिखितम् अस्ति – कासिमबाजार, पटना, कलकत्ता, उडीसा, चारपूरम् इत्यादि। एतेषां शब्दानां व्यापकप्रयोगेण अवगम्यते यत् विश्वस्य विभिन्नभागेषु भारतीयवस्त्राणि कियन्ति प्रसिद्धानि जातानि आसन्।



चित्रम् 6 – बण्डाना इति प्रारूपम् (डिजाइन), विंशतिशताब्द्याः प्रारम्भे।

वस्त्रमध्यात् गच्छन्तीं रेखां पश्यन्तु । भवन्तः जानन्ति इदं किमर्थम् अस्ति ? वस्तुतः, एतस्मिन् उत्तरीये बद्ध्वा रञ्जितयोः कौशेयवस्त्रयोः द्वे खण्डे सुवर्णस्य सूचीशिल्पस्य माध्यमेन परस्परं सीविते स्तः । बण्डाना इति शैल्या निर्मितानि वस्त्राणि आधिक्येन राजस्थाने गुर्जरप्रान्ते च निर्मीयन्ते स्म।

यूरोप-विपणीषु भारतीयवस्त्रम्

अष्टादशशताब्द्याः प्रारम्भपर्यन्तं भारतीयवस्त्राणां लोकप्रियतया व्यग्राः इङ्ग्लैण्डस्य ऊर्णायाः कौशेयस्य च निर्मातारः भारतीयवस्त्राणाम् आयातस्य विरोधं कर्तुम् आरब्धवन्तः आसन्। एतस्य एव प्रभावस्य कारणात् 1720 तमे वर्षे ब्रिटिशसर्वकारः इङ्ग्लैण्डे मुद्राङ्कितकार्पासवस्त्राणि – छींट इत्यस्य प्रयोगे अपि प्रतिबन्धस्थापनार्थं कञ्चित् अधिनियमः पारितः। संयोगवशात्, असौ अधिनियमः अपि कैलिको इति अधिनियमः एव उच्यते स्म।

तस्मिन् काले इङ्ग्लैण्ड-देशे नवीनाः वस्त्रोद्योगागाराः उद्घटन्ते स्म। भारतीय-वस्त्राणां समक्षे दीनाः आङ्ग्लीयाः वस्त्रोत्पादकाः निजदेशे भारतीयवस्त्राणां प्रवेशे पूर्णप्रतिबन्धम् इच्छन्ति स्म यतः सम्पूर्णे इङ्ग्लैण्डदेशे केवलं तेषाम् एव वस्त्रस्य विक्रयणं स्यात्। एतस्मिन् क्रमे इङ्ग्लैण्डदेशस्य सर्वकारः सर्वादौ कैलिको-मुद्राङ्कित-उद्योगस्य एव सर्वकारीये संरक्षणे विकासं कृतवान्। सम्प्रति श्वेतमलमल इत्यस्मिन् अथवा माण्ड इत्येतं विना अचित्रितवस्त्रे इङ्ग्लैण्डदेशे एव भारतीयप्रारूपाणां मुद्राङ्कणम् आङ्ग्लीयाः आरब्धवन्तः।

भारतीयवस्त्रैः सह प्रतिस्पर्धात्मकप्रवृत्त्याः कारणात् इङ्ग्लैण्डदेशे प्राविधिकसंशोधनानाम् आवश्यकताः अपि दृष्टिपथम् आगताः। 1764 तमे वर्षे जॉन के इत्यनेन स्पिनिंग जैनी इत्यस्य यन्त्रस्य आविष्कारः कृतः येन परम्परागतानां तकली इत्येतासाम् उत्पादकता आधिक्येन वर्धिता। 1786 तमे वर्षे रिचर्ड-आर्कराइटरः वाष्पोर्जकस्य आविष्कारम् अकरोत् येन कार्पासवस्त्रस्य वयनं क्रान्तिकारिरूपेण परिवर्तितम्। अधुना अत्यल्पव्ययेन विपुलं वस्त्रं सज्जीकर्तुं शक्यते स्म।

एतदतिरिच्य, विश्वविपण्यां भारतीयवस्त्रस्य प्रभावः अष्टादशशताब्द्याः अन्तिमकालखण्डं यावत् आसीत्। डच, फ्रेंच, ब्रिटिश इत्येतैः अन्यैश्च यूरोपस्य व्यापारिकसमवायैः अनेन वस्त्रवाणिज्येन अतिलाभः अर्जितः। एते समवायाः भारतम् आगत्य रजतस्य विनिमयेन कार्पासकौशेयवस्त्राणि क्रीणन्ति स्म। परन्तु यथा भवन्तः जानन्ति यत् यदा आङ्ग्लीयः ईस्ट इण्डिया कम्पनी इति बङ्गालस्य राजनैतिकसत्तां प्राप्नोत् तदा भारतीयवस्तूनि क्रेतुं रजतस्य आवश्यकता कम्पनी इत्यस्य कृते नासीत् (अध्यायः 2)। एतस्मात् परं तु ईस्ट इण्डिया कम्पनी इति भारते एव कृषकेभ्यः भूस्वामिभ्यः च राजस्वम एकत्रीकृत्य तेन धनेन वस्त्रं क्रेतुम् आरब्धवान्।

➢ गतिविधिः

भवतां परामर्शानुसारं कैलिको इत्यस्य अधिनियमस्य नाम कैलिको अधिनियम इति किमर्थं स्थापितम्? अनेन नाम्ना एतस्मिन् विषये किम् अवगम्यते यत् कस्य वस्त्रस्य प्रतिबन्धः क्रियते स्म?

स्पिनिंग जैनी - किञ्चित् एतादृशं यन्त्रं येन कश्चित् श्रमिकः समानकाले नैकासु तकली इत्येतासु कार्यं कर्तुं शक्नोति स्म। यदा चक्रं भ्रमति स्म तदा सर्वाः अपि तकली इत्येताः भ्रमणं कुर्वन्ति स्म।



चित्रम् 7 – कोचीन-स्थितायाः डच-वसत्याः समुद्रात् दृश्यमानं दृश्यम्, सप्तदशशताब्द्याम्।

यथा यथा यूरोपीय-वाणिज्यं विस्तारं गतं, विभिन्नेषु पोतस्थानकेषु व्यापारिक-वसतीनां निर्माणम् अपि आरब्धम्। कोचीने डचवसत्यः सप्तदशशताब्द्यां विकसिताः। वसतीं परितः स्थितं दुर्गबन्धनं पश्यन्तु।

अष्टादश-शताब्द्याः अन्ते वयनस्य मुख्यकेन्द्राणि कुत्र कुत्र आसन् ?

चित्रम् 8 – *वयन-केन्द्राणि , 1500-1750*

यदि भवन्तः एतत् मानचित्रं द्रक्ष्यन्ति तर्हि अवगमिष्यन्ति यत् नवदशशताब्द्याः प्रारम्भे वस्त्रोत्पादनं चतुर्षु क्षेत्रेषु केन्द्रितम् आसीत्। बङ्गालः अतिमहत्त्वपूर्णकेन्द्रेषु कश्चित् आसीत्। डेल्टा इत्यस्य असङ्ख्यनदीसम्बद्धस्य बङ्गालस्य उत्पादनकेन्द्राणि निजसामग्रीं सुदूरदेशं प्रति सरलतया प्रेषयितुं शक्नुवन्ति स्म । स्मरन्तु यत्, नवदशशताब्द्याः प्रारम्भे रेलसंस्थायाः आरम्भः अपि न जातः आसीत् तथा च राजमार्गाणां निर्माणम् अपि अधुना आरम्भिकावस्थायाम् एव आसीत्।

पूर्वबङ्गाले (अधुना बाङ्ग्लादेशः) स्थितं ढाका इति स्थानम्, अष्टादशशताब्द्याम् अतिमहत्त्वपूर्णं वस्त्रोत्पादनकेन्द्रम् आसीत्। एतत् नगरं निजस्य मलमल इत्यस्य जामदानी इत्यस्य वयनस्य च कृते सुदूरदेशं यावत् प्रसिद्धम् आसीत्।

यदि भवन्तः मानचित्रे भारतस्य दक्षिणभागं पश्यन्ति तर्हि मद्रासतः उत्तरान्ध्रप्रदेशं यावत् प्रसृतेन कोरोमण्डलतटेन सह कार्पासवयनकेन्द्राणां कञ्चित् इतोऽपि समूहं द्रक्ष्यन्ति। पश्चिमतटे मुख्यवयनकेन्द्राणि गुजराते स्थितानि आसन्।

तन्तुवायाः के आसन् ?

तन्तुवायाः सामान्यतः वयनकर्तॄणां समुदायानाम् एव शिल्पकाराः भवन्ति स्म । ते वंशानुक्रमेण एतत् एव कार्यम् अग्रे वर्धयन्ति स्म । बङ्गालस्य तान्ती इति , उत्तरभारतस्य च तन्तुवायाः अथवा मोमिन, दक्षिणभारतस्य च साले ,कैकोल्लार , देवाङ्गसमुदायः च इत्येते सर्वे वयनार्थं प्रसिद्धाः आसन् ।

तन्तुनिर्माणं वस्त्रोत्पादनस्य सर्वप्रथममं चरणम् आसीत् । इदं कार्यम् अधिकांशतः महिलाधीनं भवति स्म । वयनयन्त्रं तकली चेति प्रतिगृहं विद्यन्ते स्म । सूत्रस्य वयनयन्त्रमाध्यमेन वयनं कृत्वा तकलीयन्त्रे वेष्ट्यते स्म । यदा तन्तुनिर्माणकार्यं सम्पन्नं भवति स्म तदा तन्तुवायाः एतैः तन्तुभिः वस्त्राणि वयन्ति स्म । अधिकतरेषु समुदायेषु वयनस्य कार्यं पुरुषाः कुर्वन्ति स्म । वर्णयुक्तवस्त्रस्य निर्माणाय रञ्जकाः सूत्रस्य रञ्जनं कुर्वन्ति स्म । मुद्राङ्कितस्य वस्त्रस्य निर्माणार्थं तन्तुवायाः चिप्पीगर-नामकानां कुशलशिल्पिनाम् आवश्यकता भवति स्म ये प्रारूपमाध्यमेन मुद्राङ्कणं कुर्वन्ति स्म । वयनयन्त्रैः जायमानवयनकार्येण तत्सम्बद्धव्यवसायैः च लक्षाधिकभारतीयानाम् आजीविका चलति स्म ।

चित्रम् 9 – बङ्गालस्य कश्चित् तान्ती इति तन्तुवायः, बेल्जियन इत्यस्य चित्रकारेण सोलविंसद्वारा रचितं चित्रम्, 1790 इत्यस्य दशकः ।

एतस्मिन् चित्रे तान्ती-तन्तुवायः गर्तयुक्तेन हस्तवयनयन्त्रेण कार्यं करोति । किं भवन्तः जानन्ति यत् गर्तयुक्तं हस्तवयनयन्त्रं किं भवति ?

भारतीयवस्त्रस्य पतनम्

ब्रिटेने कार्पास-वस्त्रोद्योगस्य विकासात् भारतीय-वस्त्रोत्पादकेषु नैके विपरीतप्रभावाः जाताः । प्रथमः – अधुना भारतीयवस्त्रेण यूरोपस्य अमरीकायाः च विपणीषु ब्रिटिशोद्योगेषु जातवस्त्रैः स्पर्धा करणीया भवति स्म । अन्यत् – भारतात् इङ्ग्लैण्डं प्रति वस्त्रस्य निर्यातकार्यं कठिनं जायमानम् आसीत् यतो हि ब्रिटिशसर्वकारः भारतात् आगच्छति वस्त्रे अत्यधिकं सीमाशुल्कं नियोजितवान् ।

इङ्ग्लैण्डे निर्मितेन कार्पासवस्त्रेण नवदशशताब्द्याः आरम्भपर्यन्तं भारतीयवस्त्रम् अफ्रीकातः अमरीकातः यूरोपस्य च परम्परागतविपणीभ्यः बहिर्भागं प्रति कृतम् आसीत् । एतस्मात् एव कारणात् अस्माकम् अत्रत्याः सहस्राधिकाः तन्तुवायाः वृत्तिविहीनाः जाताः । बङ्गालतन्तुवायाः तु सर्वाधिकाः प्रभाविताः अभवन् । ब्रिटिशसमवायाः यूरोपसमवायाः च भारतीयवस्तूनि न अधुना क्रीणन्ति स्म तथा च तेषां सहायकप्रतिनिधयः निश्चितापूर्तये तन्तुवायेभ्यः अग्रिमधनराशिम् अपि न अधुना यच्छन्ति स्म । अर्थात् तत्रापि प्रतिबन्धं स्थापितवन्तः । समस्याक्रान्ताः तन्तुवायाः पौनः पुन्येन सर्वकारं निवेदितवन्तः यत् सर्वकारः अत्र हस्तक्षेपं कुर्यात् तेषां च साहाय्यं कुर्यात् इति ।

औराङ्ग – फारसीभाषया गोदाम इत्यस्य कृते औराङ्ग इति उच्यते । तत्र विक्रयणात् प्राक् वस्तूनि सङ्गृह्य स्थाप्यन्ते । कार्यशालायाः कृते अपि अस्य शब्दस्य प्रयोगः क्रियते ।

"वयं बुभुक्षया मरिष्यामः"

1823 तमे वर्षे भारतस्य कम्पनीसर्वकारः 12000 तन्तुवायानां पक्षतः एकं पत्रं प्राप्नोत् तत्र उक्तम् आसीत् –

अस्माकं पूर्वजाः वयं च अपि कम्पनीपक्षतः अग्रिमधनराशिं प्राप्नुमः स्म येन वयं कम्पनी इत्यस्य कृते शोभनं वस्त्रवयनं कृत्वा स्वस्य कुटुम्बस्य भरणं पोषणं च कुर्मः स्म । अस्माकं दौर्भाग्यम् अस्ति यत् अधुना औराङ्ग इति समाप्ताः सन्ति येषां कारणात् अस्माकं जनानां अस्मदीयकुटुम्बिजनानां च पार्श्वे आजीविकायाः साधनानि न सन्ति । वयं तन्तुवायाः स्मः तथा च अन्यं व्यवसायं न जानीमः । यदि बोर्ड आफ ट्रेड इति (व्यापार बोर्ड इति) अस्मासु कृपां न करिष्यति तथा च अस्मभ्यं वस्त्राणि निर्मातुम् आदेशं न दास्यति तर्हि उदरपूर्तिं कर्तुम् अक्षमाः वयं मरणं प्राप्स्यामः ।

व्यापारिकपरिषदः क्रियान्वयनम्, 3 फरवरीमासः 1824 तमवर्षम् ।

कृपया एतत् पत्रं स्वीये वार्तापत्रे प्रकाशयन्तु

1828 तमे वर्षे काचित् विधवा तन्तुनिर्मात्री समाचार-दर्पण-नामकाय बङ्गालीवार्त्तापत्राय प्रेषितायाः निजदुर्दशायाः वर्णनम् इत्थम् अकरोत् –

सेवायाम्,

सम्पादक, वार्तापत्रम्,

अहं तन्तुनिर्मात्री अस्मि। अतिकष्टेन अहम् एतत् पत्रं लिखामि। कृपया एतत् पत्रं निजे वार्तापत्रे प्रकाशयतु --। यदा मम वयः द्वाविंशतिः वर्षम् आसीत् तदा मम पत्युः देहान्तः जातः। मम तिस्रः कन्याः आसन्। यदा मम पत्युः देहान्तः जातः तदा अस्माकं समीपे किमपि अवशिष्टं न आसीत्। पत्युः श्राद्धकर्मनिमित्तम् अहं निजाभरणानि विक्रेतुं बाध्या जाता। यदा वयं बुभुक्षया मरणावस्थायाम् आस्म , तदा ईश्वरः जीवितुम् एकम् उपायं दर्शितवान्। अहं तूलपीठिकया वयनयन्त्रेण च तन्तुनिर्माणकार्यम् आरब्धवती।

तन्तुवायाः अस्माकं गृहं प्रति आगत्य तोलात्रयं प्रति रूप्यकेण तन्तून् क्रीत्वा नयन्ति स्म। तन्तुवायेभ्यः यत् अग्रिमधनम् आवश्यकं भवति तत् अहं प्राप्नोमि स्म। इत्थं वयं भोजनस्य वस्त्राणां च विषये निश्चिन्ताः जाताः। कैश्चित् वर्षैः मया 28 रूप्यकाणि सङ्गृहितानि आसन्। अनेन धनेन मया स्वीयायाः एकस्याः कन्यायाः विवाहः कृतः। अनेन प्रकारेण मम तिस्रः अपि कन्याः क्रमशः स्वीयं स्वीयं गृहम् अगच्छन्।

अधुना त्रिभ्यः वर्षेभ्यः आवां द्वौ अपि महिले अहं मम श्वश्रूः च अन्नकणमात्रम् अपि न प्राप्नुवः। अधुना तन्तुक्रेतारः तन्तुवायाः अस्माकं समीपं नायान्ति। यदि अहं विपणीं प्रति तन्तून् प्रेषयामि तर्हि पूर्वापेक्षया चतुर्थांशमूल्यम् अपि तत्र न प्राप्नोमि।

न अवगम्यते यत् एतत् सर्वं किम् अभवत्। अहं बहून् अपृच्छम्। जनाः कथयन्ति यत् बाह्यभागात् विलायत इत्यस्मात् सूत्राणाम् आयातः जायते। तन्तुवायाः तानि सूत्राणि एव क्रीत्वा वस्त्रनिर्माणं कुर्वन्ति --। जनाः एतैः तन्तुभिः निर्मितं वस्त्रं मासद्वयं यावत् अपि न धर्तुं शक्नुवन्ति, यतो हि तत् वस्त्रं शीघ्रमेव जीर्णं शीर्णं च भूत्वा नाशं गच्छति।

कष्टापन्नायाः कस्याश्चित् सूत्रनिर्मात्र्याः आत्मकथा।

परन्तु वास्तविकानि दुर्दिनानि तु अधुना आगमनपथे आसन्। 1830 तमदशकं यावत् भारतीयविपण्यः ब्रिटेने निर्मितेन कार्पासवस्त्रेण पूर्णाः जाताः। वस्तुतः, 1830 तमदशकं यावत् स्थितिः इयं जाता यत् भारतीयाः यावत् कार्पासवस्त्रं धरन्ति स्म तस्मिन् द्वितीयांशत्वेन ब्रिटेनद्वारा निर्मितं भवति स्म। एतस्मात् न केवलं तन्तुवायानाम् अपि तु तन्तुनिर्मातॄणाम् अपि स्थितिः क्रमशः दैन्यावस्थां गता। याः लक्षाधिकाः ग्रामीणमहिलाः तन्तुनिर्माणं कृत्वा एव स्वीयाम् आजीविकाम् अर्जयन्ति स्म ताः अपि अधुना वृत्तिविहीनाः जाताः।

परन्तु भारते हस्तवयनयन्त्रैः जायमानवयनकार्यं सर्वथा न समाप्तम्। एतस्य कारणम् आसीत् यत् वस्त्राणां केचन प्रकाराः यन्त्रैः न निर्मातुं शक्यन्ते स्म। कामं जटिलाः रम्यप्रान्तभागान्विताः शाटिकाः अथवा परम्परागतानि वयनयुक्तानि वस्त्राणि यन्त्रैः कथं निर्मातुं शक्यन्ते स्म ? एतादृशानां वस्त्राणां न केवलं धनाढ्याः एव, अपि तु मध्यवर्गीयाः जनाः अपि आधिक्येन याचकाः आसन्। अपि च ब्रिटेनस्य वस्त्रोद्योगागारेषु तादृशं स्थूलवस्त्रं निर्मीयते स्म यत् भारतीयनिर्धनाः धरन्ति स्म।

➢ गतिविधिः

प्रथमं द्वितीयं च स्रोतसं पश्यन्तु। पत्रस्य प्रेषकाः स्वीयस्य दुर्भिक्षस्य कृते काः परिस्थितीः कारणरूपेण स्वीकृतवन्तः ?

भवद्भिः पश्चिमभारते स्थिते शोलापुरस्य दक्षिणभारते च स्थिते मदुरायाः विषये अवश्यमेव श्रुतवन्तः स्युः। एते नगरे नवदशशताब्द्याः अन्ते वयनाय महत्त्वपूर्णकेन्द्ररूपेण पुरतः परिलक्षिताः। अनन्तरकाले, राष्ट्रियान्दोलनकाले महात्मगान्धिः अपि जनानाम् आह्वानम् अकरोत् यत् ते आयातितवस्त्रस्य बहिष्कारं कुर्युः तथा च हस्तनिर्मिततन्तुभिः हस्तनिर्मितवस्त्राणि चैव धरेयुः इति। अनेन प्रकारेण (खादी) स्वदेशिवस्त्रं राष्ट्रवादस्य प्रतीकरूपेण निरन्तरं जातम्। हस्तवयनयन्त्रं भारतस्य परिचयरूपं प्राप्नोत् तथा च 1931 तमे वर्षे तत् भारतीय-राष्ट्रिय-काङ्ग्रेस इत्यस्य त्रिवर्णिध्वजे मध्यस्थपट्टिकायां स्थानम् अपि प्रदत्तम्।

आयान्तु, पश्यन्तु यत् आजीविकायाः साधनविहीनानां तन्तुवायानां तन्तुनिर्मातॄणां च किम् अभवत् ? तेषु नैके तु श्रमशीलाः कृषकाः जाताः। केचन च कार्यस्य अन्वेषणे नगराणि प्रति अगच्छन् तथा च नैके देशात् बाह्यभागे अफ्रीकायाः दक्षिणामरीकायाः च उद्यानेषु कार्यार्थम् अगच्छन्। तेषु नैकेषु तन्तुवायाः तन्तुनिर्मातारः च मुम्बानगर्याम् अहमदाबादे शोलापुरे नागपुरे कर्णपुरे च उद्घाटितेषु वस्त्रोद्योगागारेषु वृत्तिम् अपि प्राप्तवन्तः।

कार्पास-वस्त्रोद्योगागाराणाम् उदयः –

भारते प्रथमं कार्पासवस्त्रोद्योगागारं 1854 तमे वर्षे मुम्बानगर्यां स्थापितम्। इदं तन्तु-निर्मातृ-यन्त्रागारम् आसीत्। नवदशशताब्द्याः आरम्भात् एव भारतात् इङ्ग्लैण्डाय चीनदेशाय च जायमानासिद्धस्य कार्पासस्य च निर्याताय मुम्बानगरी इति महत्त्वपूर्ण-पोतस्थानकत्वेन जाता आसीत्। मुम्बानगरी पश्चिमभारतस्य कृष्णमृदायुक्तायाः विशालपट्टिकातः अतिसमीपे आसीत् यत्र कार्पासस्य कृषिकार्यं क्रियते स्म। यदा तत्र कार्पास-वस्त्रोद्योगागाराणां स्थापना जाता तदा उद्योगागाराः असिद्धसामग्रीं सरलतया प्राप्तुम् आरब्धवन्तः।

चित्रम् 10 – कस्मिंश्चित् कार्पास-यन्त्रागारे कार्यं कुर्वन्त्यः श्रमिकमहिलाः, प्रायः 1900 तमदशके नृपेण दीनदयालेन रचितं चित्रम्।

तन्तुनिर्मातृविभागे आधिक्येन श्रमिकमहिलाः भवन्ति स्म किञ्च तन्तुवायविभागे आधिक्येन पुरुषाः भवन्ति स्म।

प्रगलनम् – महाप्रस्तरम् (अथवा मृदाम्) अत्यधिके उन्नते तापमाने उष्णीकृत्य धातुनिर्माणस्य अथवा धातुनिर्मितवस्तूनां द्रवीकरणस्य प्रक्रिया येन कस्यचित् नवीनवस्तुनः निर्माणं शक्येत।

1900 तमवर्षस्य आरम्भपर्यन्तं मुम्बानगर्यां 84 वस्त्रोद्योगागाराः आरब्धाः आसन्। तेषु नैके उद्योगागाराः पारसिव्यवसायिनः गुजरातिव्यवसायिनः च उद्घाटितवन्तः ये चीनदेशेन सह वाणिज्यमाध्यमेन प्रभूतं धनम् अर्जितवन्तः आसन्।

एतस्मिन् अवधौ अन्येषु नगरेषु अपि नैकानि एतादृशानि उद्योगागाराणि उद्घाटितानि। अहमदाबादे प्रथमम् उद्योगागारम् 1861 तमे वर्षे उद्घाटितम्। अग्रिमे एव वर्षे संयुक्तप्रान्तस्थिते कर्णपुरे अपि किञ्चन यन्त्रागारम् उद्घाटितम्। कार्पासवस्त्रोद्यागागाराणां वर्धमानसंख्याकारणात् श्रमिकाणां याचना अपि वर्धयितुम् आरब्धा। सहस्राधिकाः निर्धनकृषिजीविनः शिल्पकाराः श्रमिककृषकाः च यन्त्रागारेषु कार्यं कर्तुं नगराणि प्रति गन्तुम् आरब्धवन्तः।

प्रारम्भिकेषुकेषुचित्दशकेषुभारतीयवस्त्रोद्योगागाराणिनैकसमस्यानां सम्मुखीकरणाय बाध्यानि जातानि। आदिमा समस्या तु इयम् आसीत् यत् अनेन उद्योगागारेण ब्रिटेनतः समागतानार्घवस्त्रैः प्रतिस्पर्धितव्यम् आसीत्। अधिकेषु देशेषु सर्वकाराः विदेशादागतेषु वस्तुषु सीमाशुल्कं संस्थाप्य निजदेशे औद्योगिकीकरणं वर्धयन्ति स्म। एतस्मात् प्रतिस्पर्धा समाप्तिं गच्छति स्म तथा च सम्बन्धितदेशस्य नवजातोद्योगागाराणि संरक्षितानि भवन्ति स्म। परन्तु औपनिवेशिकः भारतीयसर्वकारः स्थानीयोद्योगानां सामान्यतः एवंविधं संरक्षणं न अकरोत्। परिणामतः, भारते औद्योगिकस्य कार्पास-वस्त्रोत्पादनस्य प्रथमा महती क्रान्तिः प्रथमविश्वयुद्धकाले दृग्गोचरी जाता यदा ब्रिटेनतः आगम्यमानवस्त्रं न्यूनं जातं तथा च सैनिकावश्यकतानां पूर्तये भारतीययन्त्रागाराणि वस्त्रस्य प्रभूतम् उत्पादनं कुर्युः इति याचना आरब्धा।

चित्रम् 11 – अष्टादशशताब्द्याः अन्ते टीपोः असिः।

टीपूसुल्तानस्य असेः मुष्टिकायां कुराणस्य वाक्यानि लिखितानि सन्ति यत्र युद्धे विजयसन्देशाः प्रदत्ताः सन्ति। सावधानं पश्यन्तु यत् सिंहस्य शिरः असिमुष्टिकायाः अधोभागं प्रति अस्ति।

टीपूसुल्तानस्य असिः वट्ज-अयस्सारः इति

भारतीय-इस्पातस्य लौहधातुकलायाः च कथा वयं टीपूसुल्तानस्य केनचित् प्रसिद्धकथानकेन आरभामहे सः एव एषः टीपूसुल्तानः अस्ति यः 1799 तमवर्षपर्यन्तं मैसूरस्य शासनम् अकरोत् तथा च आङ्ग्लीयैः सह चतुःकृत्वः युद्धम् अकरोत् तथा च असिना युद्धं कुर्वन् एव वीरगतिं प्राप्नोत्। टीपोः विश्वविख्याताः असयः अद्य इङ्ग्लैण्डस्य सङ्ग्रहालयेषु बहुमूल्यसम्पत्तिरूपाः सन्ति। परन्तु किं भवन्तः जानन्ति यत् टीपोः असिः एतावती विशिष्टा किमर्थम् आसीत्? वस्तुतः एतस्य असेः तीक्ष्णता (धारा वा) एतावती दृढा निशिता च आसीत् यत् सा शत्रुः लौहकवचम् अपि सारल्येन भेत्तुं शक्नोति स्म। एतस्याम् असौ एतादृशः गुणः कार्बन इत्यस्य अधिकमात्रायुक्तायाः वुट्जनामकायस्सारात् जातः आसीत् यः सम्पूर्णे दक्षिणभारते निर्मीयते स्म। एतेन वुट्जायस्सारनिर्मिताः असयः अतीव तीक्ष्णाः निशिताः च भवन्ति स्म। एतासाम् इयं संरचना लोहमिश्रितकार्बन इत्यस्य अतीव सूक्ष्मकणैः जायते स्म।

टीपूसुल्तानस्य मृत्योः एकवर्षानन्तरं 1800 तमे वर्षे मैसूरस्य यः यात्राम् अकरोत् सः फ्रांसदेशीयः बुकाननः एतस्य घटनायाः उल्लेखम् अकरोत् यत् मैसूरस्य शताधिकेषु प्रगलन इति अग्निकुण्डेषु वुट्डस्टील इति कथं निर्मीयते स्म। एतेषु अग्निकुण्डेषु लोहः काष्ठकृष्णाङ्गारेण सह मेलयित्वा मृदायाः लघुषु लघुषु घटेषु स्थाप्यते स्म। तापमानस्य जटिलम् आरोहावरोहं नियन्त्रयन् प्रगालक-इस्पातस्य शाणाः सज्जीक्रियन्ते स्म येषां न केवलं भारते अपि तु पश्चिमे मध्यैशियायां च अपि असिनिर्माणाय प्रयोगः क्रियते स्म।

वुट्ज इति शब्दः वस्तुतः कन्नडशब्दस्य उक्कू इत्यस्य, तेलगुशब्दस्य हुक्कू इत्यस्य तथा च तमिलस्य अथवा मलयालमशब्दस्य उरुक्कू इत्यस्य अर्थात् (स्टील) अयस्सारस्य एव विकृतम् आङ्ग्लीयरूपम् अस्ति।

भारतीयेन वुट्ज् इत्यनेन अयस्सारेण यूरोपीय-वैज्ञानिकाः आधिक्येन आकृष्टाः। विश्वविख्यातः वैज्ञानिकः विद्युतः विद्युतचुम्बकत्वस्य च आविष्कर्ता माइकलफैराडे भारतीयस्य वुट्ज-अयस्सारस्य विशेषतानां वर्षचतुष्टयं यावत् (1818-22) तमवर्षं यावत् अध्ययनम् अकरोत्। परन्तु दक्षिणभारते एतावत्याः प्रचलितायाः वुट्ज् इत्यस्याः अयस्सार-निर्माण-प्रक्रियायाः नवदशशताब्द्याः मध्यकालपर्यन्तं सर्वथा लोपः जातः आसीत्। किं भवन्तः ज्ञापयितुं शक्नुवन्ति यत् इत्थं कथं जातं स्यात्? भारते आङ्ग्लीयानां जयेन सह एव अत्रत्यः असिनिर्माणस्य आयुधनिर्माणस्य च उद्योगः समाप्तः जातः तथा च भारतीयशिल्पिभिः निर्मीयमानलोहस्य इस्पातस्य च स्थानम् इङ्ग्लैण्डदेशतः आगतलोहेन इस्पातेन च गृहीतम्।

ग्रामाणां नष्टाः अग्निकुण्ठाः

वुट्ज-स्टील इत्यस्य उत्पादनाय लोहपरिशोधनस्य अत्यन्तस्य परिष्कृतप्रविधेः आवश्यकता आसीत्। परन्तु भारते नवदशशताब्दस्य अन्तकालपर्यन्तं लोहद्रवीकरणस्य कश्चित् सामान्यः गतिविधिः आसीत्। विशेषतया बिहारस्य मध्यभारतस्य च प्रत्येकं जनपदे एतादृशाः लोहस्य द्रवीकर्तारः शिल्पिनः आसन् ये लोहनिर्माणार्थं लोहायस्कस्य स्थानीयभण्डागाराणां प्रयोगं कुर्वन्ति स्म। अनेन एव लौहेन यन्त्रागारेषु दैनिकप्रयोगाय लोहोपकरणानि साधनानि च अपि निर्मीयन्ते स्म। आधिक्येन अग्निकुण्डाः मृत्तिकया निर्मीयन्ते स्म तथा च सूर्यातपे शुष्केष्टिकाभिः निर्मिताः भवन्ति स्म। लोहस्य द्रवीकरणस्य कार्यं पुरुषाः कुर्वन्ति स्म अपरञ्च महिलाः भस्त्रिकां चालयन्ति स्म। महिलाः कृष्णाङ्गारं नैरन्तर्येण ज्वालयितुं वायुं प्रवहन्ति स्म।

➢ गतिविधिः

नृपाणां शासकानां च पराजयात् लौहोद्योगः इस्पातोद्योगः च कथं प्रभावितः भवति स्म ?

धौंकनी (भस्त्रिका) - वायुप्रवाहकं यन्त्रम्।

चित्रम् 12 – पालामावुः,बिहारस्य लौहशिल्पिनः

चित्रम् 13 – मध्यभारतस्य कश्चित् ग्रामः यत्र लौहस्य द्रावकाणाम् अगरिया इति समुदायः निवसति स्म ।

अगरियासदृशाः नैकसमुदायाः लौहनिर्माणे दक्षाः आसन् । नवदशशताब्द्याः अन्तिमे कालखण्डे पौनःपुन्येन जातस्य दुर्भिक्षकारणात् भारतस्य शुष्ककक्षेत्राणि सर्वथा नष्टानि जातानि आसन् । मध्यभारते नैके अगरियाशिल्पिनः कार्यस्य पिधानं कृतवन्तः, ते ग्रामं त्यक्तवन्तः तथा च आजीविकायाः अन्वेषणे अन्यक्षेत्राणि प्रति गतवन्तः । तेषु बहुभिः जनैः पुनः कदापि लोहनिर्माणाय अग्निकुण्डाः न संस्थापिताः ।

स्रोतः 3

कश्चित् व्यापकः उद्योगः

प्राणि-विज्ञान-सर्वेक्षण-विभागस्य समाख्यानुसारम् –

कस्मिंश्चित् काले लौहस्य द्रवीकरणं भारतस्य अतीवव्यापकः उद्योगः आसीत् तथा च सिन्धोः गङ्गायाः ब्रह्मपुत्रस्य च विशालसैकतसमतलस्थानानि अतिरिच्य कदाचित् एव एतादृशः कश्चित् जनपदः स्यात् यत्र धातुमलं न दृश्येत । अत्रत्याः आदिमाः लौहस्य द्रवीकर्तारः एतादृशेभ्यः आकरेभ्यः अयस्कप्राप्तौ किञ्चित् कष्टं न भवति स्म यत्र कश्चित् यूरोपीयः लौहविशेषज्ञः पलाय अपि विचारणाम् उचिताम् अपि उचितां न इति अवगच्छेत् ।

नवदशशताब्द्याः अन्तपर्यन्तं लौहस्य द्रवीकरणस्य शिल्पः समाप्तिं प्रति गच्छन् आसीत् । अधिकतरेषु ग्रामेषु अग्निकुण्डानि शान्तानि जातानि आसन् तथा च लौहस्य उत्पादनं पतति स्म । इत्थं किमर्थम् अभवत् ?

एतस्य किञ्चित् कारणं तु नवीनाः वन्याधिनियमाः एव आसन् येषां विषये भवन्तः चतुर्थे अध्याये पठितवन्तः । यदा औपनिवेशिक-सर्वकारः आरक्षितवनेषु जनानां प्रवेशे प्रतिबन्धं स्थापितवान् तदा लौहस्य निर्मातारः कृष्णाङ्गाराय काष्ठानि कुतः प्राप्तुं शक्नुवन्ति स्म ? तथा च, लौहायस्काः अपि ते कुतः आनेतुं शक्नुवन्ति स्म ? वन्याधिनियमानाम् अवहेलनं कुर्वन्तः ते प्रायः गोप्येन वनानिगत्वा काष्ठसङ्ग्रहणं कुर्वन्ति स्म परन्तु चिरकालं यावत् अनेन एव प्रकारेण निजव्यवसायं ते न कर्तुं शक्नुवन्ति स्म । परिणामतः, नैके शिल्पिनः लौहनिर्माणव्यवसायं त्यक्तवन्तः तथा च ते आजीविकायाः अन्यानि साधनानि अन्वेष्टुम् आरब्धवन्तः ।

केषुचित् क्षेत्रेषु सर्वकारः वनेषु आवागमनस्य वन्यसंसाधनानि च उपयोक्तम् अनुमतिं दत्तवान् आसीत् परन्तु लौहस्य द्रवीकर्तारः स्वीयस्य प्रत्येकम् अग्निकुण्डाय वनविभागाय प्रभूतं राजस्वं दातव्यं भवति स्म यस्मात् शिल्पिनाम् अर्जनं न्यूनं भवति स्म ।

नवदशशताब्दस्य अन्तकालपर्यन्तं ब्रिटेनतः लौहस्य इस्पातस्य च विदेशादानयनम् अपि जायमानम् आसीत् । भारतीयाः लौहकाराः अपि गृहसम्बद्धानि पात्राणि लौहोपकरणादिनिर्माणाय विदेशाद् आयातितस्य लौहस्य प्रयोगम् आरब्धवन्तः आसन् । एतस्मात् कारणात् स्थानीयैः लौहद्रावकैः निर्मीयमानस्य लौहस्य याचना न्यूना जायमाना आसीत् ।

विंशतितमशताब्द्याः आरम्भककालपर्यन्तं लौहनिर्मातॄणाम् इस्पातनिर्मातॄणां च शिल्पिनां पुरतः किञ्चित् नवीनाह्वानं समुपस्थितम् ।

भारते लौहेस्पात-यन्त्रागाराणाम् उदयः

धातु-मलम् - धातोः द्रवीकरणात् जायमानः अवकरः ।

1904 तमवर्षे प्रवृत्ता काचित् घटना अस्ति । अप्रिल्-मासे अमरीकायाः भूवैज्ञानिकः चार्ल्सवेल्डः जमशेदजीटाटायाः च ज्येष्ठपुत्रः दारोबजीटाटा छत्तीसगढे लौहायस्क-आकरान् अन्वेष्यन्तौ भ्रमन्तौ आस्ताम् । तौ भारते कस्यचित् आधुनिकलौहस्य आधुनिकस्य च इस्पातस्य संयन्त्रं स्थापयितुं श्रेष्ठाणां लौहायस्क-आकराणाम् अन्वेषणे नैकमासेभ्यः पर्याप्तधनं चापि व्ययीकृतवन्तौ आसन् । जमशेदजीटाटा भारते व्यापकपरिमाणेन लौहस्य इस्पातस्य च यन्त्रागारं संस्थापयितुं निजनसम्पत्तेः महान्तं भागं व्ययीकर्तुं सज्जः आसीत् । परन्तु एतदर्थं तेन प्रथमः पणबन्धः अयं स्थापितः आसीत् यत् उत्कृष्टानां लौहायस्काकराणाम् अवगमनं स्यात् इति ।

एकस्मिन् दिने, नैकहोरापर्यन्तं वने भ्रमणात् अन्वेषणात् च परं बेल्डः दोराबजी च कञ्चित् लघुग्रामं प्राप्तवन्तौ । तत्र तौ दृष्टवन्तौ यत् काश्चन स्त्रियः केचन पुरुषाः च कण्डोलेषु प्रपूर्यं लौहायस्कं नयन्ति । एते अगरियासमुदायस्य जनाः आसन् । यदा ते पृष्टाः यत् ते लौहायस्कं कुतः आनीतवन्तः तदा ते सुदूरस्थितां पर्वतोपत्यकां प्रति सङ्केतितवन्तः । वेल्डः दोराबजी च सघनवन्यप्रदेशात् भूत्वा चिरकालानन्तरं परिश्रान्तौ तं पर्वतशिखरं प्राप्तवन्तौ । पर्वतशिखरस्य अध्ययनं कृत्वा वेल्डः असूचयत् यत् तौ यत् वस्तु अन्वेषयन्तौ आस्तां तत् ताभ्यां प्राप्तम् अस्ति । रझारा इति पर्वतशिखराः विश्वस्य सर्वश्रेष्ठेषु लौहायस्काकरेषु अन्यतमाः आसन् ।

परन्तु अत्र काचित् समस्या आसीत् । इदं शुष्कक्षेत्रम् आसीत् तथा च यन्त्रागारस्य सञ्चालनाय समीपवर्तिनि स्थाने क्वचित् अपि जलम् न आसीत् । वस्तुतः, यन्त्रागारस्य संस्थापनाय समुचितस्थानस्य विषये टाटावर्यस्य अन्वेषणं निरन्तरम् आसीत् । अगरिया-समुदायस्य जनाः एव लौहायस्कस्य कस्यचित् अन्यत् स्रोतसः अन्वेषणे साहाय्यं कृतवन्तः यतः अनन्तरकाले भिलायी-अयस्सार-संयन्त्राय अयस्कस्य आपूर्तिः कृता आसीत् ।

केषाञ्चित् वर्षाणाम् अनन्तरं सुबर्णरेखानद्याः तटे विपुलं वन्यभूमेः स्वच्छतां कृत्वा यन्त्रागारस्य औद्योगिकनगरस्य च संस्थापनाय स्थानं कल्पितम् । एतस्य नगरस्य जमसेदपुरम् इति नामकरणं कृतम् । एतस्मिन् स्थाने लौहायस्क-भण्डागाराणां निकटे एव जलम् अपि उपलब्धम् आसीत् । तत्र टाटा आयरन एण्ड स्टील कम्पनी (टिस्को) इत्यस्य स्थापना जाता । यत्र 1912 तमवर्षात् अयस्सारस्य उत्पादनम् आरब्धम् ।

टिस्को इत्यस्य स्थापना समुचितकाले जाता आसीत् । नवदशशताब्द्यां भारतदेशः सामान्यतः ब्रिटेने निर्मितस्य अयस्सारस्य आनयनं करोति स्म । भारते भारतीयरेलवे इति

चित्रम् 14 – सुवर्णरेखानद्याः तटे निर्मितं टाटा आयरन एण्ड स्टील फैक्ट्री इति, 1940

संस्थायाः विस्तारकारणात् ब्रिटेने निर्मितपट्टिकानाम् अत्र आधिक्येन याचनं क्रियते स्म । चिरकालं यावत् भारतीयरेलवे इति संस्थासम्बद्धाः आङ्ग्लीयाः विशेषज्ञाः इदं मन्तुं सज्जाः एव न आसन् यत् भारते अपि श्रेष्ठेस्पातस्य निर्माणं शक्यते ।

यावत्पर्यन्तं टिस्को इत्यस्य स्थापना जाता, स्थितेः परिवर्तनं जायमानम् आसन् । 1914 तमे वर्षे प्रथमं विश्वयुद्धम् आरब्धम् । ब्रिटेने निर्मीयमानम् इस्पातं यूरोपे युद्धसम्बद्धाः आवश्यकताः पूरयितुं नियुक्तम् । अनेन प्रकारेण भारतं प्रति आगम्यमानस्य ब्रिटिशायस्सारस्य परिमाणे न्यूनता आगता तथा च रेलवे इति संस्थायाः मार्गाणां कृते भारतीयरेलवे इति संस्था टिस्को इत्यस्मिन् आश्रिता । यदा युद्धं चिरकालपर्यन्तम् अजायत तदा टिस्को इति संस्थायै युद्धाय गोलकानां खोल इति तथा च रेलयानानां च चक्रनिर्माणकार्यम् अपि अर्पितम् । 1919 तमवर्षं यावत् स्थितिः इयं जाता यत् टिस्को इत्यस्मिन् निर्मीयमाणं 90 प्रतिशतम् इस्पातम् औपनिवेशिकसर्वकारः एव क्रीणाति स्म । कालक्रमेण टिस्को इति संस्था समग्रे ब्रिटिशसाम्राज्ये इस्पातस्य महत्तमयन्त्रागारं जातम् आसीत् ।

कार्पासवस्त्रस्य इव लौहस्य इस्पातस्य च विषये अपि औद्योगिकविस्तारः तदा आरब्धः यदा भारते ब्रिटिशायातः पतनं प्रति गतः तथा च भारतीयौद्योगिक-वस्तूनाम् अभ्यर्थनायाः वर्धनम् अभवत् ।

चित्रम् 15 – युद्धस्य अन्ते विस्तारः ।

युद्धसम्बद्धाः आवश्यकताः पूरयितुं टिस्को इति संस्थया निजक्षमतायाः यन्त्रागारस्य च आकारविस्तारः अपि करणीयः अभवत् । विस्तारस्य इदं कार्यं युद्धात् परम् अपि प्राचलत् । एतस्मिन् चित्रे नवीनाः विद्युत्-संयन्त्राणि बायलर-संयन्त्राणि चापि निर्मीयन्ते, जमशेदपुरम् 1919 ।

एतानि परिवर्तनानि प्रथमस्य विश्वयुद्धस्य काले ततः परं च पुरतः आगतानि । यथा यथा राष्ट्रियान्दोलनानि विकसितानि, औद्योगिकवर्गीयाः शक्तिशालिनः क्रमशः जाताः तथा च सर्वकारीयस्य संरक्षणस्य अभ्यर्थना मुक्ताः जाताः । भारतं शासयितुं सङ्घर्षरतः ब्रिटिशसर्वकारः औपनिवेशिकशासनस्य अन्तिमदशकेषु उपर्युक्ताभ्यर्थनासु नैकाः अभ्यर्थनाः स्वीकर्तुं बाध्यः जातः ।

अन्यत्र –

जापाने औद्योगिकीकरणस्य आरम्भिकवर्षाणि

नवदशशताब्द्याः अन्ते जापानस्य औद्योगिकीकरणस्य इतिहासः भारतस्य औद्योगिकीकरणात् सर्वथा विपरीतं दृश्यते । भारते औपनिवेशिकसर्वकारः ब्रिटिशवस्तूनां विपण्याः विस्तारम् इच्छति स्म अतः सः भारतीयोद्योगपतीनां कथञ्चित् अपि साहाय्यं न अकरोत् । अपरस्मिन् पक्षे, जापानस्य सर्वकारः स्वीयदेशस्य उद्योगानां मुक्ततया वर्धनम् अकरोत् ।

1868 तमे वर्षे जापानस्य सत्तासीनस्य मेजी इति राजवंशस्य मतम् आसीत् यत् जापानदेशेन पश्चिमप्रभुत्वस्य सम्मुखीकरणाय औद्योगिकीकरणस्य मार्गे गन्तव्यम् । अतः तेन औद्योगिकीकरणस्य विस्ताराय नैकमहत्त्वपूर्णोपायाः कृताः । एतस्मिन् एव क्रमे पत्राचारीयसेवानां दूरच्छायाचित्रणस्य (टेलीग्राफ) रेलवे इति संस्थायाः वाष्पचालितानां जलपोतानां च विकासः कृतः । पश्चिमतः नवीनतम-प्रविधेः आनयनं कृतं तथा च सः जापानस्य आवश्यकतानुरूपं परिवर्तितः । जापानदेशस्य व्यवसायिकजनान् प्रशिक्षयितुं वैदेशिक-विशेषज्ञाः आहूताः । निवेशाय सर्वकारीयवित्तकोशेभ्यः उद्योगपतिभ्यः सपणम् ऋणरूपेण धनं प्रदत्तम् । सर्वकारेण प्राथम्येन विशालाः उद्योगाः आरब्धाः अनन्तरकाले च ते उद्योगाः अल्पमूल्यैः व्यवसायिकवंशीयेभ्यः जनेभ्यः विक्रीताः ।

भारते औपनिवेशिक-प्रभुत्व-सम्पन्नैः जनैः औद्योगिकीकरणस्य मार्गे बाधोत्पादनम् आरब्धम् आसीत् अपरञ्च जापाने विदैशिकस्य अधिग्रहणस्य भयकारणात् एव औद्योगिकीकरणं वर्धितम् आसीत् । परन्तु एतस्य कश्चित् अभिप्रायः अयम् अपि आसीत् यत् जापानस्य औद्योगिकविकासः आरम्भात् एव तस्य सैनिकावश्यकताभिः सम्बद्धः आसीत् ।

पुनः स्मरन्तु –

1. यूरोपे कीदृशानां वस्त्राणाम् आधिक्येन आवश्यकता अनुभूयते स्म ?
2. जामदानी इति किम् अस्ति ?
3. बण्डाना इति किम् अस्ति ?
4. अगरिया इति एते के भवन्ति ?

आयन्तु कल्पनां कुर्मः

कल्पनां कुर्वन्तु यत् भवन्तः एकोनविंशशताब्द्याः उत्तरवर्तिकालस्य तन्तुवायाः सन्ति । भारतीययन्त्रागारेषु निर्मितवस्त्राणि विपणीषु विपुलतया विद्यन्ते । एतादृश्यां स्थितौ भवन्तः स्वीये जीवने कीदृशं परिवर्तनम् आनेष्यन्ति ?

5. रिक्तस्थानानि पूरयन्तु - --

(क) आङ्ग्लभाषायाः शिंट्ज इति शब्दः हिन्दीभाषायाः ------ इति शब्दात् निर्गतः अस्ति।

(ख) टीपू इत्यस्य असिः ----- इत्यनेन अयस्सारेण निर्मिता आसीत्।

(ग) भारतस्य वस्त्रनिर्यातः ---- इत्यस्यां शताब्द्यां पतितुम् आरब्धः।

आयान्तु विचारं कुर्मः

6 विभिन्नवस्त्राणां नामभिः तेषाम् इतिहासानां विषये किम् अवगम्यते ?

7. इङ्ग्लैण्डस्य ऊर्णायाः कौशेयस्य च उत्पादकाः अष्टादशशताब्द्याः आरम्भिककाले भारतात् आगच्छतः वस्त्रस्य विरोधं किमर्थं कृतवन्तः आसन् ?

8. ब्रिटेनदेशे कर्पासोद्योगस्य विकासात् भारतस्य वस्त्रोत्पादकेषु कीदृशाः प्रभावाः जाताः ?

9. नवदशशताब्द्यां भारतीय-लौह-द्रवीकरण-उद्योगस्य पतनं किमर्थम् अभवत् ?

10. भारतीय-वस्त्रोद्योगः स्वीयाम्भिकेषु वर्षेषु किंविधानां समस्यानां सम्मुखीकरणं कर्तुं बाध्यः आसीत् ?

11. प्रथमस्य महायुद्धस्य काले स्वीये अयस्सारोत्पादने टिस्को इत्यनेन कथं साहाय्यं प्राप्तम् ?

आयान्तु कृत्वा पश्यामः

12. यत्र भवन्तः निवसन्ति तत्रत्याः पार्श्वस्थायाः प्रचलितायाः कस्याश्चित् हस्तकलायाः इतिहासम् अवजानन्तु। एतदर्थं भवन्तः शिल्पकाराणां तेषां च प्रविधौ जातपरिवर्तनानां तेषां विपणीनां च विषये अपि सूचनाः एकत्रीकर्तुं शक्नुवन्ति। अवगच्छन्तु यत् गते पञ्चाशत् वर्षावधौ एतेषु वस्तुषु कथं परिवर्तनानि जातानि ?

13. भारतस्य मानचित्रे विभिन्नानां हस्त-कलानां पृथक् पृथक् केन्द्राणां चिह्नीकरणं कुर्वन्तु। अवजानन्तु यत् एतानि केन्द्राणि कदा उत्पन्नानि अभूवन् ?

॥ इति सप्तमोऽध्यायः ॥

8 स्वदेशीयजनतायाः सभ्यीकरणं राष्ट्रस्य शिक्षितीकरणम्

आरम्भिकेषु अध्यायेषु भवन्तः दृष्टवन्तः यत् ब्रिटिशशासनस्य कारणात् अत्रत्येषु नृपेषु शासकेषु कृषकेषु आदिवासिषु च कीदृशाः प्रभावाः जाताः आसन्। एतस्मिन् अध्याये वयम् एतस्य विषयस्य अवगमनस्य प्रयासं करिष्यामः यत् एतैः विषयैः विद्यार्थिनां जीवने कीदृशाः प्रभावाः जाताः। विद्यार्थिनां जीवनस्य अवगमनम् एतस्मात् अपि आवश्यकम् अस्ति यतो हि भारते आङ्ग्लीयाः केवलं भूक्षेत्रे विजयः आये च नियन्त्रणम् एव नैव इच्छन्ति स्म। ते अनुभवन्ति स्म यत् तेषां कञ्चित् सांस्कृतिकं लक्ष्यम् अपि अस्ति। ते मन्यन्ते स्म यत् तैः "देशीयसमाजस्य सभ्यीकरणम्" तस्य च रीतीनां परम्पराणां मान्यतानाम् अपि परिवर्तनं करणीयम् अस्ति इति ।

एतदर्थं कानि परिवर्तनानि आवश्यकानि आसन् ? भारतीयान् शिक्षितान् सभ्यान् च कर्तुम् आङ्ग्लचिन्तनानुसारं, सुप्रजानिर्माणाय के प्रयासाः कर्तव्याः आसन् ? आङ्ग्लीयानां समक्षे अपि एतादृशानां प्रश्नानां कानिचन सिद्धोत्तराणि न आसन्। एतादृशान् प्रश्नान् अभिलक्ष्य नैकदशकान् यावत् चर्चाः नैरन्तर्येण जाता।

भाषाविद् – एतादृशः जनः यः नैकभाषाविद् विद्यार्थी च भवति।

आङ्ग्लीयाः शिक्षां कथं पश्यन्ति स्म

आयान्तु, सर्वादौ एतस्मिन् तथ्ये ध्यानं कुर्मः यत् शिक्षायाः क्षेत्रे आङ्ग्लीयाः किं चिन्तयन्ति स्म तथा च शिक्षासम्बद्धान् यान् विचारान् अद्य वयं सामान्यान् सहजान् च इति चिन्तयामः ते गतेषु द्विशतं वर्षावधौ कथं विकसिताः जाताः। एतादृशस्य अन्वेषणस्य काले वयं विचारयिष्यामः यत् भारतीयाः ब्रिटिशविचारान् अभिलक्ष्य कीदृशीं प्रतिक्रियां कृतवन्तः तथा च एतस्मिन् विषये आङ्ग्लीयानां विचाराः कथं विकसिताः यत् भारतीयानाम् अध्यापनं कथं स्यात् इति।

चित्रम् 1 – विलियम-जोन्सः, फारसीभाषां शिक्षते।

प्राच्यवादस्य परम्परा –

1783 तमे ईस्वीये वर्षे विलियम-जोन्सनामकः कश्चित् जनः कलकत्तानगरम् आगतवान्। सः ईस्ट-इण्डिया-समवायद्वारा स्थापिते सर्वोच्चन्यायालये कनिष्ठन्यायाधीशरूपेण नियुक्तः आसीत्। सः विधिवेत्ता आसीत् तेन सह च जोन्सः भाषाविद् अपि आसीत्। सः आक्सफर्डमध्ये ग्रीकस्य लैटिन इत्यस्य च अध्ययनम् अकरोत्, सः फ्रैञ्चाङ्ग्लभाषे च वेत्ति स्म तथा च स्वीयात् कस्माच्चित् मित्रात् अरबीभाषाशिक्षणात् परं फारसीभाषाम् अपि ज्ञातवान् आसीत्।

चित्रम् 2 - हेनरि-टामस-कोलब्रुकः । सः संस्कृतस्य हिन्दुत्वस्य च प्राचीन-धार्मिक-ग्रन्थानां विद्वान् आसीत् ।

कलकत्तानगरं प्रति आगमनात् परं सः प्रतिदिनं संस्कतविदुषां सान्निध्ये तेभ्यः संस्कृतभाषायाः गभीरतां संस्कृतभाषायाः च व्याकरणं संस्कृतकाव्यानि च अध्येतुम् आरब्धवान् । स्वल्पे एव काले सः विधिशास्त्रस्य दर्शनस्य धर्मस्य राजनीतिशास्त्रस्य नैतिकतायाः अङ्कगणितस्य चिकित्साविज्ञानस्य अन्यविज्ञानानां प्राचीनभारतीयपुस्तकानां च अध्ययनम् आरब्धवान् ।

जोन्सः अपश्यत् यत् तस्मिन् काले कलकत्तानगरे नियुक्ताः नैके आङ्ग्लाधिकारिणः अपि तत्सदृशरुचीः एव दधति स्म । हैनरी-टामस-कोलब्रुकः नैथेनियल-हालहेडः इति एते अपि भारतीयभाषाः शिक्षित्वा संस्कृतफारसीनिबद्धानां रचनानाम् आङ्ग्लभाषया अनुवादं कुर्वन्ति स्म तथा च प्राचीनभारतीयज्ञानराशिम् अवगन्तुं प्रयतमानाः आसन् । एतैः जनैः सह मिलित्वा जोन्सः एशियाटिक-सोसायटी आफ बङ्गाल इत्यस्याः संस्थायाः स्थापनाम् अकरोत् तथा च एशियाटिक-रिसर्च इति नामधेयायाः पत्रिकायाः प्रकाशनम् अपि आरब्धवान् ।

जोन्सस्य कोलब्रुकस्य च भारतम् उद्दिश्य पृथक् चिन्तनम् आसीत् । तौ भारतस्य पश्चिमस्य च प्राचीनसंस्कृतिं प्रति गहनादरं धत्तः स्म । तयोः मतम् आसीत् यत् भारतीयसभ्यता प्राचीनकाले निजवैभवस्य शिखरे आसीत् परन्तु अनन्तरकाले तस्याः पतनम् अजस्रम् अभवत् । तयोः चिन्तनानुसारं भारतस्य अवगमनाय प्राचीनकाले लिखितानां पवित्रग्रन्थानां विधिशास्त्राणां च अन्वेषणं तेषाम् अवगमनं च आवश्यकम् आसीत् । तयोः मतम् आसीत् यत् हिन्दूनां मुस्लिमजनानां च यथार्थविचाराणां विधीनां च अवगमनम् एतासां रचनानां माध्यमेन भवितुं शक्नोति तथा च एतासां रचनानां पुनः अध्ययनेन एव भारतस्य भाविविकासस्य आधारं सम्भवितुं शक्नोति ।

अनेन प्रकारेण, जोन्सः कोलब्रुकः च एतौ द्वौ एव प्राचीनग्रन्थानाम् अन्वेषणे तेषां ग्रन्थानां व्याख्याने अनुवादकार्ये अधिकाधिकजनान् यावत् च निजपरिणामानां प्रापणकार्ये निरताः जाताः । तयोः विश्वासः आसीत् यत् इयं परियोजना न केवला भारतीयसंस्कृतेः अवगमनाय आङ्ग्लीयानां सहायिका भविष्यति अपि तु भारतीयाः अपि निजपैतृकज्ञानराशेः पुनरवगमनाय तस्य ग्रहणाय आचरणाय तथा च अतीतस्य लुप्तवैभवम् अवगन्तुम् अपि साहाय्यं प्राप्स्यन्ति । अनेन प्रकारेण आङ्ग्लीयाः भारतीयसंस्कृतेः अभिभावकस्य स्वामिनः च इत्यनयोः द्वयोः भूमिकयोः एव निर्वहणं कुर्वन्ति स्म ।

एतादृशैः प्रयासैः विचारैः च प्रभाविताः भूत्वा समवायस्य नैके अधिकारिणः तर्कम् उपस्थापितवन्तः यत् आङ्ग्लीयाः पश्चिमज्ञानं विहाय भारतीयज्ञानस्य एव प्रोत्साहनं कुर्युः इति । भारतीयसंस्कृतिनिष्ठाः केचन आङ्ग्लीयविद्वान्सः इच्छन्ति स्म यत् प्राचीनभारतीयग्रन्थानाम् अध्ययनस्य प्रोत्साहनाय संस्कृतफारसीसाहित्यस्य काव्यवस्य च पाठनाय अध्यापनाय वा संस्थानानां स्थापना स्यात् । एतादृशानाम् अधिकारिणाम् इदम् अपि मतम् आसीत् यत् हिन्दुमुस्लिमजनानां च पाठनं तेषां ग्रन्थानां माध्यमेन एव स्यात् यैः ते पूर्वतः एव परिचिताः सन्ति तथा च तेषाम् आदरं कुर्वन्ति महत्त्वं च जानन्ति । अपरिचितविषयाणां पाठनं शिक्षणं वा न तेषां स्यात् इति । एतादृशानाम् अधिकारिणां मतानुसारं केवलं तदैव आङ्ग्लीयाः देशीयजनतायाः वशीकरणं कर्तुं शक्नुवन्ति तदैव अपरिचितशासकाः निजप्रजासु आदरप्राप्तेः आशां कर्तुं शक्नुवन्ति ।

मदरसा – शिक्षणसंस्थानम् अरबीभाषया मदरसा इति कथ्यते । इदं कथम्भूतः अपि विद्यालयः महाविद्यालयः अथवा किञ्चित् संस्थानं भवितुम् अर्हति ।

चित्रम् 3 – वॉरेनहेस्टिंग्सस्य स्मारकम्, रिचर्ड-वेस्टमाकोटः, 1830, अधुना कलकत्तास्थिते विस्टोरियामेमोरियलमध्ये।

अनेन चित्रेण अवगम्यते यत् भारते ब्रिटिशसत्तायाः विषये प्राच्यवादिनः कथं चिन्तयन्ति स्म। अत्र भवन्तः द्रष्टुं शक्नुवन्ति यत् उपरितमे भागे हेस्टिंग्सस्य भव्यप्रतिमा वर्तते यः प्राच्यवादिनां महान् समर्थकः आसीत्। एतस्याः प्रतिमायाः एकतः पण्डितः अपरतः च अधः उपविष्टः कश्चित् लिपिकः (मुंशी) दृश्यते। हेस्टिंग्सः तथा च अन्ये प्राच्यवादिनः भारतीयविद्वद्भ्यः विभिन्नभारतीयभाषाः शिक्षितुम् इच्छन्ति स्म याः बहुधा ते केवलाः एताः ग्रामभाषाः सन्ति इति मन्यन्ते स्म तथा च एताभ्यः वर्नाकुलर इति नाम यच्छन्ति स्म। स्थानीयरीतीनां परम्पराणां विधीनां च विषये अवगन्तुम् इच्छन्ति स्म तथा च प्राचीनग्रन्थानाम् अनुवादकार्ये व्याख्याने च साहाय्यम् इच्छन्ति स्म। हेस्टिंग्सः आरम्भं कृत्वा कलकत्ताशिक्षणसंस्थानस्य स्थापनाम् अकरोत् तथा च सः विश्वसिति स्म यत् अत्रत्याः प्राचीनाः रीतयः परम्पराः ज्ञानसम्पदा चैव भारते ब्रिटिशशासनस्य आधाररूपेण स्युः इति।



एतत् तथ्यं मनसि निधाय 1781 तमे वर्षे अरबी-फारसी-इस्लामिक-विधेः अध्ययनस्य वर्धापनाय विस्ताराय वा कलकत्तानगरे कस्यचित् विद्यालयस्य (मदरसा) उद्घाटनं कृतम्। 1791 तमे ईस्वीये वर्षे बनारसमध्ये हिन्दुमहाविद्यालयस्य स्थापना कृता यतः तत्र प्राचीनसंस्कृतग्रन्थानां शिक्षणं स्यात् तथा च देशस्य शासने साहाय्यं भवेत् इति।

परन्तु समवायस्य सर्वे अधिकारिणः एतैः विचारैः ऐकमताः न आसन्। एतेषु नैके प्राच्यवादिनां कट्वालोचकाः अपि आसन्।

पूर्वदेशीयानां जघन्यदोषाः –

नवदशशताब्द्याः आरम्भादेव नैके आङ्ग्लाधिकारिणः शिक्षायाः प्राच्यवादिदृष्टेः आलोचनां कर्तुम् आरब्धवन्तः आसन्। तेषां कथनम् आसीत् यत् पूर्वसमाजानां ज्ञानं त्रुटिपूर्णम् अवैज्ञानिकं चास्ति। तेषाम् अनुसारं, पूर्वसाहित्यम् अगम्भीरम् अतलीयं च आसीत्। अतः ते तर्कम् उपस्थापितवन्तः यत् आङ्ग्लीयैः अरबीसंस्कृतभाषायाः साहित्यस्य अध्ययनस्य च विस्ताराय उन्नयनाय च एतावान् धनव्ययः न करणीयः।

प्राच्यवादिनः उद्दिश्य आक्रमणकारिषु जेम्समिलः प्रमुखः आसीत्। तस्य विश्वासः आसीत् यत् आङ्ग्लीयाः देशिजनतायाः तुष्टिकरणाय प्रसन्नतायै वशीकरणाय च जनतायाः इच्छानुगुणं जनानां च भावनाः मनसि निधाय तेषां शिक्षणं न स्यात्। तस्य मतम् आसीत् यत् शिक्षायाः माध्यमेन उपयोगिनां व्यवहारिकाणां च विषयाणां ज्ञानं दातव्यम्। अतः भारतीयानां शिक्षणं पूर्वसमाजस्य काव्यस्य धार्मिकसाहित्यस्य च माध्यनेन शिक्षणम् अकृत्वा पश्चिमदेशैः कीदृशानि वैज्ञानिकानि प्राविधिकानि च साफल्यानि अधिगतानि इत्यस्मिन् विषये करणीयम् इति।

1830 तमदशकपर्यन्तं प्राच्यवादिनां विरोधः अतीव मुखरतया सञ्जातः आसीत्। थामसबैबिंगटनमैकाले एतेषु आलोचकेषु सर्वाधिकमुखरः प्रभावशालिविचारकः आसीत्। सः मन्यते स्म यत् भारतदेशः असभ्यः अस्ति अतः सभ्यतायाः पाठं सः पठेत् इति आवश्यकम् अस्ति।

प्राच्यवादी – एशियाविषयक-भाषायाः संस्कृतेः च गहनज्ञातारः।

लिपिकः - (मुंशी) – एतादृशः जनः यः फारसीभाषायाः पठनं लेखनं पाठनं च जानीयात्।

वर्नाकुलर इति – अयं शब्दः सामान्यतः मानकभाषातः पृथक् कस्याश्चित् स्थानीयभाषायाः प्राकृतभाषायै अथवा प्रादेशिकभाषायै प्रयुज्यते। भारतसदृशेषु औपनिवेशिकदेशेषु आङ्ग्लीयाः दैनन्दिनप्रयोगस्य स्थानीयभाषाणां साम्राज्यवादिशासकानां च भाषायाः आङ्ग्लमध्ये पृथक्तां चिह्नीकरणाय एतस्य शब्दस्य प्रयोगं कुर्वन्ति स्म।

चित्रम् 4 – थॉमस-बैबिंगटन-मैकाले तस्य अध्ययनकक्षः च।

स्रोतः 1

ज्ञानिनां भाषा ?

आङ्ग्लभाषायाः अध्यापनस्य आवश्यकताविषये बलाघातं कर्वन् मैकाले इत्यस्य कथनम् आसीत् –

सर्वे अपि पक्षाः एतस्मिन् तथ्ये ऐकमताः दृश्यन्ते यत् भारतस्य देशीयजनैः सामान्यतया भाष्यमाणासु प्रादेशिकभाषासु न तु साहित्यिकसूचनाः भवन्ति न च वैज्ञानिकसूचनाः एव । एतद् अतिरिच्य, एताः प्रादेशिकभाषाः एतावत्यः दरिद्राः नीरसाः च सन्ति यदि केनापि अन्येन स्रोतसा तासां समृद्धीकरणं न क्रियेत तर्हि कस्यापि मूल्यवत्याः कृतेः अनुवादः अपि तासां प्रादेशिकभाषाणां माध्यमेन न कर्तुं शक्यते ----।

थामसबेबिंगटनमैकॉले, भारतीयशिक्षायाः विषये फरवरीमासस्य द्वितीयदिनाङ्के 1835 तमवर्षे प्रकाशितटिप्पणयः (मिनट्स) इति।

मैकाले इत्यस्य अनुसारं, पूर्वज्ञानस्य काचित् अपि शाखा इङ्ग्लैण्डदेशस्य प्रगतेः समकक्षा न आसीत्। मैकॉले इत्यस्य कथनम् आसीत् यत् "कस्यचित् सुयूरोपीय-पुस्तकालयस्य केवलः कश्चित् एकः भागः एव भारतस्य अरबदेशस्य च समग्रदेशीयसाहित्यस्य समः" अस्ति । तस्य तर्कः आसीत् यत् भारते ब्रिटिशसर्वकारेण प्राच्यवादिज्ञाने सर्वकारीयधनं न नष्टीकरणीयं यतो हि अनेन कश्चित् अपि लाभः न भविष्यति।

ऊर्जस्विलेन आवेशपूर्वकेण च मैकाले इत्यनेन आङ्ग्लभाषाशिक्षणस्य आवश्यकताविषये बलं नियोजितम्। तस्य मतम् आसीत् यत् आङ्ग्लभाषायाः ज्ञानेन भारतीयाः विश्वस्य श्रेष्ठतमानां साहित्यिक-कृतीनाम् अध्ययनस्य अवसरं प्राप्स्यन्ति, अत्रत्याः जनाः पश्चिमविज्ञानस्य दर्शनस्य च क्षेत्रे जातविकासेन सह अपि परिचयं प्राप्स्यन्ति । अनेन प्रकारेण, तस्य कथनम् आसीत् यत् आङ्ग्लाध्यापन-रूपोपायेन जनानां रुचीनां मूल्यानां संस्कृतीनां च परिवर्तनं भवितुं शक्नोति ।

मैकॉले इत्यस्य प्रदत्तविवरणाधारेण 1835 तमवर्षीयः आङ्ग्लीयानां शिक्षाधिनियमः पारितः। अयं निर्णयः अपि गृहीतः आङ्ग्लभाषा उच्चशिक्षायाः माध्यमरूपेण स्यात् तथा च कलकत्ताशिक्षणसंस्थानस्य बनारससंस्कृतमहाविद्यालयसदृशानां प्राच्यवादिसंस्थानां प्रोत्साहनं न स्यात्। "स्वयमेव क्षयं प्रति गच्छन्ति एतादृशानि संस्थानानि अन्धकार-मन्दिराणि इति संज्ञा प्रदेया" अधुना विद्यालयानां कृते अपि आङ्ग्लभाषानिबद्धानां पाठ्यपुस्तकानां मुद्रणम् आरब्धम्।

व्यवसायस्य कृते शिक्षा

1854 तमे वर्षे ईस्ट-इण्डिया-समवायस्य लन्दनस्थितेन कोर्ट आफ डायरेक्टर्स इत्यनेन भारतीय-राष्ट्राध्यक्षाय शिक्षाविषये किञ्चित् पत्रं प्रेषितम्। समवायस्य नियन्त्रकमण्डलस्य अध्यक्षः चार्ल्स-वुडस्य नाम्ना प्रेषितः अयं सन्देशः वुडस्य नीतिपत्रम् (वुड्स डिस्पैच इति) इति नाम्ना ज्ञायते । एतस्मिन् अभिलेखे भारते प्रवर्तमानायाः शिक्षानीतेः रूपरेखायाः स्पष्टीकरणसन्दर्भे पुनरेकदा कथितम् अस्ति यत् प्राच्यवादिनः ज्ञानस्य स्थाने यूरोपीयशिक्षाग्रहणेन कियन्तः व्यवहारिकलाभाः प्राप्तुं शक्यन्ते।

अस्मिन् अभिलेखे यूरोपीयशिक्षायाः कश्चन व्यवहारिकलाभः आर्थिकक्षेत्रस्य विषये संसूचितः अस्ति । तस्यानुसारं, यूरोपीयशिक्षायाः माध्यमेन भारतीयाः व्यापारस्य वाणिज्यस्य विस्तारात् जायमानलाभानाम् अवगमनाय देशस्य च संसाधनानां विकासस्य महत्त्वस्य च अवगमनाय अपि साहाय्यं प्राप्स्यन्ति। यदि भारतीयाः यूरोपीयजीवनशैलीम् अवगमिष्यन्ति तर्हि तेषां रुचीनाम् आकाङ्क्षाणां च अपि परिवर्तनं भविष्यति तथा च ब्रिटिशवस्तूनाम् आवश्यकताविस्तारः अपि भविष्यति यतो हि तदा अत्रत्याः जनाः यूरोपे निर्मितवस्तूनां ग्रहणं क्रयणं तानि च व्यवहारपथम् आनेष्यन्ति।

वुडमहोदयस्य नीतिपत्रे अयम् अपि तर्कः उपस्थापितः आसीत् यत् यूरोपीयशिक्षया भारतीयानां नैतिकचरित्रस्य उत्थानं भविष्यति । अनया ते अतीव सत्यवादिनः सत्यनिष्ठाः चापि भविष्यन्ति तथा च फलतः समवायस्य समीपे विश्वासपात्रकर्मचारिणां न्यूनता अपि न भविष्यति । अभिलेखस्य अनुसारं, पूर्वदेशीयजनानां साहित्यं न केवलं भयानकत्रुटिपूर्णम् एव अस्ति अपि तु इदं न तु कार्यं प्रति दायित्वस्य समर्पणस्य च भावम् उत्पादयितुं शक्नोति न चैव शासनाय आवश्यकनैपुण्यम् एव उत्पादयितुं शक्नोति ।

1854 तमवर्षीयस्य नीतिपत्रस्य अनन्तरम् आङ्ग्लीयैः नैके महत्त्वपूर्णोपायाः उपकल्पिताः । सर्वकारीयशिक्षाविभागानां संस्थापनं कृतं यतः शिक्षासम्बद्धेषु सर्वेषु प्रकरणेषु सर्वकारस्य नियन्त्रणं स्थापयितुं शक्येत । विश्वविद्यालयीयशिक्षा-व्यवस्थायाः विकासाय अपि प्रयासाः प्रकल्पाः च स्थापिताः । 1857 तमे वर्षे यदा मेरठनगरे देहलीनगरे च सैनिकाः विद्रोहं कुर्वन्ति स्म तदा कलकत्ता-मद्रास-मुम्बा-विश्वविद्यालयानां स्थापना क्रियते स्म । विद्यालयीयशिक्षाप्रणाल्याः परिवर्तनस्य अपि प्रयासाः कृताः ।

यूरोपीय-ज्ञानस्य पक्षे कश्चन तर्कः

1854 तमे ईस्वीये वुडस्य नीतिपत्रे प्राच्यवादिज्ञानस्य विरोधिनां निर्णायकविजयस्य सङ्केतः आसीत् । एतस्मिन् कथितम् आसीत् –

अस्माभिः सबलं तथ्यमेतत् प्रतिपादनीयं यत् भारतदेशे वयं यस्याः शिक्षायाः प्रचारम् इच्छामः तस्याः शिक्षायाः लक्ष्यं यूरोपस्य श्रेष्ठतरकलानां सेवानां दर्शनस्य साहित्यस्य अर्थात् यूरोपीयज्ञानस्य प्रसारणम् अस्ति ।

➢ गतिविधिः

कल्पनां कुर्वन्तु यत् भवन्तः 1850 तमदशके जीवन्ति । भवन्तः वुडमहोदयस्य नीतिपत्रस्य (वुड्स-डिस्पैच) विषये श्रुतवन्तः । एतस्मिन् विषये निजप्रतिक्रियाः लिखन्तु ।

चित्रम् 5 – *नवदशशताब्द्यां बम्बयीविश्वविद्यालयः ।*



नैतिकशिक्षायाः अभियाचना

***चित्रम् 6** – स्कॉटलैण्डस्य ख्रिस्तप्रचारकः विलियमकेरे इति यः सेरामपुरमिशन इत्यस्य स्थापनाकार्ये साहाय्यम् अकरोत् ।*

नवदशशताब्द्यां भारते सक्रियाः ख्रिस्तधर्मप्रचारकाः व्यवहारिकशिक्षायाः पक्षे दीयमानतर्काणां घोरविरोधम् अकुर्वन् । प्रचारकाणां मतम् आसीत् यत् शिक्षायाः उद्देश्यं जनानां नैतिकचरित्रस्य संशोधनं भवति तथा च नैतिकतोत्थानं केवलं ख्रिस्तधर्मसम्बद्धायाः शिक्षायाः माध्यमेन एव शक्यते ।

1813 तमवर्षं यावत् ईस्ट-इण्डिया-समवायः भारते प्रचारकगतिविधीनां विरोधी आसीत् । समवायस्य भयम् आसीत् यत् प्रचारकाणां गतिविधिकारणात् स्थानीय-जनताभ्यन्तरे असन्तोषः उत्पत्स्यते तथा च जनाः भारते आङ्ग्लीयानाम् उपस्थितिं सन्देहदृष्ट्या द्रक्ष्यन्ति । ब्रिटिशनियन्त्रणयुक्तेषु भूक्षेत्रेषु निजसंस्थानाम् उद्घाटनं प्रचारकाः न कर्तुं शक्तवन्तः अन्ततः सेरामपुरे निजसंस्थानम् उद्घाटितवन्तः । इदं क्षेत्रं डेनिश-ईस्ट-इण्डिया-समवायस्य नियन्त्रणे आसीत् । 1800 तमे ईस्वीये वर्षे तत्र कस्यचित् मुद्रणालयस्य संस्थापनं कृतं तथा च 1818 तमे वर्षे कस्यचित् महाविद्यालयस्य उद्घाटनं कृतम् ।

नवदशशताब्द्याः काले सम्पूर्णभारते प्रचारकविद्यालयाः उद्घाटिताः । परन्तु 1857 तमवर्षानन्तरं भारतस्य ब्रिटिशसर्वकारः प्रचारकशिक्षायै प्रत्यक्षरूपेण साहाय्यदाने असमर्थतां प्रकटयितुम् आरब्धवान् । सर्वकारः चिन्तयति स्म यत् स्थानीयानां रीतीनां परम्पराणां व्यवहाराणां मूल्यानां मान्यतानां धार्मिकविचाराणां च ह्रासं दृष्ट्वा देशीयजनाः विद्रोहं कर्तुं शक्नुवन्ति ।

***चित्रम्** 7 – कलकत्तानगरस्य नातिदूरे हुगलीनद्याः तटे स्थितः सेरामपुरमहाविद्यालयः ।*

स्थानीयपाठशालानां किम् अभवत् ?

किं भवन्तः जानन्ति यत् आङ्ग्लीयानाम् आगमनात् प्राक् अत्रत्याः बालाः कथं पाठ्यन्ते स्म ? किं भवद्भिः कदाचित् चिन्तितम् अस्ति यत् तस्मिन् काले बालाः विद्यालयम् अपि गच्छन्ति स्म उत नैव इति ? तथा च यदि विद्यालयाः आसन् तर्हि ब्रिटिशशासने तेषां किम् अभवत् ?

चित्रम् 8 – *काचित् ग्राणीणपाठशाला ।*

इदं फ्रांसवां साल्विन-नामकेन डचचित्रकारेण निर्मितं चित्रम् अस्ति । फ्रांसवाः अष्टादशशताब्द्याः उतरार्द्धकाले भारतं प्रति आगतवान् आसीत् । तेन निर्मितेषु चित्रेषु जनानां दैनिकजीवनचित्रणस्य प्रयासः कृतः अस्ति ।

विलियम-एडमस्य समाख्या

1830 तमे दशके स्कॉटलैण्डतः समागतः ख्रिस्तधर्मप्रचारकः विलियम-एडमः बङ्गालस्य बिहारस्य च जनपदानां भ्रमणम् अकरोत् । समवायेन तस्मै कार्यं दत्तम् आसीत् यत् सः देशीयविद्यालयेषु शिक्षायाः प्रगतेः समाख्यां सज्जीकुर्यात् । एडमः यां समाख्यां सज्जीकृतवान् सा रोचिका आसीत् ।

एडमः अवगतवान् यत् बङ्गाले बिहारे च लक्षाधिकपाठशालाः सन्ति । एते अतीव लघुकेन्द्ररूपेण आसन् । येषु सामान्यतः विंशत्यधिकाः विद्यार्थिनः न भवन्ति स्म । पुनरपि, एतासु पाठशालासु अध्येतॄणां बालानां सम्पूर्णसङ्ख्या बहु अधिका प्रायः आविंशतिलक्षाधिका आसीत् । एताः पाठशालाः सम्पन्नजनैः स्थानीयसमुदायेन च सञ्चाल्यन्ते स्म । नैकपाठशालाः स्वयं गुरुभिः एव आरब्धाः आसन् ।

शिक्षायाः प्रकारः अतीव ऋजुः आसीत् । अद्य भवन्तः विद्यालयेषु येषां वस्तूनाम् आशां कुर्वन्ति तेषु कानिचन वस्तूनि तात्कालिकपाठशालासु अपि विद्यमानानि आसन् । विद्यार्थिनाम् अध्यापनशुल्कं निश्चितं नासीत् । मुद्रितपुस्तकानि न भवन्ति स्म, पाठशालाभवनं पृथक् रूपेण न निर्मीयते स्म, उत्पीठिकाः आसन्दिकाः चैव न भवन्ति स्म, श्यामपट्टाः न भवन्ति स्म, पृथक्तया कक्षास्वीकरणस्य विद्यार्थिनाम् उपस्थितिग्रहणस्य चापि कापि व्यवस्था न भवति स्म, वार्षिकपरीक्षायाः नियमितसमयसारणीसदृशाः केऽपि प्रबन्धाः न आसन् । काश्चन पाठशालाः वटवृक्षस्य छायायामेव प्रवर्तन्ते स्म तथा च केचन ग्रामापणस्य मन्दिरस्य कस्मिंश्चित् भागे अथवा गुरुगृहे एव विद्यार्थिनः पाठ्यन्ते स्म । बालानां शुल्कं तेषां पितॄणाम् आयानुसारं निर्धार्यते स्म, धनाढ्यैः अभिभावकैः आधिक्येन निर्धनैः च न्यूनशुल्कं दातव्यं भवति स्म । शिक्षा मौखिकी भवति स्म तथा च किम् अध्यापनीयम् इदं तथ्यं विद्यार्थिनाम् आवश्यकतानुगुणं गुरवः एव निश्चिन्वन्ति स्म । विद्यार्थिनः पृथक् पृथक् कक्षासु न उपावेश्यन्ते स्म । सर्वे विद्यार्थिनः एकस्मिन् स्थाने समवेतरूपेण चैव उपविशन्ति स्म । पृथक् पृथक् स्तरीयैः विद्यार्थिभिः सह गुरवः पृथक्तया व्यवहरन्ति स्म ।

एडमः अवगतवान् यत् इयम् ऋज्वी शिक्षाप्रणाली स्थानीयावश्यकतानां कृते अतीवानुकूला अस्ति । उदाहरणार्थं, सस्यानां कर्तनकाले कक्षाणां पिधानं भवति स्म यतो हि तस्मिन् काले ग्रामीणविद्यार्थिनः प्रायः क्षेत्रेषु कार्यार्थं गच्छन्ति स्म । सस्यकर्तनस्य अन्नादिसञ्चयस्य च अनन्तरं पाठशालायां पुनः अध्ययनाध्यापनप्रक्रिया प्रवर्तते स्म । एतस्याः पद्धत्याः कारणात् साधारणकृषिजीविनां बालाः अपि अध्ययनं कर्तुं शक्नुवन्ति स्म ।

➢ गतिविधिः

1. कल्पनां कुर्वन्तु यत् भवन्तः 1850 तमदशके कस्मिंश्चित् निर्धनकुटुम्बे जन्म प्राप्तवन्तः । अधुना सूचयन्तु यत् सर्वकारद्वारा नियन्त्रितपाठशालानां विषये भवतां विचारः कीदृशः स्यात् ?
2. किं भवन्तः जानन्ति यत् प्राथमिकविद्यालयेषु प्रविष्टेषु बालेषु प्रायः 50 प्रतिशतं बालाः 13-14 वर्षायुः पर्यन्तं विद्यालयान् परित्यक्तवन्तः भवन्ति? किं भवन्तः बोधयितुं शक्नुवन्ति यत् इत्थं कस्मात् कारणात् भवति ?

नवीना दिनचर्या, नवीननियमाः

नवदशशताब्द्याः मध्यकालपर्यन्तं समवायस्य अवधानं मुख्यतः उच्चशिक्षाविषये आसीत् । अतः समवायेन स्थानीयपाठशालानां कार्यविषये आधिक्येन हस्तक्षेपः न कृतः । 1854 तमवर्षात् परं कम्पनीजनाः स्वदेशीशिक्षायाः परिष्काराय निर्णयं कृतवन्तः । समवायजनाः अनुभवन्ति स्म यत् एतदर्थं वर्मतमानव्यवस्थायाः आभ्यन्तरे एव परिवर्तनं कर्तुं शक्यते । कम्पनीजनाः कयाचित् नवीनदिनचर्यया नवीननियमैः नियमितनिरीक्षणैः च पाठशालाः व्यवस्थिताः कर्तुम् इच्छन्ति स्म ।

एतदर्थं किं कर्तुं शक्यते स्म ? समवायाधिकारिणः कीदृशान् प्रयासान् अकुर्वन् ? सर्वादौ तु कम्पन्यधिकारिणः नैकान् पण्डितान् सर्वकारीयवृत्तौ नियोजितवन्तः । एतेषु प्रत्येकं पण्डिताय चतुर्णां पञ्चानां च विद्यालयानां निरीक्षणदायित्वं समर्पितम् आसीत् । पण्डितानां कार्यम् आसीत् यत् ते पाठशालाः गत्वा तत्रत्याध्यापनस्य स्थितीनां संशोधनं कुर्युः । प्रत्येकं गुरुः निर्दिष्टः यत् सः यथाकालं स्वीयस्य विद्यालयस्य विषये समाख्यां दद्यात् कक्षाः च नियमितायाः समयसारण्याः अनुसारं चलेयुः । अधुना अध्यापनं पाठ्यपुस्तकाधारितं भविष्यति अपि च विद्यार्थिनां प्रगतेः समीक्षणाय परिमापनाय च वार्षिकपरीक्षाणां रूपरेखा सज्जीभवितुम् आरब्धा । विद्यार्थिनः उक्ताः यत् ते नियमितरूपेण शुल्कं दद्युः, नियमितरूपेण च कक्षाः प्रति अपि आगच्छेयुः, निश्चितासने उपविशेयुः अनुशासनं च पालयेयुः ।

नवीननियमानुसारं याः पाठशालाः प्रवर्तन्ते स्म ताभ्यः सर्वकारीयानुदानराशिः अपि दीयते स्म । याः पाठशालाः नवीनव्यवस्थाम् अङ्गीकर्तुं सज्जाः न आसन् ताभ्यः सर्वकारीयः साहाय्यराशिः न दीयते स्म । ये गुरवः अध्यापकाः वा सर्वकारीयनिर्देशान् न पालितवन्तः अपि तु स्वतन्त्रतया अध्यापयन्ति स्म तासां पाठशालानां स्थितिः सर्वकारीयपाठशालानाम् अपेक्षा क्रमशः दयनीया जाता ।

एतेषां नवीननियमानां दिनचर्यायाः च कश्चन अयम् अपि दुष्परिणामः जातः यत् पूर्वतनव्यवस्थायां ये निर्धनकृषकाणां बालाः भवन्ति स्म ते अपि गुरुकुलीयपाठशालासु अध्ययनं कर्तुं शक्नुवन्ति स्म यतो हि गुरुकुलीय-पाठशालानां समयः नियमः च समावेशी भवति स्म सः च तेषाम् अनुकूलः आसीत् । परन्तु नवीनव्यवस्थाद्वारा यः अनुशासननियमः प्रवर्तितः तत्र आग्रहः आसीत् यत् बालाः नियमितरूपेण निश्चितसमये च विद्यालयं प्रति आगच्छेयुः इति । अधुना सस्यकर्तनकाले अपि कृषकविद्यार्थिनां विद्यालयगमनम् आवश्यकम् आसीत् अपरञ्च श्रमकाले अपि विपन्नानां श्रमिकजनानां बालाः ये क्षेत्रेषु सस्यकर्तनं निजपितृभिः सह कुर्वन्ति स्म तैः अपि विद्यालयः गन्तव्यः भवति स्म । यदि कश्चन विद्यार्थी विद्यालयं न गन्तुं पारयति स्म तर्हि सः अनुशासनहीनः मन्यते स्म, अर्थात् एतस्य अभिप्रायः अस्ति यत् एतादृशः विद्यार्थी पठितुं न इच्छति इति ।

राष्ट्रिय-शिक्षायाः कार्यसूची

केवलाः आङ्ग्लीयाः अधिकारिणः एव भारते शिक्षाविषये न चिन्तयन्ति स्म । नवदशशताब्द्याः आरम्भिककालात् एव भारतस्य विभिन्नभागीयाः नैके विचारकाः

शिक्षायाः व्यापकप्रसारस्य आवश्यकताविषये सबलं प्रतिपादयन्तः आसन् । यूरोपे जायमानपरिवर्तनैः प्रभावितानां केषाञ्चित् भारतीयानां मतम् आसीत् यत् पश्चिमशिक्षा भारतस्य आधुनिकीकरणं कर्तुं शक्नोति । ते आङ्ग्लीयान् प्रार्थितवन्तः यत् ते नवीनानां विद्यालयानां महाविद्यालयानां विश्वविद्यालयानां च स्थापनां कुर्युः तथा च शिक्षाविषये आधिक्येन धनव्ययीकुर्वन्तु इति । एतस्यां दिशि जातानां केषाञ्चित् प्रयासानां विषये भवन्तः नवमे अध्याये पठिष्यन्ति। परन्तु नैके भारतीयाः पश्चिमशिक्षायाः विरोधिनः आसन्। महात्मगान्धिः रवीन्द्रनाथटैगोरः च इति उभौ तादृशेषु एव विचारकेषु आस्ताम्।

आयान्तु, पश्यामः यत् तेषां किं कथनम् आसीत् ?

आङ्ग्लशिक्षया वयं दासत्वं नीताः

महात्मगान्धिनः कथनम् आसीत् यत् औपनिवेशिकशिक्षा भारतीयानां मस्तिष्केषु हीनतायाः बोधम् अजीजनत्। एतस्याः प्रभाववशात् अत्रत्याः जनाः पश्चिमसभ्यतां श्रेष्ठाम् इति मन्तुम् आरब्धवन्तः तथा च स्वीयसंस्कृतिं प्रति तेषां गौरवभावः नष्टः जातः। महात्मगान्धिः अकथयत् यत् पाश्चात्यशिक्षाव्यवस्था विषपूर्णा पापपूर्णा च अस्ति, अनया भारतीयाः दासीकृताः जनाः च कुप्रभाविताः । तस्य अनुसारं, पश्चिमतः अभिभूताः, पश्चिमतः जायमानस्य प्रत्यकेम् अपि वस्तुनः प्रशंसकाः पाश्चात्यशैलीयुक्तेषु संस्थानेषु च अध्येतारः भारतीयाः ब्रिटिशशासनं च रुच्या ग्रहीतुम् आरब्धवन्तः आसन्। महात्मगान्धिः कस्याश्चित् एतादृश्याः शिक्षायाः पक्षधरः आसीत् यया भारतीयानाम् आभ्यन्तरे प्रतिष्ठायाः स्वाभिमानस्य च भावः पुनरुज्जीवयितुं शक्नुयात्। राष्ट्रियान्दोलनकाले महात्मगान्धिः विद्यार्थिनः आहूतवान् यत् ते पाश्चात्यसभ्यतायुक्तानि शिक्षणसंस्थानानि त्यजेयुः तथा च ते आङ्ग्लीयजनान् सूचयन्तु यत् ते अधुना दासीभवितुं सज्जाः न सन्ति।

महात्मगान्धिनः दृढं मतम् आसीत् यत् शिक्षणं केवलं भारतीयभाषामाध्यमेन एव स्यात्। तस्य अनुसारम्, आङ्ग्लमाध्यमेन प्रदीयमानं शिक्षणं भारतीयान् पङ्गुवत् करोति, पाश्चात्यशिक्षणेन छात्राः स्वीयं सामाजिकपरिवेशं विस्मृतवन्तः तथा च ते "स्वदेशे एव अपरिचिताः" जाताः । महात्मगान्धिनः मतम् आसीत् यत् विदेशिभाषाभाषिणः, स्थानीयसंस्कृतिं प्रति घृणाभावान्विताः आङ्ग्लशिक्षिताः भारतीयाः स्वदेशीयजनतया सह समायोजनं विस्मृतवन्तः।

महात्मगान्धिनः कथनम् आसीत् यत् पश्चिमशिक्षा मौखिकज्ञानं हेयं मत्वा केवलं पठने लेखने च एव केन्द्रिता अस्ति । तत्र पाठ्यपुस्तकानि तु महत्त्वपूर्णानि सन्ति परन्तु जीवनानुभवस्य व्यावहारिकज्ञानस्य च उपेक्षा क्रियते । गान्धिनः तर्कः आसीत् यत् शिक्षया मनुष्यस्य मस्तिष्कम् आत्मा च विकसेत् । तदनुसारं केवलं साक्षरता अर्थात् लेखनपठनकौशलम् एव शिक्षा नास्ति । एतदर्थं तु जनैः शारीरिकश्रमः कौशलार्जनं च करणीयं भवति तथा च अवगन्तव्यं भवति यत् विभिन्नवस्तूनि साधनानि वा कथं कार्यं कुर्वन्ति। अनेन तेषां मस्तिष्कस्य अवगमनक्षमतायाः च विकासः भविष्यति।



चित्रम् 9 - महात्मगान्धिः कस्तूरबा च शान्तिनिकेतने रवीन्द्रनाथटैगोरेण बालिकासमूहेन च सह उपविष्टौ, 1940।

स्रोतः 3

"साक्षरता एव शिक्षा नास्ति"

महात्मगान्धिना लिखितम् आसीत् –

शिक्षा इत्यनेन मम अभिप्रायः अस्ति यत् बालकस्य मनुष्यदेहस्य मस्तिष्कस्य भावनायाः च श्रेष्ठतत्त्वानाम् आविष्करणं स्यात्। साक्षरता न तु शिक्षायाः अन्तिमसोपानम् अस्ति न चैव तस्य आरम्भः । साक्षरता तु केवलं साधनरूपेण अस्ति यस्याः माध्यमेन पुरुषाणां महिलानां च शिक्षणं कर्तुं शक्यते । साक्षरता एव शिक्षा नास्ति । परिणामतः, अहं सर्वादौ बालान् शिक्षयितुं कस्यचित् हस्तकौशलस्य प्रशिक्षणं दास्यामि तथा च आरम्भिककालात् एव तेषां कस्यचित् उपयोगिनः हस्तकौशलस्य रचनाधर्मितायाः प्रशिक्षणं करिष्यामि । मम मतम् अस्ति यत् मस्तिष्कस्य आत्मनः च सर्वोच्चविकासः एतादृशशिक्षया एव सम्भवति । प्रत्येकं हस्तकौशलस्य प्रशिक्षणम् अद्य इव केवलं यान्त्रिकप्रकारेण एव नैव अपि तु वैज्ञानिकरूपेण अपि स्यात्, अर्थात् बालः प्रत्येकं प्रक्रियायाः हेतून् उपयोगिताः च जानीयात्।

द कलैक्टिड वर्क्स ऑफ महात्मा गान्धिः, खण्डः 72, पृ.79

यथा यथा राष्ट्रियभावनायाः प्रसारः अभवत्, नैके अपरे विचारकाः अपि कस्याश्चित् एतादृश्याः राष्ट्रियशिक्षाप्रणाल्याः विषये चिन्तयितुम् आरब्धवन्तः या आङ्ग्लीयस्थापितव्यवस्थायाः सम्पूर्णतया भिन्ना स्यात्।

टैगोरस्य "शान्तिनिकेनतम्"

भवत्सु नैकानि मित्राणि शान्तिनिकेनतस्य विषये श्रुतवन्ति स्युः। किं भवन्तः जानन्ति यत् एतस्य स्थापना केन किमर्थं च कृता आसीत् ?

रवीन्द्रनाथटैगोरः एतस्याः संस्थायाः स्थापनां 1901 तमे ईस्वीये वर्षे अकरोत् । टैगोराय बाल्ये विद्यालयगमनं न रोचते । तत्र तस्य श्वासावरोधः जायते स्म । विद्यालयवातावरणं दमनकारि अस्ति इति सः अनुभवति स्म। टैगोरः इत्थम् अनुभवति स्म यत् विद्यालयः कारागारवत् स्यात्, यतो हि तत्र बालाः यथेष्टं न कदापि कर्तुं शक्नुवन्ति स्म । यदा अपरे बालकाः शिक्षकं शृण्वन्ति स्म तदा टैगोरस्य मनः अन्यत्र एव भ्रमति स्म।

चित्रम् 10 – शान्तिनिकेतने काचित् कक्षा प्रवर्तते,1930 तमदशकम्।

पार्श्वस्थं वातावरणं पश्यन्तु, सर्वत्र वृक्षाः मुक्तस्थानं च अस्ति।

कलकत्तानगरीये विद्यालये ये तस्य बाल्यानुभवाः आसन् तैः टैगोरस्य विचाराः अतीव प्रभाविताः। यदा सः युवकः सञ्जातः तदा सः एतादृशस्य विद्यालयोद्घाटनस्य सञ्चालनस्य च विषये अचिन्तयत् यत्र बालाः सदैव प्रसन्नाः स्युः यत्र च ते

मुक्ताः रचनाशीलाः च स्युः । यत्र बालाः निजविचारान् आकाङ्क्षाः च अवगन्तुं शक्नुयुः इति । टैगोरः अनुभवति स्म यत् बाल्यकालः स्वतन्त्रतया विषयावगमनस्य कालः भवेत् । बाल्यकालः आङ्ग्लीयैः स्थापितायाः शिक्षाव्यवस्थायाः दृढस्य बन्धनकारिणः च अनुशासनात् मुक्तः स्यात् । शिक्षकाः कल्पनाशीलाः स्युः, बालानां विषये च ज्ञातवन्तः स्युः येन बालानाम् अन्तर्मनसि विद्यमानायाः उत्सुकतायाः अवगमनेच्छायाः च विकासे साहाय्यं कुर्युः । टैगोरस्य अनुसारं, वर्तमानविद्यालयाः बालस्य रचनाशीलतायाः आश्चर्यप्राकट्य-प्रवृत्तेः च तेषां स्वाभाविकगुणं नाशयन्ति ।

टैगोरस्य चिन्तनम् आसीत् यत् सृजनात्मक-शिक्षायाः विकासः तस्य प्रोत्साहनं च केवलं प्राकृतिकपरिवेशे एव कर्तुं शक्यते । अतः सः कलकत्तामहानगरतः शतं किलोमीटर-परिमित-दूरं कस्मिंश्चित् ग्रामीणपरिवेशे निजविद्यालयोद्घाटनस्य निर्णयम् अकरोत् । तत् ग्रामीणस्थलं निर्मलं शान्तिपूर्णं (शान्तिनिकेतनम्) च अस्ति इति तेन अनुभूतं यत्र प्रकृतेः सान्निध्ये निवसन्तः बालाः स्वीयायाः स्वाभाविक-सृजनात्मक-मेधायाः विकासं कर्तुं शक्नुवन्ति स्म ।

बहुषु विषयेषु टैगोरः महात्मगान्धिः च शिक्षायाः विषये न्यूनाधिक्येन सदृशचिन्तनं दधतः स्म । परन्तु द्वयोः मध्ये पार्थक्यम् अपि आसीत् । गान्धिः पश्चिमसभ्यतायाः पाश्चात्यैः विकसितयन्त्राणां प्रविधेः प्रौद्योगिक्याः च उपासनायाः प्रखरालोचकः आसीत् । टैगोरः आधुनिक-पाश्चात्य-सभ्यतायाः भारतीय-परम्परायाः च श्रेष्ठतत्त्वानां सम्मिश्रणम् इच्छति स्म । सः शान्तिनिकेतने कला-संगीत-नृत्यादिभिः सह विज्ञानस्य प्रौद्योगिक्याः च शिक्षाविषये अपि बलाघातम् अकरोत् ।

अनेन प्रकारेण, नैके जनाः एतस्मिन् विषये चिन्तयितुम् आरब्धवन्तः आसन् यत् कस्याश्चित् राष्ट्रियशिक्षाप्रणाल्याः प्रारूपं किं स्यात् ? इत्येतादृशं चिन्तनम् आरब्धम् । केचन जनाः आङ्ग्लीयैः स्थापितायां व्यवस्थायां परिवर्तनम् इच्छन्ति स्म । तेषां मतम् आसीत् यत् आङ्ग्लीय-व्यवस्थायाः प्रसारः तेन प्रकारेण स्यात् येन बहुशः जनाः अध्ययनावसरं प्राप्तुं शक्नुयुः । एतद्विपरीतं, नैके विचारकाः एतादृशाः अपि आसन् ये तत्र कामपि वैकल्पिकव्यवस्थाम् इच्छन्ति स्म यतः जनाः यथार्थरूपेण राष्ट्रियसंस्कृतेः शिक्षां प्राप्तुं शक्नुयुः । कः निर्धारयेत् यत् वास्तविकार्थे राष्ट्रियः इति कः भवति ? एतस्याः "राष्ट्रियशिक्षा-सम्बद्धा-चर्चा स्वतन्त्रतायाः अनन्तरम् अपि यथावत् प्रावर्तत ।

चित्रम् 11 – कोयम्बटूरस्य कस्मिंश्चित् प्रचारकविद्यालये क्रीडन्तः बालाः, विंशतितमशताब्द्याः प्रारम्भः ।

नवदशशताब्द्याः मध्यकालपर्यन्तं ख्रिस्तधर्मप्रचारकाः भारतीय-संशोधक-सङ्घटनानि च बालिकानां कृते विद्यालयान् उद्घाटयितुम् आरम्भं कृतवन्तः आसन् ।

अन्यत्र –

सभ्यान् कर्तुं शिक्षा

1870 तमे ईस्वीये वर्षे शिक्षाधिनियमस्य प्रवर्तनकालपर्यन्तं सामान्यतः सम्पूर्णजनसंख्याकृते व्यापकशिक्षाव्यवस्था न आसीत् । बालश्रमः व्यापकपरिमाणेन जायते स्म अतः निर्धनाः स्वीयान् बालान् विद्यालयान् प्रति न प्रेषयितुं शक्नुवन्ति स्म । कुटुम्बस्य भरणाय पोषणाय च अभिभावकानाम् आयः अतीव न्यूनः आसीत् अतः आजीविकायै श्रमः अतीव महत्त्वपूर्णः आसीत् । विद्यालयाः अपि अत्यल्पाः आसन् । स्थापितविद्यालयेषु अधिकाः चर्चद्वारा अथवा सम्पन्नवर्गेण स्थापिताः आसन् । शिक्षाधिनियमस्य प्रवर्तनानन्तरं सर्वकारः नवीनविद्यालयानाम् उद्घाटनम् आरब्धवान् तथा च अनिवार्यशिक्षायाः प्रावधानं कृतम् ।

टॉमस-आरनाल्डः तात्कालिकेषु महत्त्वपूर्णतमेषु शैक्षणिकविचारकेषु कश्चन आसीत् । सः रग्बीनामकस्य व्यक्तिगतविद्यालयस्य अध्यापकः आसीत् । माध्यमिकविद्यालयस्य पाठ्यचर्चायां 2000 वर्षपुरातनग्रीकरोमनशास्त्रीयकृतीनां विस्तृताध्ययनस्य अनुशंसां कुर्वन् सः अकथयत् –

अहं सदैव इत्थम् अनुभूतवान् यत् अस्माकम् आङ्ग्लीयविद्यालयेषु यः अध्यापनक्रमः अनुपाल्यते तस्य श्रेष्ठविषयः अयम् अस्ति यत् सः अस्माकं मस्तिष्कं निरन्तरम् अतीतविषये चिन्तयितुं प्रेरयति । प्रतिदिनं वयं भाषाः इतिहासं किञ्चिद्वर्षपूर्वान् पुरातनविचारान् च पठन्तः भवामः ... ।

आरनॉल्डस्य मतम् आसीत् यत् शास्त्रीयकृतीनाम् अध्ययनेन मस्तिष्कम् अनुशासितं भवति । वास्तविकतायां तात्कालिकानां अधिकतरशिक्षाविदां मतम् आसीत् यत् एतादृशम् अनुशासनं बहु आवश्यकम् अस्ति, यतः बालाः स्वाभाविकरूपेण असभ्याः भवन्ति तथा च तेषां नियन्त्रणं नियमनं वा आवश्यकम् अस्ति । सभ्य-वयस्कस्य रूपेण तेषां विकासाय तेषाम् अवगमनं स्यात् यत् समाजे उचितम् अनुचितं च किम् अस्ति, समुचितम् अनुचितं च आचरणं किं भवति । शिक्षायाः, विशेषतया बालानां मस्तिष्कस्य अनुशासिकायाः शिक्षायाः उद्देश्यं ते उचितमार्गानुसरणं कुर्वन्तु इति आसीत् ।

किं भवन्तः वक्तुं शक्नुवन्ति यत् एतादृशविचारैः इङ्ग्लैण्डदेशे निर्धनेषु उपनिवेशेषु च "देशिजनतायाः" शिक्षासम्बद्धचिन्तनं कथं प्रभावितं स्यात् ?

आयन्तु कल्पनां कुर्मः

कल्पनां कुर्वन्तु यत् आङ्ग्लीयशिक्षाविषये महात्मगान्धिनः मैकॉलेवर्यस्य च मध्ये चर्चा प्रवर्तते भवन्तः च तां चर्चां सावधानेन शृण्वन्ति । भवन्तः एकेन पृष्टेन लिखन्तु यत् द्वौ किं कथयतः ।

पुनः स्मरन्तु –

1. निम्नलिखितस्य युग्मं रचयन्तु –

विलियमजोन्सः	आङ्ग्लीयशिक्षायाः प्रोत्साहनम्
रविन्द्रनाथटैगोरः	प्राचीनसंस्कृतीनां सम्मानः
टॉमस-मैकाले	गुरुः
महात्मगान्धिः	प्राकृतिक-परिवेशे शिक्षा
पाठशालाः	आङ्ग्लीयशिक्षायाः विरोधिनः

2. निम्नलिखितेषु उचितम् अनुचितं वा सूचयन्तु –

(क) जेम्समिलः प्राच्यवादिनां घोरालोचकः आसीत्।

(ख) 1854 तमवर्षस्य शिक्षासम्बद्ध-संप्रेषणे एतत् तथ्यं सबलं प्रतिपादितं यत् भारते उच्चशिक्षायाः माध्यमः आङ्ग्लः स्यात्।

(ग) महात्मगान्धिः मन्यते स्म यत् साक्षरतावर्धनम् एव शिक्षायाः महत्त्वपूर्णतमम् उद्देश्यम् अस्ति।

(घ) रवीन्द्रनाथटैगोरः अनुभवति स्म यत् बालानां दृढतया अनुशासनं स्यात्।

आयान्तु, विचारं कुर्मः –

3. विलियमजोन्सः कस्मात् कारणात् इत्थं मन्यते स्म यत् भारतीयस्य इतिहासस्य दर्शनस्य विधेः च अध्ययनम् आवश्यकम् अस्ति ?
4. जेम्समिलः टॉमसमैकाले च इत्थं कस्मात् चिन्तयन्तौ आस्तां यत् भारते यूरोपीयशिक्षा अनिवार्या अस्ति ?
5. महात्मगान्धिः बालान् हस्तकौशलं किमर्थं प्रशिक्षयितुम् इच्छति स्म ?
6. महात्मगान्धिः इत्थं किमर्थं चिन्तयति स्म यत् आङ्ग्लीयशिक्षया भारतीयाः दासीकृताः सन्ति ?

आयान्तु कृत्वा पश्यामः

7. निजगृहस्य वृद्धजनान् पृच्छन्तु यत् ते तात्कालिके विद्यालये कान् विषयान् पठितवन्तः आसन् ?
8. निजविद्यालयस्य पार्श्वस्थस्य च कस्यचित् अन्यविद्यालयस्य इतिहासं जानन्तु।

॥ इति अष्टमः पाठः ॥

9 महिलाः, जातिः संशोधनं च

किं भवन्तः कदाचित् चिन्तितवन्तः यत् द्विशतात् वर्षेभ्यः पूर्वं बालानां जीवनं कथम् आसीत् ? अद्यत्वे मध्यम-वर्गीय-कुटुम्बिनां बालिकाः बाहुल्येन विद्यालयं गच्छन्ति तासु च बालिकासु नैकाः बालकैः सममेव पठन्ति अर्थात् समावेशिरूपेण अध्ययनं कुर्वन्ति । तासु बालिकासु वयस्कासु जातासु सतीसु नैकाः महाविद्यालयेषु विश्वविद्यालयेषु च अध्ययनं कुर्वन्ति तथा च विविधवृत्तीः च कुर्वन्ति । वैधानिकरूपेण विवाहार्थं ताः वयस्काः अवश्यमेव स्युः, विध्यनुसारं ताः कस्यापि जातेः समुदायस्य च पुरुषेण विवाहं कर्तुं शक्नुवन्ति किञ्च विधवाः महिलाः अपि पुनर्विवाहं कर्तुं शक्नुवन्ति । पुरुषाः इव महिलाः अपि मतदानाय अधिकृताः सन्ति, नैर्वाचनिक-प्रक्रियायाम् अपि ताः भागं ग्रहीतुं शक्नुवन्ति । परन्तु, निःसन्देहं सर्वाः महिलाः एतादृशानाम् अधिकाराणाम् उपभोगं प्रयोगं वा न कर्तुं शक्नुवन्ति । विपन्नाः अतीव काठिन्येन एव शिक्षाप्राप्तेः अवसरान् प्राप्नुवन्ति, क्वचित् ते न्यूनावसरान् प्राप्नुवन्ति क्वचित् च अवसरान् एव न प्राप्नुवन्ति । नैकेषु कुटुम्बेषु बालिकाः स्वीयायाः इच्छायाः अनुसारं पतिम् अपि न परिणेतुं शक्नुवन्ति ।

चित्रम् 1 – सती, बालथाजर-सॉल्विन-द्वारा रचितं चित्रम्, 1813 ।

भारतं प्रति आगन्तुकैः यूरोपीयचित्रकारैः रचितेषु सती इत्यस्याः नैकेषु चित्रेषु इदम् अपि किञ्चन अस्ति । सतीप्रथा पूर्वसमाजानां नृशंसतायाः प्रमाणरूपेण मन्यते स्म ।

द्विशतात् वर्षेभ्यः पूर्वं स्थितिः वर्तमानापेक्षया सर्वथा भिन्ना आसीत् । अधिकतर बालानां विवाहसंस्कारः अल्पवयसि एव क्रियते स्म । हिन्दु-मुस्लिम-धर्मयोः पुरुषाः एकाधिकपत्नीः वोढुं शक्नुवन्ति स्म । देशस्य केषुचित् भागेषु विधवाभ्यः अपेक्षा क्रियते स्म यत् ताः निजपत्युः चितया सह एव सजीवाः ज्वलेयुः । इत्थं स्वेच्छया बलपूर्वकं च हताः महिलाः "सती" इति जाताः इत्थं उक्त्वा तासां महिममण्डनं क्रियते स्म । " सती" इत्यस्य शब्दस्य अर्थः एव सदाचारिणी महिला इति आसीत् । सम्पत्तौ अपि महिलानाम् अधिकाराः अतीव सीमिताः आसन् । शिक्षां यावत् महिलानां प्राप्तिः प्रायः न आसीत् । देशस्य बहुषु भागेषु जनानां विश्वासः आसीत् यत् यदि महिला साक्षरा अधीतविद्या वा भविष्यति तर्हि सा शीघ्रमेव वैधव्यदोषेण ग्रस्ता भविष्यति ।

समाजे केवलः स्त्रीणां पुरुषाणां च मध्ये एव भेदः नासीत् । अधिकतरक्षेत्रेषु जनाः जातिदृष्ट्या अपि विभक्ताः आसन् । ब्राह्मणाः क्षत्रियाः च आत्मानम् उच्चजातीयाः वयम् इति मन्यन्ते स्म । तदनन्तरं वाणिज्य-महाजनादि-सम्बद्ध-जातीनां स्थानम् आसीत् (महाजन – प्रायः वैश्यः इति उच्यते स्म) । पुनः कृषक-तन्तुवाय-कुम्भकार-सदृशाः शिल्पकाराः परिगण्यन्ते स्म (ये प्रायः शूद्राः इति उच्यन्ते स्म) । एतस्मिन् श्रेणीक्रमे निम्नतमाः एतादृशाः जातयः आसन् याः ग्रामाणां नगराणां च स्वच्छताकार्यं कुर्वन्ति स्म अथवा एतादृशानि कर्माणि कुर्वन्ति स्म यानि कर्माणि उच्चजातीयाः जनाः दूषितकार्याणि मन्यन्ते स्म अर्थात् एतादृशानि कार्याणि येषां कारणात् तेषां जातिः पतिता भ्रष्टा वा भवति स्म । उच्चजातीयाः जनाः निम्नसोपाने अवस्थितान् एतादृशजातीयान् अस्पृश्यान् मन्यन्ते स्म । नीचजनाः मन्दिराणि सवर्णजातीयैः प्रयुज्यमानकूपान् जलस्रोतांसि च जलार्थं न प्रवेष्टुं शक्नुवन्ति स्म । असूचितजातीयः निम्नमनुष्यः अस्ति इति मन्यते स्म ।

एकोनविंशतितमस्य विंशतितमस्य च शताब्द्याः काले एतेषु अधिनियमेषु नैके अधिनियमाः नैकाः दृष्टयः च कालक्रमेण परिवर्तिताः । आयान्तु, पश्यामः यत् इत्थं कथम् अभवत् ।

परिवर्तनदिशि जायमानाः उपक्रमाः प्रयासाः वा

एकोनविंशति-शताब्द्याः आरम्भिककालात् एव वयं सामाजिकीनां रीतीनां परम्पराणां तथा च सामाजिकानां मूल्यानां मतानां च सम्बद्धचर्चाः विचारगोष्ठी-कार्यक्रमाणां च परिवर्तमान-स्वरूपं पश्यामः । एतस्य किञ्चन विशिष्टकारणम् इदम् आसीत् यत् सञ्चारस्य नवीनोपायाः विकसन्तः आसन् । प्रथमवारं पुस्तकानि वार्त्तापत्राणि पत्रिकाः प्रचारपत्राणि पुस्तिकाः च प्रकाश्यन्ते स्म । एतानि प्रचारवस्तूनि न केवलं पुरातन-साधनानाम् अपेक्षया न्यूनमूल्यानि आसन् अपि तु पाण्डुलिपीनाम् अपेक्षया अधिकजनाः अपि एतादृशसामग्रीं प्राप्तुं शक्नुवन्ति स्म येषां विषये भवन्तः सप्तमकक्ष्यायां पठितवन्तः सन्ति । परिणामतः, सामान्यजनाः अपि तां पाठ्यसाग्रमीं पठितुं शक्नुवन्ति स्म । तेषु पाठकेषु नैके जनाः स्वीयमातृभाषामाध्यमेन एव लेखितुं शक्नुवन्ति स्म, स्वीयविचारान् चापि प्रकटयितुं शक्नुवन्ति स्म । नवीननगरेषु सर्वविधान् सामाजिकान् आर्थिकान् धार्मिकान् च विषयान् आधारीकृत्य चर्चाः पुरुषाणां मध्ये क्वचिच्च महिलानां मध्ये अपि प्रवर्तन्ते स्म । एताः चर्चाः सामान्यजनतां यावत् अपि प्राप्तुं शक्नुवन्ति स्म तथा च सामाजिक-परिवर्तनस्य आन्दोलनसम्बद्धाः भवन्ति स्म ।

एतादृश्यः चर्चाः प्रायः भारतीय-संशोधकेषु संशोधकसंघटनेषु च भवन्ति स्म । राजा राममोहनरॉयः (1772-1883) एतादृशः एव कश्चन संशोधकः आसीत् । सः कलकत्तायां ब्रह्मो-सभायाः नाम्नः कस्यचित् संशोधकसंघट्टनस्य स्थापनाम् अकरोत् (यत् अनन्तरकाले ब्रह्मो-समाज-नाम्नः प्रसिद्धं जातम्) । राममोहनरॉयसदृशाः जनाः, संशोधकाः इति एतस्मात् उच्यन्ते स्म यतो हि तेषां मतम् आसीत् यत् सामाजिकीनां रूढिवादि-धारणानां परिवर्तनं स्यात् तथा च अन्यायपूर्णाभ्यः रीतीभ्यः मुक्तिः अवश्यमेव स्यात् । तेषां विचारः आसीत् यत् एवंविधं परिवर्तनम् आनेतुं जनाः एतत्तथ्यं प्रति प्रेरणीयाः यत् ते पुरातनव्यवहारं परित्यज्य नवीनजीवनशैलीम् अङ्गीकर्तुं सज्जाः स्युः ।

➢ गतिविधिः

किं भवन्तः बोधयितुं शक्नुवन्ति यत् यदा पुस्तकानां वार्त्तापत्राणां प्रचारपत्राणां च प्रकाशनस्य मुद्रणस्य च प्रविधेः अभियान्त्रिक्याः च आविष्कारः न जातः आसीत्, तदा सामाजिकीनां रीतीनां परम्पराणां सामाजिक-व्यवहाराणां च विषये कथम्भूताः चर्चाः जाताः ?

चित्रम् 2 – राजा राममोहनरॉयः, रेमब्रांटपीलद्वारा रचितं चित्रम्, 1833.

राममोहनरायः एतस्य विषयस्य पक्षधरः आसीत् यत् देशे पश्चिमशिक्षायाः प्रचारः स्यात् महिलानां च कृते अधिकस्वतन्त्रतायाः समानतायाः च अवसराः स्युः इति। एतस्मिन् सन्दर्भे अलिखत् यत् कथं महिलाः गृहसम्बद्धकार्येषु बलात् नियोज्यन्ते स्म, महिलाजीवनं गृहे पाकशालायां चैव सीमितं कृतम् आसीत् महिलाः अपि गृहात् बहिर्भागं गत्वा अध्येतुं शक्नुयुः इत्येतादृशी आज्ञा तासां कृते न दीयते स्म।

विधवाजीवने परिवर्तनम् आनेतुं क्रियमाणः प्रयासः

राममोहनरायः विधवामहिलाः स्वीये जीवने महान्ति कष्टानि सोढुं बाध्याः सन्ति इति एतस्याः कुपरम्परायाः कारणात् अतीव दुःखी आसीत्। एतत् तथ्यं मनसि निधाय सः सतीप्रथां विरुध्य आन्दोलनम् आरब्धवान्।

राममोहनरायः संस्कृतस्य फारसीभाषायाः नैकासां च भारतीयानां यूरोपीयानां च भाषाणां सुविज्ञः आसीत्। स्वलेखनमाध्यमेन सः एतत् प्रमाणीकर्तुं प्रयासम् अकरोत् यत् प्राचीनग्रन्थेषु विधवानां पतिना सह प्रज्वालनस्य कुत्रापि निर्देशः नास्ति। यथा भवन्तः सप्तमे अध्याये पठितवन्तः, एकोनविंशतितमशताब्द्याः आरम्भिककालपर्यन्तं नैके आङ्ग्लीयाधिकारिणः अपि भारतीयपरम्पराणां रीतीनां च आलोचनां कर्तुम् आरब्धवन्तः आसन्। राजा-राममोहनरायस्य चिन्तनं समीचीनम् अस्ति इति आङ्ग्लीयाः अपि मन्यन्ते स्म, यतः हि राजाराममोहनरायस्य कस्यचित् विद्वद्जनस्य रूपेण प्रतिष्ठा आसीत्। परिणामतः, 1829 तमे वर्षे सतीप्रथा प्रतिबन्धिता।

राममोहनरायः एतादृशस्य अभियानस्य कृते यां रणनीतिम् अङ्गीकृतवान् तामेव नीतिम् अनन्तरकालिकाः संशोधकाः अपि अङ्गीकृतवन्तः। यदा अपि ते काम् अपि हानिप्रदप्रथायाः समक्षे आह्वानं प्रस्तोतुम् इच्छन्ति स्म तदा प्रायः ते प्राचीनधार्मिकग्रन्थेभ्यः तादृशं श्लोकं वाक्यं वा उद्धर्तुं प्रयत्नं कुर्वन्ति स्म यः श्लोकः तेषां चिन्तनस्य समर्थकः स्यात् इति। तदनन्तरं ते तर्कम् उपस्थापयन्ति स्म यत् सम्बद्धा वर्तमानरीतिः प्रारम्भिकपरम्परायाः विरुद्धा अस्ति।



चित्रम् 3 – लोहग्रहण्याः माध्यमेन दोलनस्य पर्व।

एतस्मिन् लोकप्रिये उत्सवे भक्ताः पारम्परिकानुष्ठानानाम् अन्तर्गतं विचित्रप्रकारकस्य कष्टानि सहनस्य प्रयासं कुर्वन्ति स्म। ते स्वचर्मणि ग्रोहग्रहणीं संस्थाप्य कस्मिंश्चित् दोलने लम्बन्ते स्म। एकोनविंशतिशताब्द्याः पूर्वार्द्धे यदा यूरोपीयाधिकारिणः अवदन् यत् भारतीयरीतयः अनुष्ठानानि च नृशंसतापूर्णानि सन्ति इति उक्त्वा तेषाम् आलोचनाम् आरब्धवन्तः तदा एतादृशस्य उत्सवस्य विशेषतया आलोचना कृता।

स्रोतः 1

" आदौ वयं ताः काष्ठैः बध्नीमः"

राममोहनरायः स्वीयविचारान् प्रसारयितुं नैकानि प्रचारपत्राणि अलिखत् । तेषु केचन कस्याश्चित् विशिष्टरीतेः समर्थकाः आसन् तथा च आलोचकानां मध्ये चर्चाविषयरूपेण अपि आसन् । सतीप्रथायाः किञ्चन उदाहरणं पश्यन्तु –

सतीसमर्थकानां चिन्तनम्

महिलाः प्राकृतिक-रूपेण मन्दमतयः, दृढसंकल्पहीनाः, अविश्वसनीयाः च भवन्ति । -- तेषु नैकाः स्वयमेव निजपत्युः मरणानन्तरं तेन सह प्राणत्यागं कामयन्ते, परन्तु ताः क्वचित् प्रज्वलिताग्नेः बहिः धावनं न कुर्युः अतः वयं ताः आदौ एव चिताकाष्ठैः दृढतया बध्नीमः ।

सतीप्रथायाः विरोधिनः –

भवादृशैः जनैः महिलानां कृते तादृशः अवसरः एव न प्रदत्तः यत्र ताः स्वीयायाः स्वाभाविकाभिक्षमतायाः प्रदर्शनं कर्तुं शक्नुयुः इति ? पुनः भवन्तः कथम् इत्थं वक्तुं शक्नुवन्ति यत् ताः मन्दमतयः भवन्ति ? यदि ज्ञानस्य शिक्षायाः च प्राप्तेः परमपि कश्चित् जनः बोधं न प्राप्नोति अथवा अध्यापितविषयान् न ग्रहीतुं शक्नुयात् तर्हि वयम् इत्थं मन्तुं शक्नुमः यत् सः अक्षमः अस्ति इति, परन्तु यदि भवन्तः महिलानां कृते अवसरम् एव न दास्यन्ति तर्हि एतस्यां स्थितौ किं भवन्तः ताः हीनतराः वक्तुं शक्नुवन्ति ?

➢ गतिविधिः

एते संवादाः 175 वर्षेभ्यः अपि पुरातनाः सन्ति । भवन्तः अपि स्वीये परिवेशे महिलानां महत्त्वस्य अभिक्षमतानां च विषये विविधतर्कान् श्रुतवन्तः स्युः । पश्यन्तु यत् तेषु कालिकेषु वर्तमानकालिकेषु तर्केषु च का भिन्नता जाता ?

उदाहरणार्थं प्रसिद्धसंशोधकः ईश्वरचन्द्रविद्यासागरः अपि विधवाविवाहस्य पक्षे प्राचीनग्रन्थानाम् एव उद्धरणं समुपस्थापितवान् । आङ्ग्लसर्वकारेण तस्य अयं परामर्शः अङ्गीकृतः तथा च 1856 तमे वर्षे विधवाविवाहस्य पक्षे कश्चित् अधिनियमः पारितः । ये विधवाविवाहस्य विरोधिनः आसन् ते विद्यासागरस्य अपि विरोधम् अकुर्वन् तथा च तस्य बहिष्कारम् अपि कृतवन्तः ।

एकोनविंशतितमशताब्द्याः उत्तरार्धकालपर्यन्तं विधवाविवाहस्य पक्षे सञ्चालितान्दोलनं देशस्य अन्यभागेषु अपि प्रसृतम् आसीत् । मद्रासप्रेजीडेंसी इत्यस्य तेलुगुभाषिक्षेत्रेषु वीरेशलिंगमपंतुलुः विधवाविवाहस्य समर्थकस्य कस्यचित् सङ्घट्टनस्य स्थापनाम् अकरोत् । प्रायः तस्मिन् एव काले मुम्बानगर्याम् अपि युवबुद्धिजीविनः समाजसंशोधकाः च अपि विधवाविवाहस्य प्रचारस्य प्रसारस्य संकल्पं गृहीतवन्तः । उत्तरे आर्यसमाजस्य संस्थापकः स्वामिदयानन्दसरस्वती अपि विधवाविवाहस्य समर्थनम् अकरोत् ।

ततः परम् अपि विधवाविवाहकर्त्रीणां महिलानां संख्या अतीव न्यूना आसीत् । विवाहकर्त्र्यः विधवाः समाजे सरलतया न स्वीक्रियन्ते स्म । इत्थं, रूढिवादिजनाः एतस्य नवीनाधिनियमस्य विरोधम् अकुर्वन् ।

चित्रम् 4 – स्वामिदयानन्दसरस्वती ।

दयानन्दः 1875 तमे ईस्वीये वर्षे आर्यसमाजस्य स्थापनाम् अकरोत् । आर्यसमाजेन हिन्दुधर्मसंशोधनस्य प्रयासः कृतः आसीत् ।

चित्रम् 5- ईश्वरचन्द्रविद्यासागरः

बालिकाः विद्यालयं प्रति गन्तुम् आरभन्ते –

नैके संशोधकाः अनुभवन्ति स्म यत् महिलानां दशायाः परिवर्तनाय बालिकानां प्रशिक्षणम् आवश्यकम् अस्ति।

कलकत्तामहानगरे विद्यासागरः मुम्बानगर्यां च नैके अन्ये संशोधकाः बालिकानां कृते विद्यालयान् उद्घाटितवन्तः । एकोनविंशतितमशताब्द्याः मध्यकाले यदा एतादृशाः प्रारम्भिकविद्यालयाः उद्घटिताः तदा नैके जनाः तेभ्यः विभ्यति स्म । जनानां भीतिः आसीत् यत् विद्यालयसंस्थापकाः बालिकाः गृहात् निष्कास्य विद्यालयं प्रति नेष्यन्ति तथा च बालिकाभ्यः गृहसम्बन्धिकार्याणि कर्तुम् अवसरं न दास्यन्ति । विद्यालयं प्रति गन्तुं बालिकाभिः सार्वजनिकस्थलानि अतिक्रम्य गन्तव्यं भवति स्म । नैके जनाः अनुभवन्ति स्म यत् बहिर्गमनेन बालिकाः सुसंस्कारच्युताः भविष्यन्ति । स्त्रीविरोधिजनानां मतम् आसीत् यत् बालिकाः सार्वजनिकस्थानेभ्यः दूरे एव स्थापनीयाः । फलतः, एकोनविंशतितम-शताब्द्यां याः अधीतमहिलाः सन्ति तासाम् अध्यापनं तेषाम् उदारहृदयाः पितरः पतयः चैव निजसमक्षे गृहे एव कृतवन्तः । किं भवन्तः स्मरन्ति यत् गतवर्षीये सामाजिकराजनैतिकजीवनम् इत्यस्मिन् पुस्तके भवन्तः राशसुन्दरीदेब्याः विषये किं पठितवन्तः आसन् ? सा एतादृशीसु महिलासु आसीत् या रात्रौ दीपकप्रकाशे गुप्तरूपेण लेखनं पठनं च ज्ञातवती आसीत्।

एकोनविंशतितम-शताब्द्याः उत्तरार्द्धस्य अन्तिमे भागे आर्यसमाजद्वारा पञ्जाबराज्ये ज्योतिरावफुलेद्वारा च महाराष्ट्रे बालिकानां कृते विद्यालयाः समुद्घाटिताः।

उत्तरभारते कुलीनानां यवनकुटुम्बानां महिलाः अरबीभाषामाध्यमेन कुरानशरीफं पठितुम् आरब्धवत्यः। तासाम् अध्यापनाय गृहे एव शिक्षिकानां नियुक्तिः क्रियते स्म । एतां स्थितिं पश्यन् मुमताजालीसदृशाः केचन संशोधकाः कुरानशरीफस्य गद्यांशान् प्रमाणरूपेण उपस्थाप्य अवदत यत् महिलाः अपि शिक्षायाः अधिकारं प्राप्नुयुः इति । एकोनविंशतितमशताब्द्याः अन्तिमकालात् एव उर्दुमाध्यमेन उपन्यासलेखनस्य प्रक्रमः आरब्धः । उपन्यासमाध्यमेन महिलाः एतत् तथ्यं प्रति प्रेर्यन्ते स्म यत् ताः धर्मस्य गृह्यकार्यस्य गृहसज्जादिकस्य च विषये पठेयुः।

चित्रम् 6 – हिन्दुमहाविद्यालयस्य छात्राः, 1875.

एकोनविंशतितमशताब्द्यां यदा बालिकानां कृते विद्यालयानाम् उद्घाटनं कृतं तदा सामान्यतः एवं मन्यते स्म यत् बालिकानां पाठ्यक्रमः बालकानां पाठ्यक्रमस्य अपेक्षया सरलतरः स्यात् । हिन्दुमहिलाविद्यालयः एतादृशेषु आरम्भिकसंस्थानेषु एतादृशः विद्यालयः आसीत् यत्र बालकानां बालिकानां च शिक्षापद्धतिः समाना आसीत्।

महिलानां विषये महिलाः लेखितुम् आरब्धवत्यः -

विंशितितमशताब्द्याः आरम्भिककालात् एव नैकाः मुस्लिममहिलाः महिलासम्बद्ध-शिक्षायाः अभिवृद्धये महत्त्वपूर्णयोगदानं कृतवत्यः । यथा – भोपालस्य राजपत्न्यः अलीगढे बालिकानां कृते प्राथमिकविद्यालयान् संस्थापितवत्यः । राजपत्नी रुकैयासखावतहुसैनः अपि तात्कालिका प्रभावशालिनी महिला आसीत् या कलकत्तायां पटनायां च

मुस्लिमबालिकानां कृते विद्यालयान् समुद्घाटितवती । सा रूढिवादिविचाराणां कुट्वालोचिका आसीत् तथा च तस्याः मतम् आसीत् यत् प्रत्येकं धर्मस्य धार्मिकनेतारः महिलाः निम्नाः सन्ति इति मतवन्तः ।

1880 तमवर्षस्य आरम्भात् किञ्चित् पूर्वं भारतीयमहिलाः विश्वविद्यालयान् प्रवेष्टुम् आरब्धवत्यः आसन् । तासु काश्चन चिकित्सिकाः काश्चन च शिक्षिकाः जाताः । नैकाः महिलाः लेखान् लेखितुम् आरब्धवत्यः तथा च ताः समाजे महिलानां स्थितिविषये आलोचनात्मक-विचारान् प्रकाशितवत्यः । पूनायां गृहे एव स्थित्वा शिक्षाप्राप्तकर्त्री ताराबायी-शिन्देवर्या स्त्रीपुरुषतुलना-नामकं पुस्तकं प्रकाशितवती यत्र पुरुषाणां महिलानां च मध्ये विद्यमान-सामाजिक-भिन्नतानाम् आलोचना कृता आसीत् ।

संस्कृतस्य परमविदुषी रमाबायी मन्यते स्म यत् हिन्दुधर्मः महिलानां दमनं करोति ।

चित्रम् 7 – पण्डिता रमाबायी ।

पण्डिता रमाबायी उच्चजातीयहिन्दुमहिलानां दुर्दशा इति विषयम् अवलम्ब्य किञ्चन पुस्तकम् अलिखत् । सा पूनानगरे कस्यचित् विधवागृहस्य स्थापनां कृतवती तत्र तादृशीनां महिलानां कृते आश्रयः प्रदीयते स्म याः श्वशुरगृहजनानाम् अत्याचारेण ग्रस्ताः भवन्ति स्म । विधवागृहे महिलानां कौशलविकासः क्रियते स्म येन ताः अपि स्वीयाजीविकायाः अर्जनं कर्तुं सक्षमाः भवेयुः इति ।

स्पष्टम् अस्ति यत् एतादृशैः कृत्यैः रूढिवादिजनाः अतीव क्रोधाविष्टाः जाताः । उदाहरणार्थम् – नैके हिन्दुराष्ट्रवादिनः अनुभवितुम् आरब्धवन्तः आसन् यत् हिन्दुमहिलाः पाश्चात्याचरणम् अङ्गीकुर्वन्त्यः सन्ति यतः हिन्दुसंस्कृतिः भ्रष्टाः भविष्यति तथा च कौटुम्बिक-संस्काराः नष्टाः भविष्यन्ति । रूढिवादिनः मुस्लिमजनाः अपि एतादृश-परिवर्तन-परिणामान् दृष्ट्वा चिन्तिताः आसन् ।

यथा भवन्तः द्रष्टुं शक्नुवन्ति, एकोनविंशतितमशताब्द्याः अन्तिमकालपर्यन्तं स्वयं महिलाः अपि संशोधनानां कृते बाहुल्येन प्रयासं कर्तुम् आरब्धवत्यः आसन् । ताः पुस्तकानि लिखितवत्यः, पत्रिकाः प्रकाशितवत्यः, विद्यालयानां प्रशिक्षणकेन्द्राणां च उद्घाटनं कृतवत्यः महिलाः च सङ्घीकृतवत्यः । विंशतितमशताब्द्याः आरम्भिककालात् एव प्रबुद्धमहिलाः महिलानां मताधिकारार्थं श्रेष्ठस्वास्थ्यसौविध्यार्थं शिक्षायाः अधिकारार्थं च अधिनियमान् कारयितुं राजनैतिकप्रभावसमूहान् संस्थापयितुम् आरब्धवत्यः आसन् । तासु काश्चन महिलाः 1920 तमदशकात् परं विभिन्नप्रकारकेषु राष्ट्रवादिषु समाजवादिषु च आन्दोलनेषु अपि भागं गृहीतवत्यः ।

विंशतितमशताब्द्यां, जवाहरलालनेहरु-सुभाषचन्द्रबोस-सदृशाः नेतारः महिलानां कृते अधिकायाः स्वतन्त्रतायाः समानतायाः च सम्बद्धाभ्यर्थनानां समर्थनं कृतवन्तः । राष्ट्रियनेतारः आश्वासनं दत्तवन्तः यत् स्वतन्त्रतायाः प्राप्तेः समनन्तरं सर्वेषां पुरुषाणां सर्वासां च महिलानां कृते मतदानस्य अधिकारः प्रदास्यते । तेषाम् आह्वानम् आसीत् यत् यावत्पर्यन्तं स्वतन्त्रता न लभ्यते तावत्पर्यन्तं महिलाः आङ्ग्लीयशासनं विरुध्य क्रियमाणे सङ्घर्षे भागं गृहीत्वा तत्र सहयोगं कुर्युः इति ।

स्रोतः – 2,

यदा महिलायाः पतिः म्रियते --- स्वीये स्त्रीपुरुषतुलना-नामके पुस्तके ताराबायीशिन्दे अलिखत् –

यावान् रागः पुरुषां जीवने अस्ति किं तथैव महिलानां नास्ति ? अर्थात् तथैव अस्ति । भवन्तः तु इत्थं चिन्तयन्ति यत् यथा महिलाः पुरुषाणाम् अपेक्षया भिन्नपदार्थैः निर्मिताः सन्ति, कल्प्यतां ताः महिलाः धूलिना अयोमलवता लौहेन पाषाणपट्टिकया च निर्मिताः स्युः, भवन्तः भवतां जीवनं च शुद्धसुवर्णेन इति । भवन्तः मां पृच्छन्ति यत् भवत्याः कः अभिप्रायः ? मम अभिप्रायः अयम् अस्ति यत् यदा महिलायाः पतिः मरणं प्राप्नोति--- तदा महिलायाः का गतिर्भवति ? नापितः आयाति तस्याः लम्बमानस्य दीर्घकेशयुक्तस्य शिरसः मुण्डनं करोति, केवलं भवतां नेत्रसुखाय तत् कृत्यं भवेत् । विधवा महिला विवाहोत्सवेभ्यः माङ्गलिककार्यक्रमेभ्यः शुभावसरेभ्यः च बहिष्क्रियते यत्र विवाहितमहिलाः भागं गृह्णन्ति । तथा च एतादृशानां प्रतिबन्धानां किं कारणम् अस्ति ? यतः तस्याः पतिः मृत्युं प्राप्तवान् । सः अभागिनी अस्ति – दुर्भाग्यरेखा तस्याः मस्तिष्के लिखिता । तस्याः मुखं न दर्शनीयम् अशुभं च तत् भवति ।

ताराबायीशिन्दे, स्त्रीपुरुषतुलना ।

बालविवाहस्य विरोधिनः अधिनियमाः

महिला-सङ्घटनानां विकासस्य महिलासम्बद्धविषयान् आधारीकृत्य च जायमानस्य लेखनस्य कारणात् संशोधनानां पक्षे स्वरः मुखरितः जातः । जनाः बालविवाहसदृशानां स्थापितपरम्पराणां पुरतः आह्वानं स्थापयितुम् आरब्धवन्तः । केन्द्रीयविधानसभायां नैके सांसदाः आसन् ये बालविवाहस्य प्रतिबन्धः स्यात् इत्यर्थम् अधिनियमं संरचयितुं सङ्घर्षं कृतवन्तः । 1929 तमे वर्षे बालविवाहनिषेधाधिनियमः पारितः । एतस्य अधिनियमस्य विषये तथाविधाः प्रचण्डचर्चाः सङ्घर्षाः च न अभवन् यथा पुरातनसंशोधन-अधिनियमानां विषये जाताः आसन् । एतस्य अधिनियमस्य अनुसारम् अष्टादशवर्षोनस्य बालकस्य षोडशवर्षोनकन्यायाः च विवाहः न कर्तुं शक्यते स्म । अनन्तरकाले, इदं वयः वर्धयित्वा क्रमशः एकविंशतिवर्षं बालकस्य बालिकायाः च अष्टादशवर्षं विवाहार्थं निर्धारितं जातम् ।

चित्रम् 8 – अष्टौ वर्षीया वधूः

इदं विंशतितमशताब्द्याः आरम्भे कस्याश्चित् बालवध्वाः चित्रम् अस्ति । किं भवन्तः जानन्ति यत् अद्य अपि अस्माकं देशे विंशतिप्रतिशतात् अधिकानां बालिकानां विवाहसंस्कारः वयसः अष्टादशवर्षेभ्यः पूर्वम् एव भवति ?

जातिः समाजसंशोधनं च

अस्माभिः अधुना यावत् येषां समाजसंशोधकानां वर्णनं कृतम् अस्ति तेषु नैके जातीयाधारेण जायमानायाः असमानतायाः अपि विरोधिनः आसन् । राममोहनरायः जातिव्यवस्थायाः आलोचकस्य कस्यचित् पुरातन-बौद्ध-ग्रन्थस्य अनुवादकार्यम् अकरोत् । प्रार्थनासमाजः भक्तिपरम्परायाः समर्थकः आसीत् यत्र सर्वेषां जातीयजनानां कृते आध्यात्मिकसमानता भवेत् इति विषये सबलं कथ्यते स्म । जातिप्रथायाः उन्मूलनाय कार्यार्थं मुम्बानगर्यां 1840 तमे वर्षे परमहंसमण्डल्याः स्थापना जाता । एतेषां संशोधनकानां संशोधनकसङ्घटनानां च सदस्येषु नैके उच्चजातीयाः जनाः आसन् । गुप्तगोष्ठीषु एते संशोधकाः भोजनस्य स्पर्शादिकस्य च सन्दर्भेषु जातीयनियमानाम् उल्लङ्घनं कुर्वन्ति स्म यतः स्वीयजीवने अपि जातीयपूर्वाग्रहेभ्यः बन्धनेभ्यः च मुक्तिं प्राप्तुं शक्नुयुः इति ।

बहवः जनाः एतादृशाः आसन् ये जातेः आधारितसमाजव्यवस्थायां जायमानस्य अन्यायस्य विरोधिनः आसन् । एकोनविंशतितमशताब्द्यां ख्रिस्तधर्मप्रचारकाः आदिवासिसमुदायस्य निम्नजातीयजनानां बालेभ्यः विद्यालयानाम् उद्घाटनं कर्तुम् आरब्धवन्तः आसन् । इत्थम् एते बालाः अपि परिवर्तमानसंसारे स्वीयजीवनार्थं मार्गान् अन्वेष्टुं नवीनसाधनानि प्राप्नुवन्ति स्म ।

तस्मिन् एव काले नैके निर्धनजनाः नगरेषु प्राप्यमाणवृत्तेः अवसराणाम् अन्वेषणार्थं ग्रामान् परित्यज्य नगराणि प्रति गच्छन्ति स्म । नवीनासु शिल्पशालासु नगरपालिकासु च वृत्तेः अवसराः लभ्यन्ते स्म । षष्ठे अध्याये भवन्तः नगराणां विस्तारस्य विषये पठितवन्तः सन्ति ।

कल्पनां कुर्वन्तु यत् अनेन श्रमं कर्तुं कियन्तः अवसराः जाताः स्युः । नगरेषु नालिकाः निर्मातव्याः आसन्, राजमार्गाणां निर्माणं करणीयम् आसीत्, भवनानि निर्मातव्यानि आसन्, नगरेषु स्वच्छताव्यवस्था कल्पनीया आसीत् । अतः एतदर्थं श्रमिकाणां, खननकर्तॄणां, भारवोढॄणां, इष्टिकानिर्मातॄणां, नालिकानां स्वच्छतायै कार्यकर्तॄणां, स्वच्छताकर्मिणां, शिविकावोढॄणां, त्रिचक्रिकाचालकानां च आवश्यकता आसीत् । एतादृशं श्रमं कर्तुम् अवसरः कुतः समायातः ? उपर्युक्तानि एतादृशानि कार्याणि कर्तुं ग्रामाणाम् उपनगराणां च निर्धनाः नगराणि प्रति गन्तुम् आरब्धवन्तः यत्र श्रमस्य अवसराः जायन्ते स्म । नगरं प्रति गच्छत्सु नैके निम्नजातीयाः जनाः आसन् । केचन जनाः असम-मॉरिशस-त्रिनीदाद-इण्डोनेशियादि-स्थानानि प्रतिगतवन्तः तत्र च ते उद्यानेषु कार्यं कर्तुम् आरब्धवन्तः । नवीनस्थलेषु कार्यं प्रायः अतीव कठिनं भवति स्म । परन्तु पुनरपि निर्धनाः, निम्नजातीयाः च जनाः ग्रामेषु सवर्णभूस्वामिभिः दासीकृताः भवन्ति स्म तथा च दैनिकापमानम् अपि तेषां क्रियते स्म तादृशस्थितेः तु मुक्तये कश्चन अवसरः अयम् अस्ति इति ते निर्धनजनाः चिन्तयित्वा कार्यार्थं नवीनस्थलानि प्रति गतवन्तः ।

चित्रम् 9 – कश्चन श्रमिक-पोतः, एकोनविंशतितमशताब्दी ।

जॉन-एलेन-नामकेन अनेन श्रमिकपोतद्वारा भारतीयश्रमिकाः मॉरिशसं प्रति नीयन्ते स्म यत्र तैः विविधानि कठोरकार्याणि करणीयानि भवन्ति स्म । एतेषु नैके श्रमिकाः निम्नजातीयाः भवन्ति स्म ।

कः उपानहां निर्माणं कर्तुं शक्नोति ?

चर्मकाराः परम्परागतरूपेण निम्नदृष्ट्या अवलोक्यन्ते यतः ते मृतपशूनां चर्म निष्कासयन्ति ये अशुद्धाः दूषिताः च सन्ति इति मन्यन्ते । प्रथमविश्वयुद्धकाले सेनार्थम् उपानहां पर्याप्तावश्यकता जाता आसीत् । परन्तु चर्मकार्यं प्रति जातीयपूर्वाग्रहाणां कारणात् केवलाः परम्परागताः चर्मकाराः चर्मशिल्पकाराः च एव उपानहां निर्माणं कर्तुं शक्नुवन्ति स्म । परिणामतः, एतदर्थं ते अधिकं धनं याचितुम् आरब्धवन्तः तस्मात् ते अधिकधनलाभं प्राप्तवन्तः ।

चित्रं 10 – उपानहां निर्माणं कुर्वन्तः मदिगासमुदायस्य जनाः, एकोनविंशतितमशताब्दी, आन्ध्रप्रदेशः ।

वर्तमाने आन्ध्रप्रदेशे मदिगा इति काचित् महत्त्वपूर्णा अस्पृश्यजातिः आसीत् । मदिगाजातीयाः जनाः पशु-शवानां संशोधनस्य चर्मनिर्माणस्य पादरक्षा-पादत्राणादि-सीवनस्य च कर्मणि कुशलाः आसन् ।

एतदतिरिच्य भिन्नप्रकारकाः वृत्तेः अवसराः अपि दृग्गोचराः भवन्ति स्म । उदाहरणार्थं सेनायाम् अपि जनानाम् आवश्यकता वर्धिता आसीत् । अस्पृश्याः एते महारसमुदायिनः सन्ति इति मन्यमानाः महारजनाः महाररेजीमैण्ट इत्यस्मिन् वृत्तिं प्राप्तवन्तः । दलितान्दोलनस्य नेता बी.आर. अम्बेडकरस्य पिता कस्मिंश्चित् सैनिकविद्यालये एव पाठयति स्म ।

कक्षायां स्थानं नास्ति

बम्बयी-प्रेजीडेंसी इत्यस्मिन् 1829 तमे वर्षे अपि अस्पृश्यजनानां कृते सर्वकारीयविद्यालयान् प्रवेष्टुम् अवसरः न दीयते स्म । यदा ते एतस्य अधिकारस्य विषये दृढतया उद्घोषणाम् अकुर्वन् तदा तेषां कृते निश्चितं यत् ते कक्षायाः बहिर्भागे विद्यमाने आलिन्दे उपविश्य पठितुं शक्नुवन्ति इति निर्दिष्टं यतः प्रकोष्ठः दूषितः न स्यात् यत्र उच्चजातीयाः बालाः पाठ्यन्ते स्म ।

चित्रम् 11 – गुर्जरप्रान्तस्य दुबलासमुदायस्य जनाः विपण्यर्थम् आम्रफलानि वोढ्वा गच्छन्ति । दुबलाश्रमिकाः सवर्णभूस्वामिनां सान्निध्ये श्रमं कुर्वन्ति स्म । तेषां क्षेत्राणां संरक्षणं कुर्वन्ति स्म भूस्वामिनः च गृहसम्बद्धानि लघूनि दीर्घाणि च कार्यं सम्पादयन्ति स्म ।

➢ गतिविधिः

1. कल्पनां कुर्वन्तु यत् भवन्तः विद्यालयस्य आलिन्दे उपविश्य पाठ्यमानविषयं शृण्वन्ति । तदा भवतां मनस्सु कीदृशाः प्रश्नाः समुदेष्यन्ति ।
2. सर्वथा शिक्षायाः अप्राप्तेः अपेक्षया अस्पृश्यजनानां कृते इयं स्थितिः समीचीनतरा अस्ति इति केचन जनाः अनुभवन्ति स्म । किं भवन्तः एतादृशविचारेण सहमताः सन्ति ?

समानतायाः न्यायस्य च याचना,

एकोनविंशतितमशताब्द्याः उत्तरार्द्धकालं यावत् अब्राह्मणजातीयानाम् आभ्यन्तरात् अपि जनाः जातीयभेदभावं विरुध्य ध्वनिं मुखरीकर्तुम् आरब्धवन्तः । ते सामाजिक-समानतां न्यायं च याचन्तः आन्दोलनानि आरब्धवन्तः आसन् ।

मध्यभारते सतनामी इत्यस्य आन्दोलनस्य आरम्भः घासीदासः अकरोत्, यः चर्मकारान् सङ्घीकृतवान् तेषां च सामाजिकस्थितेः संशोधनाय आन्दोलनम् आरब्धवान् । बङ्गालस्य पूर्वभागे हरिदासठाकुरस्य मतुआपंथेन चाण्डाल-कृषिजीविनां मध्ये कार्यम् अकरोत् । हरिदासेन तेषां जातिवादिनां ब्राह्मणवादिनां च ग्रन्थानां विषये प्रश्नः समुपस्थापितः । यत् अद्य वर्तमानकेरलम् इति उच्यते , तत्र ऐझावा इत्यस्याः जातेः श्रीनारायणगुरुः स्वीयजनानां पुरतः ऐक्यस्य आदर्शं समुपस्थापितवान् । सः जातिगतभिन्नतायाः आधारेण जनेषु व्यापृतस्य भेदभावस्य विरोधम् अकरोत् । तदनुसारं समग्र-मानवतायाः एका एव जातिः अस्ति । तस्य महत्त्वपूर्णं कथनम् आसीत् – "ओरु जाति, ओरु मतम्, ओरु दैवम मनुष्यानु" (मानवतायाः एका जातिः, एकः धर्मः, एकः ईश्वरः च इति) ।



चित्रम् 12 – श्रीनारायणगुरुः

एतादृशानां सर्वेषां पन्थानां स्थापना एतादृशाः जनाः कृतवन्तः आसन् ये अब्राह्मणजातीयाः आसन् तथा च तन्मध्ये एव कार्यं कुर्वन्ति स्म । ते तासां प्रवृत्तीनाम् उपायानां च परिवर्तनस्य प्रयासं कृतवन्तः ये प्रभुत्वशालिजातीयानाम् अपमानाय प्रेरयन्ति स्म । ते अधीनस्थजातीयेषु स्वाभिमानभावस्य जागरणाय प्रयासम् अकुर्वन् ।

दासता (गुलामगीरी)

चित्रम् 13 - ज्योतिरावफुले।

"निम्नजातीय" नेतृषु ज्योतिरावफुलेवर्यः सर्वेषु प्रभावशालि-नेतृषु कश्चित् आसीत्। 1827 तमे वर्षे लब्धजन्मा सः ख्रिस्तधर्मप्रचारकैः सञ्चालित-विद्यालयेषु शिक्षां प्राप्तवान्। प्रौढे जाते सति तेन जात्याधारित-समाजे प्रसृतस्य अन्यायस्य विषये स्वीयविचाराः प्रकटिताः। आर्यत्वात् ब्राह्मणाः अन्येभ्यः श्रेष्ठाः सन्ति इत्येतादृशं ब्राह्मणैः साधिकारं कथ्यमानं विषयम् उद्दिश्य फुलेवर्यः क्रूरव्यङ्ग्यम् अकरोत्, फुलेमहोदयस्य तर्कः आसीत् यत् आर्याः वैदेशिकाः आसन्, ये उपमहाद्वीपस्य बाह्यभागात् आगताः आसन् तथा च अत्रत्य-वास्तविक-स्वामिनः पराजित्य तान् च दासीकृतवन्तः। यदा आर्याः निजप्रभुत्वं स्थापितवन्तः तदा तेषां दृष्टौ पराजितजनता निम्ना, निम्नजातीया च अस्ति इति ते घोषितवन्तः तथैव च आचरितवन्तः। फुलेमहोदयस्य अनुसारम् उच्चजातीयानां तेषां भूमौ सत्तायां च कश्चित् अपि अधिकारः नास्ति , इयं धरणी, अत्रत्य-देशि-जनानां,कथित-निम्नजातीय-जनानाम् अस्ति।

फुलेवर्यः साधिकारम् अकथयत् यत् आर्याणां शासनात् प्राक् अत्र स्वर्णयुगम् आसीत्। तदा योद्धारः कृषकाः च भूमिं योक्त्रयन्ति स्म तथा च मराठाजनाः नगरस्य न्यायसङ्गत-निष्पक्षरूपेण च शासनं कुर्वन्ति स्म। फुलेवर्यः परामृष्टवान् यत् शूद्रैः (श्रमिकजातीयैः) अतिशूद्रैः (अस्पृश्यैः) च जातीय-भेदभावस्य समाप्तये सङ्घी-भवितव्यम्। फुलेद्वारा स्थापितेन सत्यशोधक-समाज इति नामकेन सङ्घटनेन जातीय-समानतायाः समर्थनाय आन्दोलनं सञ्चालितम्।

स्रोतः – 3

"अहम् अत्र त्वं च तत्र"

फुलेवर्यः उच्चजातीयनेतृणाम् उपनिवेशवादविरोधिनः राष्ट्रवादस्य अपि आलोचकः आसीत्। सः अलिखत् –

ब्राह्मणाः स्वीयधर्म-सम्बद्धां ताम् असिम् अधुना गोपितवन्तः यया ते जनानां सम्पन्नतां नाशितवन्तः तथा च अधुना देशस्य ते महान्तः देशभक्ताः भूत्वा भ्रमणं कुर्वन्तः सन्ति। अधुना ते अस्माकं शूद्रकूले मुस्लिमसमुदाये पारसिधर्मे च जात-युवकान् परामृशन्ति—यत् यदि वयं निम्नोच्चविषयकं विवादं समाप्य सङ्घीभविष्यामः तर्हि एव अस्माकं देशः उन्नतिं प्राप्स्यति --- । इदम् ऐक्यं तेषाम् एव हिताय अस्ति यतः तदनन्तरं पुनः इयमेव स्थितिः उत्पत्स्यते--- अहम् अत्र त्वं च तत्र इति।

ज्योतिरावफुलेवर्यः, काश्तकार की चाबुक (शेतकयाचा आसूड)

➢ गतिविधिः

तृतीयं स्रोतसं सावधानं पश्यन्तु। "अहम् अत्र त्वं च तत्र" इत्यनेन ज्योतिरावफुलेवर्यस्य कः आशयः आसीत्?

1873 तमे वर्षे फुलेवर्यः गुलामगीरी (दासता) इति नामकं पुस्तकम् अलिखत्। एतस्मात् प्रायः दशवर्षेभ्यः पूर्वम् अमेरिकीयं गृहयुद्धं जातम् आसीत् यतः अमेरिकायां दासप्रथा समाप्तिं नीता आसीत्। फुले स्वीयं पुस्तकं तेभ्यः सर्वेभ्यः अमेरीकीयजनेभ्यः

स्रोतः – 4 –

"वयम् अपि मनुष्याः स्मः"

1927 तमे वर्षे अम्बेडकरः अवदत् –

अधुना वयं केवलम् एतत् प्रमाणीकर्तुं तडागं गन्तुम् इच्छामः यत् अन्यैः इव वयम् अपि मनुष्याः स्मः ...। हिन्दुसमाजस्य समानता जातिवादस्य च समाप्तिः इत्येतौ द्वौ सिद्धान्तौ आधारीकृत्य पुनर्संघटनं भवेत् ?

समर्पितवान्, ये दासतातः मोचनाय सङ्घर्षं कृतवन्तः आसन् । अनेन प्रकारेण फुलेवर्येण भारतस्य निम्नजातीय-जनानाम् अमेरिकीय-कृष्णवर्णीयदासानां च दुर्दशा परस्परं समायोजिता ।

यथा अनेन उदाहरणेन ज्ञायते, फुलेवर्यः जातिव्यवस्थासम्बद्धां सर्वविधालोचनां असमानतया सह योजितवान् आसीत् । सः उच्चजातीयमहिलानां दुर्दशायाः श्रमिकाणां समस्यानां निम्नजातीयजनानां च अपमानपूर्णस्थितेः विषये बहु चिन्तितः आसीत् । जातीयसंशोधनस्य इदम् आन्दोलनं विंशतितमशतशताब्द्याम् अपि पश्चिमभारते डॉ.बी. आर.अम्बेडकरस्य दक्षिणभारते च ई.वी.रामास्वामिनायकसदृशानां महतां दलितनेतॄणां च नेतृत्वे अजस्रम् अचलत् ।

मन्दिराणि कः प्रवेष्टुं शक्नोति स्म ?

अम्बेडकरः कस्मिंश्चित् महारकुटुम्बे जातः आसीत् । बाल्ये सः एतं विषयं समीपतः दृष्टवान् आसीत् यत् दैनिकजीवने जातीयभेदभावः पूर्वाग्रहः च किं भवति । विद्यालये तेन कक्षायाः बाह्यभागे भूमौ एव उपवेष्टव्यं भवति स्म । सवर्णबालाः येन नलेन जलं पिबन्ति स्म तेन एव सः जलं न पातुं शक्नोति स्म । विद्यालयीयाध्ययनं समाप्य उच्चाध्ययनार्थम् अमेरिकादेशं गन्तुं सः छात्रवृत्तिं प्राप्तवान् आसीत् । 1919 तमवर्षे सः पुनः ततः भारतं प्रत्यागतवान् तदा सः समकालिकसमाजे उच्चजातीयभावस्य सत्तासंरचनायाः विषये बह्वधिकम् अलिखत् ।

1927 तमे वर्षे अम्बेडकरः मन्दिरप्रवेशान्दोलनम् आरब्धवान् तस्मिन् महारजातेः जनाः व्यापकसंख्यया भागं गृहीतवन्तः । अर्चकाः ब्राह्मणाः एतादृशम् आन्दोलनं दृष्ट्वा अतीव क्रुद्धाः जाताः यत् दलिताः अपि मन्दिरजलाशयात् जलम् आहरन्ति ।

1927 तमवर्षात् प्रभृतिः 1935 तमवर्षाभ्यन्तरे अम्बेडकरः मन्दिराणि प्रवेष्टुम् एतादृशम् आन्दोलनत्रयं सञ्चालितवान् । सः सम्पूर्णदेशस्य जनतां दर्शयितुम् इच्छति स्म यत् समाजे जातीयपूर्वाग्रहाणां प्रभावः कियान् दृढः अस्ति ।

चित्रम् 14 – मदुरैमन्दिरस्य प्रवेशद्वारम्, टॉमसडेनियलद्वारा रचितं चित्रम्, 1792 .

मन्दिरप्रवेशान्दोलनात् प्राक् "अस्पृश्याः" एवंविधानां प्रवेशद्वाराणां सन्निकटे न स्थातुं शक्नुवन्ति स्म ।

अब्राह्मण-आन्दोलनम्

विंशतितमशताब्द्याः आरम्भे अब्राह्मणान्दोलनम् आरब्धम् । आन्दोलनस्य अयं प्रयासः तेषाम् अब्राह्मणजातीयानाम् आसीत् ये शिक्षां धनं प्रभावं च प्राप्तवन्तः आसन् । तेषां तर्कः आसीत् यत् ब्राह्मणास्तु उत्तरभागात् समागतानां तेषाम् आर्य-आक्रमणकारिणां वंशजाः सन्ति ये अत्रत्यमूलनिवासिनः देशिद्रविडजातीयान् पराजित्य दक्षिणभूभागे विजयं प्राप्तवन्तः आसन् । ते सत्तायां ब्राह्मणवादिनः साधिकारकथनस्य समक्षे अपि आह्वानं प्रस्तुतवन्तः ।

पेरियार इति नाम्नः प्रसिद्धः ई.वी.रामास्वामिनायकरः कस्मिंश्चित् मध्यमवर्गीये कुटुम्बे जन्म प्राप्तवान् । स्वीये प्रारम्भिके जीवने सः सन्यासी आसीत् तथा च सः संस्कृतशास्त्राणां गभीरतया अध्ययनं कृतवान् आसीत् । अनन्तरकाले सः काङ्ग्रेसदलस्य सदस्यतां गृहीतवान्, परन्तु यदा सः राष्ट्रवादिभिः आयोजिते कस्मिंश्चित् प्रीतिभोजे अपश्यत् यत् जात्यनुसारं तत्र जनानाम् उपवेशनस्य व्यवस्था कृता अस्ति तर्हि हताशः सन् सः काङ्ग्रेसदलं परित्यक्तवान् । एतस्मिन् प्रीतिभोज-कार्यक्रमे निम्नजातीयानाम् उच्चजातीयानां च कृते पृथक् पृथक् उपवेशनस्य व्यवस्था कृता आसीत् । पेरियारः अवगतवान् आसीत् यत् अस्पृश्यजनैः तेषां स्वाभिमानाय स्वयं सङ्घर्षः करणीयः भविष्यति । एतत् एव तथ्यं मनसि निधाय सः स्वाभिमानान्दोलनस्य आरम्भम् अकरोत् । तस्य कथनम् आसीत् यत् मूल-तमिल-द्रविड-संस्कृत्योः यथार्थवाहकाः अस्पृश्याः इति कथ्यमानाः जनाः एव सन्ति तान् च ब्राह्मणाः अधीनस्थान् अकुर्वन् । तस्य मतम् आसीत् यत् सर्वे धार्मिकनेतारः प्रमुखाः च सामाजिकविभाजनानि असमानताः च ईश्वरप्रदत्तं मन्यन्ते अतः सामाजिकसमानतार्थं सर्वधर्मभ्यः अस्पृश्यैः स्वयं मुक्तिः प्राप्तव्या भविष्यति ।

पेरियारः हिन्दुवेदपुराणानां च प्रचुरालोचकः आसीत् । विशेषतया मनुद्वारा रचितसंहितायाः, भगवद्गीतायाः रामायणस्य च कट्वालोचकः आसीत् । तस्य कथनम् आसीत् यत् ब्राह्मणाः निम्नजातीयेषु निजसत्तां स्थापयितुं महिलासु पुरुषप्रभुत्वं च स्थापयितुम् एतादृशानां धार्मिकपुस्तकानां साहाय्यं गृहीतवन्तः ।

एतान् तर्कान् जनाः सहजतया न अङ्गीकृतवन्तः । निम्नजातीयनेतॄणां भाषणैः, विचारपूर्णलेखनैः आन्दोलनैः च उच्चजातीयराष्ट्रवादि-नेतॄणां मध्ये आत्ममन्थनस्य आत्मालोचनस्य च प्रक्रियाः आरब्धाः । परन्तु, रूढिवादिहिन्दुसमाजेन अपि उत्तरे सनातनधर्मसभानां भारतधर्ममहामण्डलस्य बङ्गाले च ब्राह्मणसभासदृशानां सङ्घटनानां माध्यमेन एतादृशप्रवृत्तीनां प्रचण्डरूपेण विरोधः कृतः । एतेषां सङ्घटनानाम् उद्देश्यम् इदमेव आसीत् यत् हिन्दुधर्मे जातीयोच्चनीचभावाय यद् महत्त्वं दीयते तस्य कापि क्षतिः न स्यात् । ते प्रमाणीकर्तुम् इच्छन्ति स्म यत् एतत् तथ्यं धार्मिकग्रन्थैः अपि मतम् अस्ति । औपनिवेशिककालानन्तरम् अपि जातिविषयके प्रश्ने चर्चाः वादाः विवादाः सङ्घर्षाः च अजायन्त तथा च अधुना अपि एतत् सर्वं प्रवर्तते ।

चित्रम् 15 – ई.वी.रामास्वामी नायकरः (पेरियारः) ।

स्रोतः 5 –

महिलानां विषये पेरियारः

पेरियारः अलिखत् –

तारामुकुर्तम-सदृश-शब्दानाम् आगमनात् परम् अस्माकं महिलाः तेषां पतिभिः दासीकृताः सन्ति... । अस्माभिः एतादृशानाम् अभिभावकानां संरक्षणे जीवनीयं भवति ये स्वीयपुत्रीः परामृशन्ति यत् ताः तेषां पतीनां कृते उपहाररूपेण दत्ताः सन्ति तथा च अधुना ताः तासां पतिगृहस्य भागभूताः सन्ति । अयं संस्कृतेन सह अस्माकं घनिष्ठतायाः परिणामः अस्ति ।

पेरियारद्वारा रचितम्,
पेरियार-चिन्तानायकल इत्यस्मात्तु द्धृतम्,

➢ गतिविधिः

अद्य अपि जातिः एतावान् विवादास्पदं चर्चाविषयः किमर्थं जातः ? औपनिवेशिककाले जातिव्यवस्थां विरुध्य महत्त्वपूर्णतमम् आन्दोलनं किम् आसीत् ?

चित्रम् 16 – केशबचन्द्रः सेनः ब्रह्मोसमाजस्य प्रमुखनेतृषु कश्चन आसीत्।

संशोधनानां कृते सङ्घटनम् –

ब्रह्मो-समाजः

ब्रह्मो-समाजस्य स्थापना 1830 तमवर्षे कृता आसीत्। इयं संस्था सर्वविधायाः मूर्तिपूजायाः बलिप्रथायाः च विरोधिनी आसीत् एतस्याः ब्रह्मोसमाजसंस्थायाः अनुयायिनः च उपनिषत्सु विश्वसन्ति स्म। एतस्याः सदस्यानाम् अन्यधार्मिक-प्रथानां परम्पराणां च आलोचनायाः अधिकारः नासीत्। ब्रह्मोसमाजसंस्थया विभिन्नधर्माणाम् आदर्शानां विशेषतया हिन्दुत्वस्य ख्रिस्तधर्मस्य च विचाराणाम् आलोचनात्मकव्याख्या कृता तथा तस्य धर्मस्य नकारात्मकानां सकारात्मकानां च बिन्दुषु प्रकाशः पातितः।

डेरोजियो यंग-बङ्गालः च,

चित्रम् 17 - हेनरी डेरोजियो।

1820 तमदशके हेनरी-लुई-विवियन-डेरोजियो कलकत्तायां हिन्दुमहाविद्यालयस्य अध्यापकः आसीत्। सः स्वीयविद्यार्थिनाम् आमूलक्रान्तिकारिविचारैः सह परिचयं कारितवान् तथा च छात्रान् सर्वप्रकारकस्य शासनस्य विषये प्रश्नान् समुपस्थापयितुं प्रेरितवान्। डेरोजियोद्वारा स्थापितेन यंगबंगालान्दोलनेन तस्य विद्यार्थिनः परम्पराणां रीतीनां च विषये प्रश्नाः उद्भावितवन्तः, महिलानां च कृते शिक्षायाः याचनां ते कृतवन्तः तथा च विचाराणाम् अभिव्यक्तये स्वतन्त्रतायै च अभियानानि सञ्चालितवन्तः।



चित्रम् 18 – स्वामी विवेकानन्दः

रामकृष्णमिशन इति संस्था विवेकानन्दः च,

रामकृष्णमिशनस्य नाम स्वामिविवेकानन्दस्य गुरोः रामकृष्णनाम्नः स्थापितम्। इयं रामकृष्णमिशन-संस्था समाजसेवायाः निःस्वार्थश्रमस्य च माध्यमेन मुक्तेः लक्ष्यप्राप्तेः विषये बलं प्रददाति स्म।

प्रार्थनासमाजः

1867 तमे वर्षे मुम्बानगर्यां स्थापितेन प्रार्थनासमाजेन जातीयबन्धनानां नाशाय बालविवाहप्रथायाः च उन्मूलनाय प्रयासः कृतः। प्रार्थनासमाजः महिलाशिक्षायाः प्रेरणां दत्तवान् तथा च विधवाविवाहे स्थापितप्रतिबन्धनं मोचयितुम् आन्दोलनं कृतम्। प्रार्थनासमाजस्य गोष्ठीषु हिन्दूनां बौद्धानां ख्रिस्तीयग्रन्थानां च विषये विचारमन्थनं क्रियते स्म।

वेद-समाजः



चित्रम् 19 - सैय्यदाहमदः खानः।

मद्रासे (चैन्नै) 1864 तमे वर्षे वेदसमाजस्य स्थापना अभवत्। वेदसमाजः ब्रह्मोसमाजेन प्रेरितः आसीत्। वेदसमाजेन जातीयभेदभावं नाशयितुं विधवाविवाहस्य महिलाशिक्षायाः च प्रोत्साहनाय कार्यं कृतम्। एतस्य सदस्याः एकैश्वरस्य अस्तित्वे विश्वसन्ति स्म। ते रूढिवादिहिन्दुत्वस्य अन्धविश्वासानाम् अनुष्ठानानां च घोरनिन्दां कृतवन्तः।

अलीगढ-आन्दोलनम्

सैय्यद-अहमद-खानद्वारा 1875 तमे वर्षे अलीगढे संस्थापितः मोहम्मदन-एङ्ग्लो-ओरियण्टल-महाविद्यालयः एव अनन्तरकाले अलीगढमुस्लिम-विश्वविद्यालयनाम्ना प्रसिद्धः। अत्र मुस्लिमजनेभ्यः पश्चिमविज्ञानेन सह विभिन्नविषयाणाम् आधुनिकशिक्षा अपि दीयते स्म। अलीगढान्दोलनस्य शैक्षणिक-संशोधनानां क्षेत्रे गहनप्रभावः आसीत्।

सिंह-सभा-आन्दोलनम्

सिक्खानां संशोधक-सङ्घटनानां रूपेण सिंहसभानां स्थापना 1873 तमे वर्षे अमृतसरे प्रारब्धा। अनन्तरकाले 1879 तमे ईस्वीये वर्षे लाहौरे अपि सिंहसभायाः स्थापना जाता। एताभिः सिंहसभाभिः प्रयत्नः कृतः यत् सिक्खधर्मावलम्बिनः जनाः अन्धविश्वासेभ्यः जातीयभेदभावात् विरोधि-आचरणात् च मुक्ताः भवेयुः इति। एतादृशसभानां सञ्चालकजनैः प्रयासः कृतः यत् सिक्खजनाः शिक्षां प्राप्नुयुः तदर्थं ते प्रेरिताः एतादृशसिंहसभासु प्रायः आधुनिकज्ञानेन सह सिक्खधर्मस्य सिद्धान्ताः अपि पाठ्यन्ते स्म।

चित्रम् 20 – खालसामहाविद्यालयः , अमृतसरम्। 1982 तमवर्षे सिक्खसभान्दोलनस्य नेतृभिः स्थापितः महाविद्यालयः।

अन्यत्र –

कृष्णवर्णीयाः दासाः, श्वेतवर्णीयाः उद्यानस्वामिनः

भवन्तः अवगतवन्तः सन्ति यत् ज्योतिरावफुलेवर्यः स्वीये गुलामगिरी इत्यस्मिन् पुस्तके जातीयोत्पीडनस्य अमेरिकादेशे च प्रचलितदासप्रथायाः मध्ये कथं सम्बन्धं स्थापितवान् आसीत्। किं भवन्तः जानन्ति यत् दासता इव इयं प्रथा कीदृशी आसीत् ?

सप्तदशशताब्द्यां यदा यूरोपीय-अनुसन्धातारः यात्रिणः वणिजः च प्रथमवारम् अफ्रीकादेशं प्राप्तवन्तः तदा ते क्रीतदाससम्बद्धं वाणिज्यम् आरब्धवन्तः । ते अफ्रीकादेशस्य कृष्णवर्णीयजनान् गृहीत्वा अमेरिकादेशं प्रति नयन्ति स्म तत्र च श्वेतवर्णीयेभ्यः उद्यानस्वामिभ्यः विक्रीणन्ते स्म। तैः कार्पासीयेषु अन्योद्यानेषु च कार्यं करणीयं भवति स्म ये प्रायः दक्षिणसंयुक्तराज्यामरीकायां स्थिताः आसन्। उद्यानेषु एते क्रीतदासाः अहोरात्रं कार्यं कुर्वन्ति स्म। यदा ते समुचितप्रकारेण कार्यं न कुर्वन्ति स्म तदा स्वामिभिः ते दण्ड्यन्ते स्म, कशाभिः ताड्यन्ते स्म विविधदण्डैः ते दण्ड्यन्ते स्म।

चित्रम् – 21 - क्रीतदासानां विक्रयणम्, दक्षिणकेरोलिना, अमरीका, 1856। अत्र सम्भावितक्रेतारः लीलामये क्रयणे अफ्रीकातः आनीतानां क्रीतदासानां निरीक्षणं कुर्वन्ति।

श्वेतैः अश्वेतैः च सर्वविधजनैः सङ्घटितरूपेण एतस्याः दासप्रथायाः विरोधः कृतः । अस्मिन् एव क्रमे ते 1776 तमवर्षे जातायाः अमेरिकीयक्रान्तेः भावनाः प्रस्तूय आह्वानं कृतवन्तः – "अमरिकावासिनः" स्वीयं घोषणापत्रम् अवलोकयन्तु, किं भवन्तः स्वीयभाषाम् अपि न अवगच्छन्ति ?" गेटिसबर्गे प्रदत्ते स्वीये अत्यन्ते भावप्रवणे भाषणे अब्राह्मलिङ्कनः अवदत् –यत् ये दासप्रथां विरुध्य सङ्घर्षम् अकुर्वन् ते लोकतन्त्रस्य पथप्रदर्शकाः सन्ति । ते जनानाम् आह्वानं कृतवन्तः यत् जातीयसमानतायाः कृते उपायान् कुर्वन्तु, यतः "धरण्याः" जनतायाः, जनताद्वारा, जनतार्थं च सर्वकारस्य नाशः न स्यात्।"

पुनः स्मरन्तु –

1. निम्नलिखितजनैः कीदृशानां सामाजिकविचाराणां समर्थनं प्रसारः च कृतः –

   राममोहनरायः
   दयानन्दसरस्वती
   वीरेशलिंगम-पंतुलुः
   ज्योतिरावफुले
   पण्डिता रमाबायी
   पेरियारः
   मुमताज-अली
   ईश्वरचन्द्र-विद्यासागरः

आयन्तु कल्पनां कुर्मः

कल्पनां कुर्वन्तु, यत् भवन्तः रुकैयाहुसैनद्वारा स्थापिते कस्मिंश्चित् विद्यालये पाठयन्ति । भवतां कक्ष्यायां विंशतिः बालिकाः सन्ति। स्वीयकल्पनायाः आधारेण अस्मिन् विद्यालये कस्मिंश्चित् दिने जातायाः चर्चायाः विवरणं प्रस्तुवन्तु।

2 . निम्नलिखितेषु उचितमनुचितं च सूचयन्तु –

(क) यदा आङ्ग्लीयाः बङ्गालस्य अधिग्रहणम् अकुर्वन् तदातैः विवाहस्य सन्ततेः क्रोडीकरणस्य सम्पत्तेः अधिकारादिकस्य च सम्बन्धे नवीनाः अधिनियमाः प्रकल्पिताः ।

(ख) समाजसंशोधकैः सामाजिकोपायेषु संशोधनार्थं प्राचीनग्रन्थनानां सान्निध्यं न प्राप्तव्यं भवति स्म ।

(ग) संशोधकानां देशस्य सर्वे जनाः पूर्णतया समर्थनं कुर्वन्ति स्म ।

(घ) बालविवाह-निषेध-अधिनियमः 1829 तमे वर्षे कार्यम् आरब्धवान् आसीत् ।

आयान्तु विचारं कुर्मः -

3. प्राचीनग्रन्थानां ज्ञानेन संशोधकाः नवीनाधिनियमान् संस्थापयितुं केन प्रकारेण प्रेरणां प्राप्तवन्तः ?
4. जनैः तानि कानि कारणानि उपस्थाप्यन्ते स्म यैः ते बालिकाः विद्यालयं प्रति न प्रेषयन्ति स्म ?
5. ख्रिस्तीयप्रचारकाणां नैके जनाः किमर्थम् आलोचनां कुर्वन्ति स्म ? किं केचन जनाः तेषां समर्थनम् अपि कृतवन्तः स्युः ? यदि आम्, तर्हि केन कारणेन ?
6. आङ्ग्लीयकाले एतादृशानां जनानां कृते कीदृशाः नवीनाः अवसराः जाताः, ये निम्नजातीय-सम्बद्धाः आसन् ?
7. ज्योतिरावः अन्ये संशोधकाः च समाजे जातीयासमानता-सम्बद्धाम् आलोचनां कथं कृत्वा समीचीनाम् इति उक्तवन्तः ?
8. फुलेवर्यः स्वीये गुलामगीरी इत्यस्मिन् पुस्तके क्रीतदासानां मुक्तये जायमानाय अमेरिकीय-आन्दोलनाय किमर्थं समर्पितवान् ?
9. मन्दिरप्रवेशान्दोलनस्य माध्यमेन अम्बेडकरः किं प्राप्तुम् इच्छति स्म ?
10. ज्योतिरावफुले रामास्वामिनायकरः च राष्ट्रियान्दोलनस्य आलोचनं किमर्थं कुरुतः स्म ? किं ताभ्यां क्रियमाणाभ्याम् आलोचनेन राष्ट्रियसङ्घर्षे किञ्चन साहाय्यं प्राप्तम् ?

॥ इति नवमः पाठः ॥

10 दृश्यकलानां परिवर्तमानः संसारः

चित्रम् 1 – दमयन्ती, राज्ञा रविवर्मणा रचितं चित्रम्।

यदा भवन्तः काम् अपि कलाकृतिं चित्रकलां कमपि मूर्तिशिल्पादिकं पश्यन्ति, तदा प्रायः अयं विषयः स्पष्टतः न दृश्यते यत् प्रायः अन्येषां वस्तूनाम् इव कला अपि स्वीयं परितः विद्यमानसंसारात् प्रभाविता भवति। अथ च प्रायः भवन्तः इत्थम् अपि न अनुभविष्यन्ति यत् भवन्तः यत् पश्यन्ति तदेव भवतां चिन्तनम् अपि प्रभावितं करोति। अस्मिन् अध्याये वयं द्रक्ष्यामः यत् औपनिवेशिककाले दृश्यकलाक्षेत्रे कीदृशं परिवर्तनं जातं तत् परिवर्तनं च उपनिवेशवादस्य राष्ट्रवादस्य च व्यापकेतिहासात् केन रूपेण सम्बद्धम् अस्ति।

औपनिवेशिकशासन-काले अनेकविधानां कलारूपाणां शैलीनां सामग्रीणां प्रविधीनां च आरम्भः जातः। एतेषां प्रविधीनां भारतीयशिल्पकाराः भारतीयजनतायाः तथा च स्थानीयानां विशिष्टग्राहकाणां सामान्यग्राहकाणां विपण्याः अनुरूपं च प्रयोगं कृत्वा नवीनप्रारूपं प्रदत्तवन्तः। भवन्तः एतं विषयम् अवगमिष्यन्ति यत् याः दृश्यकलाः भवतां दृष्टौ अद्य स्वाभाविकरूपेण विद्यमानाः सन्ति, एतासु नैकाः कलाः तस्मिन् काले एव उत्पन्नाः। यासां च कलानां विषये वयम् अस्मिन् अध्याये अध्ययनं करिष्यामः। उदाहरणार्थं – प्राचीराः सूच्यग्रस्तम्भाः तोरणयुक्तानि भव्यसार्वजनीनानि भवनानि ,कश्चित् मनोहारि भूदृश्यं, चित्रे यथार्थपरकमानवच्छविः, अथवा कस्याश्चित् देव्याः देवतायाः च चित्रम्,, यन्त्रैः मुद्रितानि असंख्यचित्राणि इत्यादीनि सर्वाणि अपि वस्तूनि एवंविधानि एव उदाहरणानि सन्ति।

एतादृशस्य इतिहासस्य अवगमनाय वयं मुख्यतः चित्रकलायाः मुद्रणस्य च सम्बद्धप्रविधौ जातपरिवर्तनस्य विषये विचारं करिष्यामः।

साम्राज्यवाद-कालिक-कलानां नवीनरूपाणि

अष्टादशशतकस्य आरम्भात् यूरोपस्य नैके कलाकाराः आङ्ग्लीयैः वाणिज्भिः शासकैः च सह भारतं प्रति आगन्तुम् आरब्धवन्तः आसन्। इमे कलाकाराः चित्रकलायाः नवीनशैलीं परम्परां च आत्मना सह आनीतवन्तः आसन्। तैः तादृशानि चित्राणि रचितानि यानि यूरोपे अतीव लोकप्रियाणि जातानि यैः पश्चिमे भारतस्य छविनिर्माणे महत्त्वपूर्णभूमिका विहिता।

यूरोपीय-कलाकारः यथार्थवादिविचारं मनसि निधाय भारतं प्रति आगतवन्तः । तन्मतम् आसीत् यत् कलाकारैः स्वीयदृष्ट्या वस्तूनि सावधानं द्रष्टव्यानि, तैः यथावत् चित्रणीयं येन वस्तूनि यथार्थरूपेण सजीवं च सन्ति इति दर्शनेन प्रतीतिः स्यात् । यूरोपीयकलाकाराः तैलचित्रप्रविधिम् अपि अत्र आनीतवन्तः आसन् । इतः पूर्वं भारतीयकलाकाराः तैलप्रविधेः सह परिचिताः नासन्। तैलचित्रैः अत्रत्याः चित्रकाराः यथार्थरूपाणि चित्राणि निर्मातुं साहाय्यं प्राप्तवन्तः ।

यूरोपीयचित्रकाराः भारतं प्रति आगमनात् प्राक् सदृशवस्तुभिः प्रभाविताः न आसन् । ते यान् विषयान् आधारीकृत्य चित्राणि रचितवन्तः तानि अपि पृथक् पृथक् आसन् परन्तु प्रायः एतेषु चित्रेषु ब्रिटेनस्य तस्य संस्कृतेः तत्रत्यजनानां श्रेष्ठताविषये बाहुल्येन दर्श्यते स्म । आयान्तु, साम्राज्यविदिकलायाः काञ्चन प्रमुखबिन्दून् पश्याम ।

उत्कीर्णचित्रम् – काष्ठस्य धातोः च मुद्रणयन्त्रेण कर्गदे निर्मितं चित्रम् ।

मनोहारिदृश्यानाम् अभिलाषः,

काचित् प्रसिद्धा साम्राज्यवादिनी परम्परा मनोहारिभूदृश्यानां चित्रणस्य आसीत् । अत्र मनोहारी इत्यनेन शब्देन कः अभिप्रायः अस्ति ? वस्तुतः, एवंविधचित्रशैल्याः माध्यमेन भारतदेशः कस्यचित् एतादृशस्य अद्भुतभूप्रदेशस्य रूपेण चित्र्यते स्म यस्य अन्वीक्षणं पर्यटकैः ब्रिटिशचित्रकारैः करणीयं भवति स्म, एतस्य भूदृश्यं नतोन्नतं वन्यं मानवस्पर्शरहितं च दृश्यते स्म । टॉमसडेनियलः तस्य भ्रातुस्पुत्रः विलियमडेनियलः च एतस्याः परम्परायाः प्राचीनतमौ चित्रकारौ आस्ताम् । तौ 1785 तमे वर्षे भारतं प्रति आगतवन्तौ तौ सप्तवर्षाणि यावत् कलकत्तानगरतः उत्तरस्य दक्षिणस्य च भारतस्य यात्रां कुर्वन्तौ अत्र स्थितवन्तौ । तौ भारतदेशे ब्रिटेनस्य नवविजितप्रदेशानाम् अतीव आकर्षकचित्राणि रचितवन्तौ । तैः तैलपत्रे निर्मितानि विशालचित्राणि ब्रिटेनदेशे विशिष्टचितानां जनानां मध्ये प्रदर्श्यन्ते स्म । ताभ्याम् उत्कीर्णचित्राणां चित्रावलीः ब्रिटेनजनाः रुच्या क्रीणन्ति सम यतः ते ब्रिटिशसाम्राज्यविषये अवगन्तुम् इच्छन्ति स्म ।

चित्रम् 2 – गाजीपुरे गङ्गातटे स्थितः, जीर्णावशेषः, टॉमसडेनियलद्वारा रचितं चित्रम् (तैलम्, 1791)।

द्वितीयं चित्रं डेनियलबन्धुभिः रचितेषु चित्रेषु किञ्चन नयनाभिरामं वर्तते । अस्मिन् चित्रे पुराकालिक-भव्य-भवनानां जीर्णावशेषाः दृश्यन्ते। एतादृशाः जीर्णावशेषाः अतीतवैभवं स्मारयन्ति । एते अवशेषाः तादृश्याः कस्याश्चित् प्राचीनसभ्यतायाः सन्ति या अधुना सर्वथा नष्टा अस्ति । चित्रं दृष्ट्वा इत्थं प्रतीयते यत् पतनशीला सभ्यता अधुना केवला ब्रिटिशशासनस्य माध्यमेन एव परिवर्तनस्य आधुनिकतायाः च मार्गे विकसितुं शक्नोति ।



चित्रम् 3 – कलकत्तास्थिता क्लाइव-वीथिः, टामस-विलियम-डेनियलाभ्यां रचितं चित्रम्, 1786।

ब्रिटिश-शासनस्य अन्तर्गतं भारते आधुनिक-सभ्यता-स्थापनायाः अयं विचारः डेनियलबन्धुभिः अष्टादशशतकस्य अन्तिमेषु दिनेषु कलकत्तायाः असंख्यचित्रेषु अतीव शक्तिशालिप्रकारेण निदर्शितम् अस्ति। एतेषु चित्रेषु भवन्तः किञ्चन नवीनं जायमानं कलकत्तानगरं द्रष्टुं शक्नुवन्ति यत्र प्रथितमार्गाः, विशालानि यूरोपीयशैल्याः निर्मितानि भवनानि यातायातस्य च नवीनसाधनानि दृश्यन्ते (तृतीयचित्रम्)। अत्र राजमार्गेषु जनानाम् आवागमनं विपुलतया जायते, अत्र नाटकीयता उत्तेजना च अस्ति। द्वितीयं तृतीयं च चित्रं सावधानं पश्यन्तु। अत्र भवन्तः द्रष्टुं शक्नुवन्ति यत् डेनियलबन्धुभिः परम्परागतभारतस्य ब्रिटिशशासनस्य च काले जीवनस्थितौ कियान् महान् भेदः दर्शितः अस्ति। द्वितीये चित्रे भारतस्य परम्परागतजीवनं परिवर्तनहीनं आधुनिकतारहितं गतिहीनं च अस्ति इति दर्शितम्। तत्र भिक्षुकाः गावः नद्यां च प्रवहन्त्यः नौकाः दृश्यन्ते। एतद्विपरीतं तृतीये चित्रे ब्रिटिशशासनस्य अन्तर्गतम् आधुनिकीकरणस्य छविः दृश्यते। अत्र वेगेन जायमानानि परिवर्तनानि सबलं प्रदर्शितानि सन्ति।

प्राधिकारस्य चित्रणम्

औपनिवेशिक-भारते अत्यधिकलोकप्रिया या चित्रकलाशैली जाता सा रूपचित्रकला आसीत्। ब्रिटिशजनाः भारतीयाः च द्वयोः अपि देशयोः धनाढ्याः प्रभुत्वसम्पन्नाः च जनाः प्रदर्शन्याम् आत्मचित्राणि द्रष्टुम् इच्छन्ति स्म। लघ्वाकारस्य रूपचित्रनिर्माणस्य वर्तमानभारतीयपम्परायाः विपरीतम् औपनिवेशिकरूपचित्राणि मानवाकारकाणि भवन्ति स्म तथा च सर्वथा सजीवानि प्रतीयन्ते स्म। रूपचित्रणस्य इयं काचित् नवीना शैली एतस्य साम्राज्यस्य कारणात् जायमानायाः ऐश्वर्यपूर्णजीवनशैल्याः धनसम्पदायाः प्रभुत्वस्य च दर्शनाय अपि आदर्शसाधनरूपेण आसीत्।

रूपचित्रम् – कस्यचित् जनस्य तादृशं चित्रं यत्र तस्य मुखे मुखभङ्गिमायाः विषये अधिकं बलं प्रदीयते।

रूपचित्रणम् - रूपचित्राणां निर्माण-कला।

यथा यथा रूपचित्रकला लोकप्रिया जाता, नैके यूरोपीयाः रूपचित्रकाराः लाभकारिकार्यम् अन्वेषयन्तः भारतं प्रति आगन्तुम् आरब्धवन्तः । योहान-जोफनी यूरोपतः आगन्तृषु प्रसिद्धेषु चित्रकारेषु कश्चन आसीत् । तस्य जन्म जर्मनीदेशे अभवत्, अनन्तरकाले सः इङ्ग्लैण्डदेशे निवासं कृतवान् । 1780 तमदशकस्य मध्यकाले सः पञ्चवर्षाणां कृते भारतं प्रति आगतवान् आसीत् । चतुर्थं पञ्चमं च चित्रं जोफनीद्वारा रचितयोः रूपचित्रयोः उदाहरणरूपेण स्तः । अत्र भवन्तः भारतीय-सेवकानाम् औपनिवेशिकप्रासादानां विपुलानि तृणयुक्तानि क्षेत्राणि द्रष्टुं शक्नुवन्ति । एतैः चित्रैः भारतीयाः दयनीयावस्थायुक्ताः विपन्नाः च सन्ति इति दर्शिताः । अत्र भारतीयाः स्वीयानां श्वेतवर्णीयस्वामिनां सेवां कुर्वन्तः सन्ति आङ्ग्लीयाः च श्रेष्ठतराः स्वामिरूपेण च प्रदर्शिताः सन्ति । ते स्वीयवस्त्राणां प्रदर्शनं कुर्वन्ति, राजमुद्रायां स्थिताः सन्ति, साहङ्कारं च उपविष्टाः सन्ति, ऐश्वर्ययुक्तं च तेषां जीवनम् अस्ति । भारतीयाः जनाः एतादृशचित्राणां केन्द्रे कदापि न दृश्यन्ते स्म । ते सामान्यतः अस्पष्टरूपेण एव दृश्यन्ते स्म ।

नैके भारतीयाः राजानः अपि यूरोपीयचित्रकारैः विशालानि तैलरूपचित्राणि निर्मापयितुम्

चित्रम् 4 – गवर्नरजनरल-हेस्टिंग्सस्य तस्य भार्यायाः च बेलवेडेयर-एस्टेटस्य पृष्ठभूमौ रचितं रूपचित्रम्, योहान-जोफनीद्वारा रचितं (तैलचित्रम्, 1784) ।

पृष्ठभूमौ भव्यम् औपनिवेशिकं प्रासादं पश्यन्तु ।

चित्रम् 5 – कलकत्तायाः ऑरियाल-डैशवुड-कुटुम्बानां चित्रम्, योहान-जोफनीद्वारा चित्रितम् (तैलचित्रम्,1784) ।

टॉमस-डैशवुडस्य विवाहः शार्लेटलूजियाआरियालेन सह अभवत् । अस्मिन् चित्रे सः स्वीयमित्राणां सम्बन्धिनां च सत्कारं कुर्वन् द्रष्टुं शक्यते । अस्मिन् चित्रे भारतीयाः सेवकाः आगतातिथिषु जलपानस्य वितरणं कुर्वन्तः सन्ति ।

➢ गतिविधिः

चतुर्थं पञ्चमं च चित्रं पश्यन्तु –

1. अस्मिन् भारतीयाः केन प्रकारेण विपन्नावस्थया दर्शिताः सन्ति ?
2. आङ्ग्लीयवस्त्राणि सावधानं पश्यन्तु । वस्त्राणि दृष्ट्वा किं ज्ञायते ?

आरब्धवन्तः आसन् । भवन्तः दृष्टवन्तः यत् कथम् आङ्ग्लीयाः भारतीयनृपाणां न्यायपरिषत्सु स्वीयान् ब्रिटिश-आवासीय-अधिकारिणः नियोजितवन्तः आसन् तथा च भारतीयनृपाणां शक्तेः अवहेलनं कुर्वन्तः ते कथं राज्यशासनं नियन्त्रयितुम् आरब्धवन्तः आसन्। केचन राजानः एवंविधस्य हस्तक्षेपस्य विरोधं कृतवन्तः अपरञ्च केचन आङ्ग्लीयानां राजनैतिकीं सांस्कृतिकीं च श्रेष्ठतां स्वीकृतवन्तः । ते आङ्ग्लीयैः सह सामञ्जस्यम् इच्छन्ति स्म तथा च तेषां रुचीनाम् अनुकरणम् इच्छन्ति स्म । मोहम्मदालीखानः एवंविधः एव कश्चित् शासकः आसीत् । 1770 तमदशके आङ्ग्लीयैः सह कस्माच्चित् युद्धात् परं सः ब्रिटिश-इण्डिया-कम्पनी इत्यस्याः सेवानिवृत्तिवेतने आश्रितः जातः। परन्तु तदनन्तरम् अपि सः टिलीकैटल-जार्जविलिसनाख्याभ्यां यूरोपीयचित्रकाराभ्यां स्वीयरूपचित्राणि रचयितुम् निर्देशं दत्तवान् तथा च स्वीयानि तानि रूपचित्राणि सः इङ्ग्लैण्डस्य नृपाय ईस्ट-इण्डिया-कम्पनी इत्यस्य निदेशकेभ्यः अर्पितवान् । राजा मोहम्मदाली स्वीयां राजनैतिकसत्तां नाशितवान् परन्तु एतादृशेषु रूपचित्रेषु सः आत्मानं सगर्वम् एतादृश्यां राजमुद्रायां च दृष्ट्वा प्रसन्नः भवितुं शक्नोति स्म। षष्ठे चित्रे विलिसनद्वारा रचितं तस्य चित्रं पश्यन्तु। भवन्तः अवगन्तुं शक्नुवन्ति यत् राजा कस्यां मुद्रायां चित्रं निर्मापयति तथा च स्वीया राजमुद्रा तेन केन प्रकारेण दर्शिता अस्ति।



चित्रम् 6 – राज्ञः मोहम्मदालीखानस्य रूपचित्रम्, जार्जविलियमद्वारा रचितं तैलचित्रम्, 1775।

इतिहासस्य चित्रणम्

साम्राज्यवादि-कलायाः अन्याः अपि काचित् श्रेणी आसीत् या "इतिहासस्य चित्रकला" इति उच्यते स्म । एतादृशशैल्याः चित्रेषु ब्रिटिश-राजकीय-इतिहासस्य विभिन्नघटनाः नाटकीयरूपेण चित्र्यन्ते स्म । अष्टादशशताब्द्याः उत्तरार्द्धे एकोनविंशतितमशताब्द्याः च आरम्भिकवर्षेषु एवंविधा चित्रकला बहुसम्मानिता लोकप्रिया च सा आसीत्।

आङ्ग्लीयैः भारते प्राप्तः विजयः ब्रिटेनस्य इतिहास-सम्बद्धानां चित्रकाराणां कृते उपयोगिसामग्रीरूपेण आसीत्। ते चित्रकाराः यात्रिवृत्तान्तानां रेखाचित्राणां च आधारेण भारते घटितानां ब्रिटिशकार्याणां सुन्दरदृश्यानि निर्मातुं प्रयत्नं कुर्वन्ति स्म यतः ब्रिटिशजनता अपि तेषां कार्याणां विषये अवगन्तुं शक्नुयात् इति। तेषु चित्रेषु अपि आङ्ग्लीयानाम् एव यशोगानं भवति स्म। तेषां प्रभुत्वस्य विजयस्य श्रेष्ठतायाः च वर्णनम् एव तादृशानां चित्राणां वर्ण्यविषयः आसीत्।

चित्रम् 7 - प्लास्याः युद्धानन्तरं लॉर्डक्लाइवः मुर्शिदाबादस्य शासकेन मीरजाफरेण सह मेलितुम् आगतवान्, फ्रांसिसहेमेनद्वारा चित्रितम् (तैलचित्रम, 1762)।

एतेषु चित्रेषु किञ्चन आरम्भिकचित्रं 1762 तमवर्षे फ्रांसिस-हेमेनद्वारा रचितम् आसीत् यत् लन्दनस्थिते वॉक्सहॉलगार्डन इत्यस्मिन् सार्वजनीनप्रदर्शनाय स्थापितम् आसीत् । आङ्ग्लीयाः किञ्चित् कालात् पूर्वमेव प्लास्याः युद्धे सिराजुद्दौलां पराजित्य मीरजाफरं मुर्शिदाबादस्य नृतत्वेन चितवन्तः आसन् । आङ्ग्लीयाः षड्यन्त्रेण तत्र जितवन्तः, षड्यन्त्रे च सहायकः देशद्रोही मीरजाफरः आसीत् ततः सः पुरस्काररूपेण एतादृशं पदम् अलङ्कृतवान् । हेमेनद्वारा रचिते चित्रे आक्रमणस्य विजयस्य च एतत् दृश्यं न दर्शितम् । अनेन चित्रेण मीरजाफरेण तस्य सैनिकैः च प्लास्याः युद्धात् परं लार्डक्लाइवः स्वागतीक्रियते इति तत् दृश्यं दर्शितम् अस्ति ।

➢ गतिविधिः

सप्तमम् अष्टमं च चित्रं सावधानं पश्यन्तु

1. सप्तमे चित्रे क्लाइवः केन रूपेण दर्शितः ?
2. चित्रकारेण आङ्ग्लविजयं दर्शयितुं केषाम् उपायानां प्रयोगः कृतः ?
3. सप्तमे अष्टमे च चित्रे इङ्ग्लैण्डस्य ध्वजां (यूनियन जैक) पश्यन्तु । ध्वजा अस्मिन् एव स्थाने किमर्थं चित्रिता अस्ति ?

चित्रम् 8 - सेरिङ्गापाटमस्थाने आक्रमणम्, रोबरकेरपाटरद्वारा रचितं चित्रम् (पैनोरमा, तैलचित्रम्,1800)।

ब्रिटिशसैनिकैः आयोजितः विजयोत्सवः सेरिङ्गापाटमस्य (वर्तमाने श्रीरङ्गपटनम्) युद्धेआधारितेषुनैकेषुचित्रेषुद्रष्टुंशक्यते।यथाभवन्तःजानन्ति,मैसूरस्य टीपूसुल्तानः आङ्ग्लीयानां सर्वेषु बलवत्सु शत्रुषु कश्चन आसीत् । अन्ततः 1799 तमे वर्षे सेरिङ्गापाटमस्य प्रसिद्धे युद्धे तस्य पराजयः जातः । अष्टमे चित्रे भवन्तः द्रष्टुं शक्नुवन्ति यत् चित्रकारः युद्धस्य दृश्यानि कथं दर्शितवान्। अत्र आङ्ग्लीयसैन्यदलानि दुर्गम् आवृत्य तिष्ठन्ति तथा च आक्रमणं कुर्वन्ति। आङ्ग्लीयसैनिकाः टीपूसुल्तानस्य सैनिकान् हन्ति, भित्तीः भिन्दन्ति, टीपूसुल्तानस्य दुर्गोपरि ब्रिटिशध्वजां दोलयन्ति । इदं चित्रं क्रमव्यवस्थाहीनम् ऊर्जापूर्णं च अस्ति । अनया चित्रकलया असौ घटना नाटकीयरूपेण प्रस्तूयते आङ्ग्लीयानां च जयस्य गौरवगानं क्रियते।

साम्राज्यवादकालिकैः ऐतिहासिकचित्रैः राजोचितविजयस्य लोकस्मृतीनां वर्णनस्य प्रयासः कृतः । चित्राङ्कनद्वारा प्रयासः क्रियते स्म यत् भारते ब्रिटेनदेशे च आङ्ग्लविजयं जनाः सदैव स्मृतौ स्थापयेयुः । तत्र चिन्तनम् आसीत् यत् आङ्ग्लीयाः अजेयाः सर्वशक्तिशालिनः च सन्ति इति चित्रमाध्यमेन प्रमाणीकर्तुं शक्यते।

चित्रम् 9 – जनरलसरडेविडबेयर्डद्वारा सुल्तानटीपूसुल्तानस्य शवस्य प्राप्तिः, 1799 तमे वर्षे मेमासस्य 4 दिनाङ्के च, डेविडविल्कीद्वारा चित्रितं (तैलचित्रम्, 1839)।

आङ्ग्लसेनायाः नेतृत्वं कुर्वन् जनरलबेयर्डः टीपूदुर्गम् अभिलक्ष्य आक्रमणं करोति सः चित्रमध्ये विजयभावाविष्टः दर्शितः अस्ति । प्रदीपकेन बेयर्डः प्रकाशितः अस्ति यतः सः सर्वैः द्रष्टुं शक्यते । वामतः टीपोः शवः निपातितः अस्ति यः अल्पतमसि अस्ति। टीपोः सेना पराजयं प्राप्नोत्, तस्य राजोचितवस्त्राणि विदार्य प्रक्षिप्तानि सन्ति । एतत् चित्रं दृष्ट्वा इत्थं प्रतीयते यत् यः आङ्ग्लीयानां विरोधं करिष्यति तस्य एतादृशी एव दुरवस्था भविष्यति।

➢ गतिविधिः

नवमं चित्रं पश्यन्तु।
डेविडबेयर्डस्य भार्या डेविडविल्कीवर्याय इदं चित्रं निर्मातुं धनम् अददात् । सा एतादृशं चित्रं किमर्थम् निर्मापितवती स्यात् ?

राजसभासदां चित्रकलाकाराणां किम् अभवत् ?

ये कलाकारः अधुना पर्यन्तं लघुचित्राणि निर्मान्ति स्म तेषां किम् अभवत् ? भारतीयराजसभासु विद्यमानाः चित्रकलाकाराः राजसम्बद्धानां चित्रकलानां नवीनपरम्पराणां विषये कीदृशीं प्रतिक्रियां कृतवन्तः ?

भित्तिचित्रम् – भित्तौ निर्मितं चित्रम् ।

विभिन्नराजसभासु वयं विभिन्नप्रवृत्तिं द्रष्टुं शक्नुमः । मैसूरे टीपूसुल्तानः न केवलं युद्धक्षेत्रं गत्वा आङ्ग्लीयैः सह युद्धम् अकरोत् अपि तु तेषां सांस्कृतिकपरम्पराणाम् अपि विरोधम् अकरोत् । सः स्थानीयपरम्पराणां प्रोत्साहनम् अकरोत् । सेरिङ्गापाटमे स्थिते तस्य प्रासादस्य भित्तिषु स्थानीयकलाकारैः रचितानि भित्तिचित्राणि सन्निहिनि भवन्ति स्म । दशमे चित्रे एतादृशम् एव भित्तिचित्रं दृश्यते । अस्मिन् चित्रे 1780 तमे वर्षे पोलिलुरे जातस्य तस्य प्रसिद्धयुद्धस्य उत्सवः आयोज्यते यत्र टीपुः हैदराली च आङ्ग्लीयान् पराजितवन्तौ ।

चित्रम् 10 – हैदरालिना पोलीलुरयुद्धे आङ्ग्लसेना पराजिता एतस्याः घटनायाः स्मरणे टीपुसुल्तानद्वारा 1780 तमवर्षे सेरिङ्गापाटमे स्थिते दरियादौलतप्रासादे एतत् भित्तिचित्रं निर्मापितम् ।

➢ गतिविधिः

अष्टमस्य दशमस्य च चित्रमध्ये तुलनां कुर्वन्तु ।

1. एतेषां चित्राणां विषयवस्तुनि भवन्तः काः समानताः असमानताः च पश्यन्ति ?
2. यदि भवन्तः आङ्ग्लीयैः सह युद्धकर्तारः शासकाः स्युः तर्हि युद्धस्य कीदृशानि दृश्यानि भवन्तः चित्रकारैः निर्मापयिष्यन्ति, पराजयस्य उत विजयस्य ?

किं भवन्तः दशमचित्रस्य भित्तिचित्रं यथार्थपरकं पश्यन्ति ?

मुर्शिदाबादस्य राजसभायां कश्चित् विचित्रप्रवृत्तिः दृष्टिपथम् आयाति । यत्र सिराजुद्दौलावर्यस्य पराजयात् परम् आङ्ग्लीयाः राजसिंहासने तदनुकूलशासकान् चितवन्तः । आदौ आङ्ग्लीयाः मीरजाफरम् अनन्तरकाले च मीरकासिमं राजसिंहासने शासकत्वेन नियोजितवन्तः । मुर्शिदाबादस्य राज्ये स्थानीयाः लघुचित्रकलाकाराः एतदर्थं प्रेरिताः यत् ते आङ्ग्लीयानाम् अभिरुचीः कलाशैलीः च अवगच्छेयुः । एकादशमं चित्रम्

अत्र उदाहरणरूपेण वर्तते। इदं चित्रम् ईद इति उत्सवे जातस्य कस्यचित् कार्यक्रमस्य अस्ति। अष्टादशशताब्द्याः उत्तरार्द्धे केनचित् सभिकचित्रकलाकारेण रचिते अस्मिन् चित्रेण भवन्तः द्रष्टुं शक्नुवन्ति यत् कथं मुर्शिदाबादस्य स्थानीयाः लघुचित्रकलाकाराः यूरोपीययथार्थवादस्य तत्त्वानि अङ्गीकर्तुम् आरब्धवन्तः आसन्। अस्मिन् चित्रे ते परिप्रेक्ष्य-विधेः प्रयोगम् अकुर्वन् यः समीपस्थानां दूरस्थानां च वस्तूनां मध्ये दूरतायाः बोधं कारयति। वस्तूनि जीवन्तानि यथार्थानि च दर्शयितुं ते प्रकाशस्य छायाः च प्रयोगं कृतवन्तः।

परिप्रेक्ष्यविधिः – एतादृशः विधिः यस्य माध्यमेन दूरस्थवस्तूनि लघूनि दृश्यन्ते तथा च समानान्तररेखाः दूरं गत्वा परस्परं विलीनाः जाताः इति प्रतीयन्ते।

ब्रिटिशसत्तायाः स्थापिते सति नैकेषां स्थानीयराज्यानां प्रभावः धनसम्पत्तिः च क्रमशः समाप्तिं गता। अधुना एताः राजसभाः तस्यां स्थितौ न आसन् यत् चित्रकलाकाराणां कृते वेतनं दातुं शक्नुयुः इति तथा च तेभ्यः राजसभिकसेवायाः विनिमये धनं दातुं शक्नुयुः इति। एतस्यां स्थितौ चित्रकाराः स्वीयायाः आजीविकायाः कृते किं कर्तुं शक्नुवन्ति स्म ? तेषु नैके आङ्ग्लीयशरणं गन्तुम् आरब्धवन्तः।

चित्रम् 11 – मुर्शिदाबादस्य शासकः मुबारकुद्दौलावर्यः ईद इत्यस्य उत्सवस्य कस्मिंश्चित् जनकार्यक्रमे, यात्रिब्रिटिशकलाकारेण जी.फेरिंगटनद्वारा रचितस्य कस्यचित् तैलचित्रस्य स्थानीय-राज-सभिकेन चित्रकारेण कृतं कलानुकरणम्, (1799-1800)।

कालक्रमेण भारतं प्रति आगताः आङ्ग्लीयाधिकारिणः अवगन्तुम् आरब्धवन्तः यत् उपनिवेशेषु तेषां जीवनं तथा नास्ति यथा इङ्ग्लैण्डदेशे आसीत्। परिणामतः, ते अपि तादृशानि चित्राणि निर्मापयितुम् इच्छन्ति स्म येषां माध्यमेन ते भारतदेशम् अवगन्तुं शक्नुयुः। ते भारतदेशे स्वीयजीवनस्य संस्मरणरूपेण एतादृशानि वस्तूनि इच्छन्ति स्म यैः ते पश्चिमविश्वस्य समक्षे प्रस्तोतुं शक्नुयुः। अनेन प्रकारेण, वयं पश्यामः यत् स्थानीयकलाकाराः स्थानीयपादपानां पशूनाम् ऐतिहासिकभवनानां स्मारकाणाम् उत्सवानां जनसंप्रचलनानां व्यवसायानां शिल्पकृतीनां जातेः समुदायस्य च सम्बद्धानां चित्रकलाः निर्मातुम् आरब्धवन्तः आसन्। ईस्ट-इण्डिया-कम्पन्यधिकारिणः एतादृशानि चित्राणि रुच्या निजसङ्ग्रहे योजयन्ति स्म। एतादृशानि चित्राणि कम्पनीचित्राणि इति उच्यन्ते स्म।

परन्तु सर्वे चित्रकलाकाराः राजसभिक-चित्रकलाकाराः न आसन्। ते सर्वे अपि राज्ञां कृते चित्रकलाः न रचयन्ति स्म। आयान्तु, पश्यामः यत् राजसभातः बाह्यभागे किं प्रवर्तते स्म।

चित्रम् 12 – अस्मिन् चित्रे युगलत्रयं तञ्जौरक्षेत्रस्य पृथक् पृथक् धार्मिकसमुदायं दर्शयति। तञ्जौरस्य काचित् कम्पनीचित्रकला (1830)।

एतादृशीषु कम्पनीचित्रकलामाध्यमेन जनाः समतलपृष्ठभूमौ दर्श्यन्ते स्म। एतादृशैः चित्रैः एतत् तथ्यम् अवगन्तुं शक्यते यत् एते जनाः कीदृशे सामाजिकपरिवेशे जीवनं यापयन्ति स्म तथा च कीदृशानि कार्याणि कुर्वन्ति स्म। एतैः चित्रैः केवलम् एतादृशाः महत्त्वपूर्णविषयाः बोध्यन्ते स्म येषां माध्यमेन विभिन्नजनाः समुदायाः च बाह्यजनैः सरलतया परिचेतुं शक्यन्ते। यथा कम्पनीचित्रेषु विभिन्नप्रकारस्य भारतीयपादपानां पक्षिणां पशूनां च चित्रणं क्रियते स्म तथैव मनुष्याणाम् अपि विभिन्नव्यवसायानां जातीनां सम्प्रदायानां च प्रारूपरूपेण एव चित्रणं क्रियते स्म।

खुर्रा इति चित्रम् – कागदस्य दीर्घतरपुटके निर्मितं चित्रं यस्य वेष्टनं कर्तुं शक्यते स्म। खुर्रा इति एतादृशानि चित्राणि बहुविधानि भवितुं शक्नुवन्ति स्म परन्तु अस्मिन् अध्याये वयं केवलं खुर्रा इति चित्रकलायाः विषये चर्चां कुर्मः।

चित्रम् 13 - हनुमतः जम्बुवनस्य च मध्ये जातयुद्धम्, कालीघाट-चित्रकला, एकोनविंशतितमशताब्द्याः मध्यकाले, कलकत्ता (कर्गदे जलरङ्ग इति)।

अत्र भवन्तः द्रष्टुं शक्नुवन्ति यत् कथं कलाकाराः परम्परागतच्छवीः आधुनिकरूपेण निर्मितवन्तः। अस्मिन् चित्रे हनुमान् पादत्राणधारी अस्ति, एतादृशं प्रचलनम् एकोनविंशतिशताब्द्याम् आधिक्येन आसीत्।

नवीनाः भारतीयाः लोककलाः

एकोनविंशतितमशताब्द्यां भारतस्य नैकेषु नगरेषु काचित् नवीना लोककला विकसिता जाता।

बङ्गाले कालीघाटस्थितं मन्दिरं किञ्चित् महत्त्वपूर्णतीर्थस्थलम् आसीत्। तत्रत्यस्थानीयग्रामेषु निवसन्तः खर्रा इति चित्रकाराः (ये पटुआ इति कथ्यन्ते स्म) तथा च मृण्मयपात्रनिर्मातारः, (पूर्वभारते कुमोर इति उत्तरभारते च कुम्हार) काञ्चित् नवीनां शैलीं विकसयितुम् आरब्धवन्तः आसन्। ते पार्श्वस्थग्रामेभ्यः एकोनविंशतितमशताब्द्याः आरम्भिककाले एव कलकत्तां प्रति आगतवन्तः आसन्। तस्मिन् काले कलकत्तामहानगरं कस्यचित् वाणिज्यिकस्य प्रशासकीयस्य च केन्द्रस्य रूपेण विकासं प्राप्नोति स्म। नूतनाः नूतनाः औपनिवेशिककार्यालयाः तत्र संस्थाप्यन्ते स्म। नवीनभवनानां राजमार्गाणां च निर्माणं तत्र भवति स्म, नवीनविपणीनां संस्थापनम् अपि क्रियते स्म। नगरेषु विविधाः नवीनावसराः अपि जायन्ते स्म यत्र गत्वा जनाः आजीविकाम् अर्जयितुं शक्नुवन्ति स्म। ग्रामीणकलाकाराः अपि नवीनग्राहकाणां नवीनसंरक्षकाणां च आशया नगराणि आगत्य तत्रैव वासं कुर्वन्तः आसन्।

एकोनविंशतितमशताब्द्याः पूर्वं ग्रामीणखर्राचित्रकाराः कुम्भकाराः च सामान्यतः पौराणिकविषयान् आधारीकृत्य देवीनां देवातानां च चित्राणि रचयन्ति स्म। कालीघाटं प्रति गमनानन्तरम् अपि ते एतादृशानि एव धार्मिकवस्तूनि रचयन्तः आसन्। परम्परागतरूपेण खर्रा-चित्राणां छवयः गोलाकाराः नैव अपि तु समतलाः भवन्ति स्म। अधुना कालीघाटचित्रकाराः स्वीयछविं स्पष्टाम् उत्पादयितुं छायाकरणस्य प्रयोगम् आरब्धवन्तः यतः तेषां चित्रं त्रि-आयामि दृश्यते स्म। परन्तु अधुना अपि चित्रेषु मुखरा सुनियोजिता अयथार्थवादिशैली स्पष्टरूपेण दृश्यते स्म यत्र छवयः विशालाः ऊर्जापूर्णाः च भवन्ति स्म, तत्र रेखाणां विवरणानां वर्णानां च न्यूनतमः प्रयोगः कृतः आसीत्।

1840 तमदशकात् परं कालीघाट-कलाकाराणां वयं नवीनप्रवृत्तिं पश्यामः। अत्रत्याः मूल्यानि मतानि रुचीः सामाजिकरीतयः नियमाः परम्पराः च एतावत् वेगेन परिवर्तन्ते स्म। परिवर्तमाने तस्मिन् परिवेशे ये कालीघाटस्थाः चित्रकाराः आसन् ते अपि

स्वीये परिवेशे व्याप्ते जनसमूहे अवधानं कृतवन्तः तथा च तेन प्रेरिताः ते सामाजिकेषु राजनैतिकेषु च विषयेषु चित्रनिर्माणम् आरब्धवन्तः । एकोनविंशतितमशताब्द्याः अन्तिमकालिकेषु नैकेषु कालीघाटचित्रेषु ब्रिटिशशासनस्य अन्तर्गतं सामाजिकं जीवनं दर्शितम् अस्ति । स्वीयैः चित्रैः एते कलाकाराः प्रायः जातानां नवीनपरिवर्तनानाम् उपहासं कुर्वन्ति स्म । आङ्ग्लभाषाभाषिणः पाश्चात्यप्रवृत्तेः अनुकरणधर्मिणः, विशिष्टाधिकारिणां वेशभूषासम्पन्नाः धूमदण्डिकाः सेवन्तः आसन्दिकासु उपविष्टाः च जनाः ये नवीनरुचिसम्पन्नाः आसन् इत्येतादृशाः जनाः एतादृशचित्रकाराणां वर्ण्यविषयत्वेन उपहासपात्ररूपेण भवन्ति स्म । चित्रकाराः पाश्चात्यसभ्यतासम्पन्नस्य लिपिकारस्य उपहासं कृतवन्तः, भ्रष्टार्चकानाम् आलोचनम् अकुर्वन्, तथा च महिलाः अपि गृहस्य बाह्यभागे अर्थात् पुरुषान् इव कार्यालयादिषु कार्यं न कुर्युः इति प्रेरणां परामर्शं वा दत्तवन्तः । सम्पन्नजनान् विरुध्य यः आक्रोशः सामान्यजनानां भवन्ति स्म तथा च अनेन सहैव सामाजिकरूपेण रीतीनां परम्पराणां च परिवर्तनकारणात् नैकेषु जनेषु या भयस्थितिः जायते स्म तस्याः परिस्थितेः अभिव्यक्तिम् एते कलाकाराः प्रायः कुर्वन्ति स्म ।

कालीघाटचित्रेषु नैकानि प्रायः व्यापकसङ्ख्यया प्रकाश्य विपणिषु अपि विक्रीताः । आरम्भे एतानि चित्राणि काष्ठपट्टेषु विलिख्य निर्मीयन्ते स्म । एतेषु विलिखितेषु प्रारूपेषु मश्याः प्रयोगं कृत्वा अथवा मशीं संश्लेष्य कर्गदे नोद्यन्ते स्म तथा च अनेन प्रकारेण काष्ठप्रारूपैः याः मुद्राः निर्मीयन्ते स्म तासु हस्ताभ्यां वर्णाः पूर्यन्ते स्म । अनेन प्रकारेण एकेन एव प्रारूपेण नैकानि चित्राणि निर्मातुं शक्यन्ते स्म । एकोनविंशतितमशताब्द्याः अन्तिमकालपर्यन्तं भारतस्य विभिन्नभागेषु मुद्रणालयानां स्थापनकार्यम् आरब्धम् आसीत् यत्र इतोऽपि व्यापकसङ्ख्यायां चित्राणि मुद्रयितुं शक्यन्ते स्म । एतानि चित्राणि विपण्यां न्यूनमूल्येन अपि विक्रीयन्ते स्म । ततः निर्धनजनाः अपि तानि क्रेतुं शक्नुवन्ति स्म ।

लोकप्रियाणि चित्राणि केवलं निर्धन-ग्रामीणैः कालीघाट-चित्रकलाकारैः एव न निर्मीयन्ते स्म । प्रायः मध्यमवर्गीयचित्रकाराः अपि मुद्रणालयान् स्थापितवन्तः तथा च विपण्यां विक्रयणार्थं चित्राणि सज्जीकृतवन्तः । मध्यवर्गीयाः चित्रकाराः ब्रिटिशकला-संस्थानेषुजीवनाध्ययनस्यतैलचित्रकलायाःमुद्रणस्यनवीनविधीनां च प्रशिक्षणंप्राप्नुवन्ति स्म । कलकत्ता-आर्ट्स-स्टूडियो इति एकोनविंशतितमशताब्द्याः अन्तिमकालिके कलकत्ता-महानगरे स्थितेषु सफलतम-मुद्रणालयेषु कश्चन आसीत् । एतस्मिन् मुद्रणालये प्रसिद्धैः बङ्गालिजनैः सह पौराणिक-पात्राणाम् अपि मानवाकारकाणि चित्राणि यथार्थपरकाणि भवन्ति स्म । एतेषा चित्राणां पृष्ठभूमिषु आकर्षकाणि भूदृश्यानि, पर्वतोपत्यकाः, सरोवराः, नद्यः वनानि च भवन्ति स्म । विपणिषु राजमार्गसमीपे स्थितेषु अस्थायि-आपणेषु भवन्तः प्रचलित-दिनदर्शिकासु हिन्दुदेवीनां हिन्दुदेवतानां च एतादृशानि बहूनि चित्राणि दृष्टवन्तः स्युः । एतेषां चित्राणां विशेषताः एकोनविंशतितम-शताब्द्याः उत्तरार्द्धकाले मुखररूपेण समक्षं समागताः ।



चित्रम् 14 – सिंहस्य आखेटं कुर्वन् कश्चन गजारूढः आङ्ग्लीयः, कालीघाटचित्रकला, एकोनविंशतितमशताब्द्याः मध्यकालः, कलकत्ता (कर्गदे जलरङ्ग इति)

पटवा-कलाकाराः भारते आङ्ग्लीयजीवनं कथं पश्यन्ति स्म इत्यनेन चित्रकलया अवगन्तुं शक्यते । उपनिवेशेषु आङ्ग्लीयेभ्यः आखेटं रोचते स्म । आखेटं तेषां कृते एतादृशक्रीडा आसीत् यत्र ते स्वीयं साहसं पौरुषं च प्रदर्शयितुं शक्नुवन्ति स्म ।

जीवनाध्ययनम् – कलाकाराणां कृते जीवितप्रारूपाणां मुद्राणाम् आधारेण मानवाकृतीनाम् अध्ययनम् ।

चित्रम् 15 - आसन्दिकोपविष्टः कश्चन लिपिकारः, कालीघाटचित्रकला, एकोनविंशतितमशताब्दी ।

अनेन प्रकारेण चित्रकलायां भवन्तः कलाकारस्य एतत् भयं स्पष्टरूपेण द्रष्टुं शक्नुवन्ति यत् लिपिकजनाः पश्चिमस्य अनुकरणं करिष्यन्ति तथा च स्थानीयसंस्कृतेः सर्वाणि सुवस्तूनि त्यक्ष्यन्ति । लिपिकः अत्र विदूषकवत् दर्शितः अस्ति सः उच्चपार्ष्णियुक्तौ उपानहौ धृतवान् अस्ति तथा च विचित्रे सूच्यग्रपादयुक्ते आसन्दे उपविष्टः अस्ति ।

चित्रम् 16– दमयन्तीनलयोः कथादृश्यम्, कलकत्ता-आर्ट-स्टूडियोद्वारा निर्मितम्, 1878-1880।

एतस्य चित्रस्य तुलनां 15 चित्रेण सह कुर्वन्तु। द्वयोर्मध्ये कियान् भेदः अस्ति ? भवन्तः कतरत् चित्रं यथार्थपरकम् अनुभवन्ति ?

चित्रम् 17 – काली, कलकत्ता-आर्ट-स्टूडियोद्वारा निर्मितम्, 1880 तमे दशके।

आङ्ग्लीयैः 1905 तमे वर्षे प्रतिबन्धितस्य धूमदण्डिकायाः कस्याश्चित् उत्पादनस्य विज्ञापनम् अस्ति। अत्र भवन्तः देवीद्वारा हतेषु दानवेषु ब्रिटिशसैनिकानां शिरांसि द्रष्टुं शक्नुवन्ति। अनेन प्रकारेण, राष्ट्रवादिविचाराणाम् अभिव्यक्तये जनानां च ब्रिटिशशासनं विरुध्य उद्वेलनाय धार्मिकच्छवीनां प्रयोगः क्रियते स्म।

एतादृशानि लोकप्रियाणि चित्राणि भारतस्य अन्यभागेषु अपि निर्मीयन्ते स्म। राष्ट्रवादस्य प्रचारकाले प्रारम्भिकेषु विंशतितमशताब्द्याः जनसाधारणद्वारा प्रयुज्यमानेषु चित्रेषु राष्ट्रवादिसन्देशाः दीयन्ते स्म। एतेषु नैकेषु चित्रेषु भवन्तः भारतमाता कस्याश्चित् देव्याः रूपेण भवन्तः द्रष्टुं शक्नुवन्ति या राष्ट्रियध्वजां धृत्वा वर्तते। नैकेषु चित्रेषु राष्ट्रियनायकाः निजशिरः मातुः चरणयोः अर्पयन्तः सन्ति, अपरञ्च केषुचित् चित्रेषु देव्यः देवताः च आङ्ग्लीयानां हननं कुर्वन्तः सन्ति।

चित्रम् 18 - भारतमाता, किञ्चित् प्रचलितं चित्रम्।

चित्रग्राहकस्य नेत्रेण : भारतम्

भारतस्य विषये यूरोपीयचित्रकारैः रचितानि नैकानि चित्राणि भवन्तः द्रष्टवन्तः । तैः भारतस्य नाना प्रकारकाणि चित्राणि रचितानि आसन् । कानिचन एतादृशानि एव चित्राणि नैकैः छायाचित्रकारैः स्वीयेषु छायाचित्रयन्त्रेषु निवेशितानि ।

एकोनविंशतितम-शताब्द्याः मध्यकालपर्यन्तं यूरोपात् नैके छायाचित्रकाराः अपि भारतं प्रति आगन्तुम् आरब्धवन्तः आसन् । ते चित्राणि आकृष्टवन्तः, छायाचित्रणालयानाम् उद्घाटनं कृतवन्तः तथा च छायाचित्रकलायाः कलाकौशलं वर्धयितुं छायाचित्रकारीय-सम्बद्धानां समितीनां स्थापनाम् अकुर्वन् । एतेषु केचन रूपचित्रकाराः आसन् ये आङ्ग्लीयाधिकारिणां चित्राणि आकर्ष्टुम् आरब्धवन्तः आसन् । एतेषु चित्रेषु आङ्ग्लीयाधिकारिणः सगर्वम् ऊर्जान्वितमुद्रायां च दर्श्यन्ते स्म । नैकैः छायाचित्रकारैः जीर्णभवनानां मनोहारिभूदृश्यानां च अन्वेषणार्थम् आदेशं भ्रमणं कृतम्, तथैव छायाचित्रकारैः अपि येषां विषये अस्माभिः पूर्वं चर्चितम् । नैके छायाचित्रकाराः एतादृशाः आसन् ये ब्रिटिशसैनिकविजयस्य दृश्यानि छायाचित्रयन्त्रेषु निवेशयन्ति स्म । एतदतिरिच्य नैके एतादृशाः छायाचित्रकाराः अपि आसन् ये प्रमाणयितुम् इच्छन्ति स्म यत् भारतदेशः तु आदिमदेशः अस्ति इति एतस्मात् ते अत्रत्यां सांस्कृतिविविधतां वर्णयन्ति स्म ।

चित्रम् 19 – विलियम-हॉडसनस्य अध्यक्षतायां अश्वरोहिसैन्यदलं येन 1857 तमवर्षस्य विद्रोहस्य अभिभवनाय विशिष्टदायित्वं निर्वोढम् आसीत् ।

सावधानं पश्यन्तु, अत्र आङ्ग्लीयाधिकारी मध्ये प्रभुत्वशालिमुद्रायां स्थितः अस्ति अपरञ्च तस्य सैनिकाः तं परितः तिष्ठन्ति ।

चित्राणि 20 - सतीचौराघाट इति , कर्णपुरम्, सैमुअल-बूर्नेद्वारा, आकृष्टं चित्रम्, 1865 ।

सैमुअल-बूर्ने 1860 तमदशकस्य आरम्भे भारतम् आगतवान् तथा च सः कलकत्तायां बूर्ने-एण्ड-शेफर्ड-नाम्नः कस्यचित् छायाचित्रकारीय-छायाचित्रणालयस्य स्थपनाम् अकरोत् । अयं कलकत्तायाः च प्रसिद्धतम-छायाचित्रणालयः आसीत् । एतस्य चित्रस्य मेलनं द्वितीयचित्रेण सह कुर्वन्तु । अत्र भवन्तः द्रष्टुं शक्नुवन्ति यत् चित्रकाराः छायाचित्रकाराः च द्वौ एव विदीर्णभवनानां चित्रैः आकृष्टाः भवन्ति ।



चित्रम् 21 – बम्बयीमहानगरस्य कस्मिंश्चित् राजमार्गे राष्ट्रवादि-संप्रचलनम्, विकारद्वारा रचितं छायाचित्रम् ।

एकोनविंशतितमशताब्द्याः अन्तिमकालपर्यन्तं भारतीयछायाचित्रकाराः अपि भारतस्य विविधच्छवीनां दर्शकानि चित्राणि रचयितुम् आरब्धवन्तः आसन् । ते राष्ट्रवादिसंप्रचलनानां सभानां जनानां दैनिकजीवनाधारितानि च चित्राणि रचितवन्तः आसन् ।

चित्रम् 22 – विक्टोरिया-टर्मिनस, मुम्बानगरी।

एतस्य रेलस्थानस्य निर्माणं 1878 तमवर्षस्य 1887 तमवर्षस्य च मध्ये कृतम् आसीत्।

नवीनभवनानि नवीनशैल्यः च

ब्रिटिश-शासनेन सह वास्तुशैलिषु अपि परिवर्तनं सञ्जातम्। नवीननगराणां नवीनभवनानां च कृते नवीनशैलीः अङ्गीकृताः।

22 चित्रं पश्यन्तु। अत्र सूच्यग्रतोरणानि तादृशी च संरचना दृश्यते यत्र दैर्घ्ये बलं प्रदत्तम् अस्ति। इयं गाथिक-शैली इति कथ्यते। मुम्बानगर्याम् एकोनविंशतितमशताब्द्याः मध्यकाले निर्मितानि अधिकतरभवनानि अनया एव शैल्या निर्मितानि आसन्। अधुना एतस्य भवनस्य तुलनां 23 तमे चित्रे दृश्यमानभवनेन सह कुर्वन्तु। अत्र भवन्तः गोलतोरणानि स्तम्भान् च द्रष्टुं शक्नुवन्ति भिन्नवास्तुशैल्याः उदाहरणरूपेण एतत् अस्ति। आङ्ग्लीयाः कलकत्तामहानगरे एतादृश्याः शैल्याः प्रयोगं कृतवन्तः तथा च यूनानस्य रोमस्य च शास्त्रीयशैल्याम् आश्रिता इयं शैली आसीत्। आङ्ग्लीयाः इच्छन्ति स्म यत् तेषां भवनानि तेषां सत्तां वैभवं तेषां सांस्कृतिकोपलब्धिं च अभिव्यञ्जयेयुः।

चित्रम् 23 – सेंट्रल-पत्रालयः, कलकत्तामहानगरम्, 1860 तमदशके निर्मितम्।

राष्ट्रियकला-विषयकम् अनुसन्धानम्

एकोनविंशतितमशताब्द्याः अन्तिमेषु वर्षेषु कलायाः राष्ट्रवादस्य च मध्ये घनिष्ठसम्बन्धः स्थापितः जातः । अधुना नैके चित्रकाराः काञ्चित् एतादृशीं शैलीं विकासयितुम् आरब्धवन्तः या आधुनिकस्य भारतीयस्य च निकषानुसारं समीचीना स्यात्।

राष्ट्रिया शैली कथं परिभाषयितुं शक्यते स्म ?

राज्ञः रविवर्मणः कला –

राजा रविवर्मा तेषु आरम्भिकेषु चित्रकारेषु कश्चन आसीत् यः आधुनिक्याः राष्ट्रियकलाशैल्याः विकासाय योगदानम् अकरोत् । रविवर्मा केरले त्रावणकोरस्य महाराजानां वंशजः आसीत् तथा च सः राजा इत्यनेन सम्बोधनेन एव सम्बोध्यते स्म । सः तैलचित्रकलायाः यथार्थपरकस्य च जीवनाध्ययनस्य पश्चिमकलाविषये नैपुण्यम् अवाप्तवान् आसीत् परन्तु भारतीयपुराणानां चित्राणि अरचयत् । सः रामायणस्य महाभारतस्य च असङ्ख्यदृश्यानि शणपटे चित्रितवान् । राजा रविवर्मा बम्बयीराज्यं प्रति गतवान् तत्र सः पौराणिककथानां मञ्चनम् अपश्यत् ततः प्रेरितः भूत्वा सः तानि नाटकीयदृश्यानि रचितवान् । 1880 तमदशकादारभ्य रविवर्मणः पौराणिकचित्राणि भारतीयराजसङ्ग्राहलयेषु कलासङ्ग्राहलयेषु च अतीव लोकप्रियाणि जातानि आसन्। नृपाः स्वीयप्रासादानां भित्तिषु रविवर्मरचितानि चित्राणि बाहुल्येन चित्रितवन्तः आसन्।

चित्राणि 24 – कृष्णसंधानम्, राज्ञा रविवर्मणा रचितं चित्रम्।

एतादृशानि चित्राणि प्रति सर्वेषां जनानां महत् आकर्षणं पश्यन् रविवर्मा कस्यचित् चित्रनिर्माणगणस्य सङ्घटनम् अकरोत् तथा च बम्बयीमहानगरस्य बाह्यभागे एकस्य मुद्रणालयस्थापनस्य निर्णयम् अकरोत् । तत्र तेन रचितानां धार्मिकचित्राणां वर्णयुक्ताः प्रतयः व्यापकपरिमाणेन निर्मातुम् आरब्धाः । अधुना सामान्यजनाः अपि तेन द्वारा निर्मितानि न्यूनमूल्यकानि चित्राणि क्रेतुं शक्नुवन्ति स्म।

राष्ट्रियकलायाः भिन्नदृश्यानि –

बङ्गाले राष्ट्रवादिकलाकाराणां कश्चित् नवीनसमूहः रवीन्द्रनाथटैगोरस्य भ्रातुस्पुत्रम् अबनिन्द्रनाथटैगोरम्(1871-1951) आवृत्य अतिष्ठत् । एतस्य समूहस्य कलाकाराः अवदन् यत् रविवर्मणः कला अनुकरणाधारिता पाश्चात्यशैल्याः चास्ति इत्युक्त्वा ते निरस्तीकृतवन्तः तथा च रविवर्मणः विरोधिनः कलाकाराः घोषितवन्तः यत् एतादृशी कला-शैली राष्ट्रस्य प्राचीनाख्यानानां जनश्रुतीनां च चित्रणाय उपयुक्ता नास्ति। तेषां मतम् आसीत् यत् चित्रकलायाः यथार्था भारतीया शैली अपश्चिमकलापरम्परासु आधारिता न स्यात् तथा च सा पूर्वविश्वस्य आध्यात्मिकतत्त्वानां ग्रहणं कुर्यात् । अनेन प्रकारेण ते तैलचित्रकलायाः यथार्थपरकशैल्याः च समर्थनं न कृतवन्तः तथा च लघुचित्राणां

चित्रम् 25 – मम माता, अबनिन्द्रनाथ टैगोरद्वारा चित्रितम् (जलरङ्गम्)।

चित्रम् 26 – कालिदासरचिते मेघदूतनामके वर्णितस्य निर्वासितयक्षस्य चित्रम्, अबनिन्द्रनाथेन रचितं चित्रम्, (जलरङ्ग इति, 1904)।

अस्मिन् चित्रे कुहेडिकापूर्णा पृष्ठभूमिः वर्तते । लघुवर्णस्य कस्याश्चित् गाढरेखायाः च अनुपस्थितिः अपि स्पष्टतः द्रष्टुं शक्यते । इयं शैली प्रायः जापानीय-जलरङ्ग-भूदृश्यानां चित्रेषु प्रायः दृश्यते (पश्यन्तु 28 चित्रम्)।

➢ गतिविधिः

भवन्तः सप्तमकक्षायाः इतिहासस्य पाठ्यपुस्तके भारतीयलघुचित्राणां यानि दृश्यानि दृष्टवन्तः आसन् तानि 25 चित्रेण सह मेलयित्वा पश्यन्तु। किं भवन्तः अत्र काश्चित् समानताः प्राप्तुं शक्नुवन्ति ? द्वयोर्मध्ये भिन्नताम् अपि सूचयन्तु।

चित्रम् 27 – जातुगृहदाहः, (पाण्डवानां वनवासकाले लाक्षागृहज्वलनस्य चित्रम्), नन्दलालबोसद्वारा चित्रिम् (जलरङ्गम,1912)।

नन्दलालबोसः अबनिन्द्रनाथटैगोरस्य विद्यार्थी आसीत् । अस्मिन् चित्रे रेखानां लयपूर्णप्रवाहं, दीर्घहस्तान् भावमुद्राः च पश्यन्तु । अबनिन्द्रनाथः नन्दलालः च केवलं पुरातनशैलीनाम् एव अनुकरणं न कुर्वन्ति स्म अपि तु तौ पुरातनशैलीनां संशोधनम् अपि अकुरुतां तथा च स्वदृष्ट्या प्रयोगम् अपि कृतवन्तौ। अस्यां चित्रकलायां भवन्तः द्रष्टुं शक्नुवन्ति यत् कथं नन्दलालः स्वीयेषु चित्रेषु त्रि-आयामिप्रभावस्य उत्पादनाय छायाकरणस्य प्रयोगम् अकरोत् । अजन्तासम्बद्धेषु चित्रेषु भवन्तः इत्थं न दृष्टवन्तः स्युः ।

मध्यकालिक्या भारतीयपरम्परया अजन्तागुहासु निर्मितभित्तिचित्राणां प्राचीनकलया प्रेरणां प्राप्तुम् आरब्धवन्तः आसन् । एते जनाः एशियाकलान्दोलनस्य स्थापनायै तस्मिन् काले भारतस्य यात्रार्थं समागताः जापानीयकलाकारैः अपि प्रभाविताः आसन् ।

तेषु वर्षेषु विकसितायाः "भारतीयशैल्याः" नैकेषु चित्रेषु वयं विभिन्नानां चित्रात्मकतत्त्वानां संमिश्रणं द्रष्टुं शक्नुमः । उदाहरणार्थं, 25 चित्रं पश्यन्तु । अबनिन्द्रनाथटैगोरेण रचिते अस्मिन् चित्रे राजपूत-लघुचित्राणां प्रभावः द्रष्टुं शक्यते । 26 चित्रे जापानीयचित्राणां तथा च 27 चित्रे अजन्ताशैल्याः प्रभावः स्पष्टतया दृश्यते ।

काचित् यथार्था भारतीयशैली कीदृशी स्यात्, एतादृशविषयस्य निर्धारणाय प्रयासाः ततः परम् अपि अजस्रं प्राचलत् । 1920 तमदशकात् परं कलाकाराणां काचित् नवीनः वंशानुक्रमः दृष्टिपथम् आगतः यः अबनिन्द्रनाथटैगोरद्वारा स्थापितकलायाः पृथक् चिन्तनसमन्वितः आसीत् । तत्रापि केचन जनाः इयं शैलीं भावनात्मिकी अस्ति इति पश्यन्ति स्म अपरञ्च केचन मन्यन्ते स्म यत् आध्यात्मिकता भारतीयसंस्कृतेः केन्द्रीयबिन्दुः न भवितुं शक्नोति । तेषां मतम् आसीत् यत् कलाकाराः प्राचीनग्रन्थाधारितचित्राणि न रचयेयुः अपि तु वास्तविकजीवनं दृष्ट्वा तदाधारितचित्राणि च रचयेयुः इति तथा च प्राचीनकलारूपाणि परित्यज्य जीवितलोककलायाः जनजातीयप्रारूपैः च प्रेरणां स्वीकुर्युः । यथा यथा इत्थं चर्चाक्रमः अचलत्, कलायाः क्षेत्रे नवीनान्दोलनानि जातानि तथा च नैकाः नवीनाः कलाशैल्यः अपि प्रकाशपथम् आगताः ।

अन्यत्र –

काकुजो एशिया-कला-आन्दोलनं च

1904 तमे वर्षे ओकाकुरा-काकुजो जापाने कस्यचित् पुस्तकस्य प्रकाशनम् अकरोत् यस्य नाम आसीत् "पूर्वस्य आदर्श" इति (The ideals of the east) । इदं पुस्तकं स्वीयायाः प्रथमपङ्क्तेः कारणात् अतीव प्रसिद्धं जातम् आसीत् । सा पङ्क्तिः आसीत् – "एशिया एकः अस्ति" ओकाकुरायाः कथनम् आसीत् यत् पश्चिमद्वारा एशियायाः अपमानः कृतः अस्ति तथा च एशियाराष्ट्रैः सङ्घीभूय पश्चिमप्रभुत्वस्य विरोधः करणीयः ।

चित्रम् 28 – षोडशशताब्द्यां हासेगावा-तोहाकुद्वारा चित्रिताः देवदारु-वृक्षाः ।

ओकाकुरा जापानीयकलाम् आधारीकृत्य शोधकार्यम् अकरोत्, तथा च तस्मिन् काले जापानीयकलायाः परम्परागतप्रविधीनां संरक्षणस्य आवश्यकताविषये बलं प्रदत्तवान् यस्मिन् काले ते परम्परागतप्रविधयः पश्चिमशैलीकारणात् ह्रासपथं गच्छन्ति स्म । सः आधुनिककलां परिभाषयितुं प्रयासम् अकरोत् तथा च परम्पराणां संरक्षणाय तासां च आधुनिकीकरणं कर्तुं किं करणीयमिति विषये चिन्तितवान् । सः प्रथमस्य जापानीय-कला-शिक्षण-संस्थानस्य प्रधानसंस्थापकः आसीत् ।

ओकाकुरामहोदयः शान्तिनिकेतनं प्रति भ्रमितुम् आगतवान् आसीत् तथा च रवीन्द्रनाथटैगोरम् अबनिन्द्रनाथटैगोरं च गहनतया प्रभावितवान् आसीत् ।

आयान्तु कल्पनां कुर्मः

कल्पनां कुर्वन्तु यत् भवन्तः चित्रकाराः सन्ति तथा च विंशतितमशताब्द्याः आरम्भिके काले कस्याश्चित् राष्ट्रियचित्रशैल्याः विकासाय प्रयत्नं कुर्वन्ति । अस्मिन् अध्याये येषां तत्त्वानां विषये चर्चा कृता अस्ति तेषु भवन्तः कानि तत्त्वानि निजशैल्यां समायोजयिष्यन्ति ? भवद्भिः चितस्य अंशस्य कारणम् अपि सूचयन्तु।

पुनः स्मरन्तु –

1. रिक्तस्थानानि पूरयन्तु ---

क) यया कलाशैल्या सावधानं वस्तूनि दृष्ट्वा तेषां यथावत् चित्राणि निर्मीयन्ते सा------ उच्यते।

ख) यैः चित्रैः भारतीय-भू-दृश्यानि विचित्राणि अलौकिकानि च दर्श्यन्ते सा शैली ----- उच्यते।

ग) यया चित्रशैल्या भारतवासिनां यूरोपीयजनानां सामाजिकजीवनं दर्श्यते स्म सा ------ उच्यते।

घ) येषु चित्रेषु ब्रिटिशसाम्राज्यवादि-इतिहासस्य तस्य विजयस्य च दृश्यानि दर्श्यन्ते स्म तानि ---- कथ्यन्ते।

2. सूचयन्तु यत् निम्नलिखितासु काः काः विधाः शैल्यः च आङ्ग्लीयजनानां माध्यमेन भारतम् आगतवत्यः।

(क) तैलचित्रम् (ख) लघुचित्रम्

(ग) आदिमाकार-छायाचित्रम् (घ) परिप्रेक्ष्यविधायाः प्रयोगः

(च) भित्तिचित्रम्

3 . अस्मिन् अध्याये प्रदत्तस्य कस्यचित् एतादृशस्य चित्रस्य निजशब्दैः वर्णनं कुर्वन्तु यत्र दर्शितम् अस्ति यत् आङ्ग्लीयाः भारतीयानाम् अपेक्षया बलवत्तराः आसन्। कलाकारैः इदं तथ्यं कथं दर्शितम् ?

4. सारण-चित्र-माध्यमस्य (खर्रा) चित्रकाराः कुम्भकार-चित्रकाराः कालीघाटं किमर्थम् आगतवन्तः ? ते नवीनविषयेषु चित्ररचनां किमर्थम् आरब्धवन्तः ?

5. राज्ञः रविवर्मणः चित्राणि राष्ट्रवादभावनायुक्तानि चित्राणि सन्ति इति किमर्थं कथयितुं शक्यते ?

आयान्तु विचारं कुर्मः -

(6) भारते ब्रिटिश-इतिहासस्य चित्रेषु साम्राज्यवाद-विजेतृणां दृष्टिः कथं दर्श्यते स्म ?

(7) भवताम् अनुसारं केचन कलाकाराः कस्याश्चित् राष्ट्रियकलाशैल्याः विकासं किमर्थम् इच्छन्ति स्म ?

(8) कैश्चित् चित्रकलाकारैः न्यूनमूल्यकानि मुद्रितचित्राणि किमर्थं रचितानि ? एवंविधचित्राणां दर्शनेन जनानां मनस्सु कीदृशाः प्रभावाः जायन्ते स्म ?

आयान्तु कृत्वा पश्यामः –

(9) आत्मानं परितः विद्यमानायाः कस्याश्चित् परम्परागतकलाशैल्याः विषये अवधानं कुर्वन्तु। अवजानन्तु यत् गतपञ्चाशत् वर्षेषु तत्र कानि कानि परिवर्तनानि जातानि ? भवन्तः एतत् अपि ज्ञातुं शक्नुवन्ति यत् एते कलाकाराः कैः जनैः साहाय्यं प्राप्तवन्तः तथा च तेषां कलां के जनाः पश्यन्ति ? शैलीषु दृश्येषु च जातपरिवर्तनानां विषये अवश्यमेव अवधानं कुर्वन्तु।

11 राष्ट्रियान्दोलनस्य सङ्घटनम्
1870 तमदशकात् 1947 तमवर्षपर्यन्तम्

चित्रम् 1 – भारत छोडो इत्यान्दोलन-काले प्रदर्शनकारिषु आरक्षकाः अश्रुगैसगोलकान् मुञ्चन्तः सन्ति।

गतेषु अध्यायेषु वयं निम्नलिखितविषयाणाम् अध्ययनं कृतवन्तः –

- भारतीयभूक्षेत्रे आङ्ग्लीयैः कृतः अधिकारः तथा च राज्यानाम् अधिग्रहणम्,
- नवीनाधिनियमानां प्रशासकीयसंस्थानां च आरम्भः,
- कृषकाणाम् आदिवासिनां च जीवने परिवर्तनम्,
- एकोनविंशतितमशताब्द्यां जातानि शैक्षणिकपरिवर्तनानि,
- महिलानां स्थितिसम्बद्धाः वादाः विवादाः च,
- जातीय-व्यवस्था-सम्बद्धानि आह्वानानि,
- सामाजिकानि धार्मिकानि च संशोधनानि,
- 1857 तमवर्षीयः विद्रोहः तदनन्तरकालिकी च स्थितिः,
- हस्तकलानां पतनम् अथ च उद्योगानां विकासः,

एतासाम् उपर्युक्तघटनानां विषये भवद्भिः यत् अधीतम्, तदाधारेण किं भवन्तः एवम् अनुभवन्ति यत् भारतीयाः जनाः ब्रिटिशशासनात् असन्तुष्टाः आसन्? यदि आम्, तर्हि विभिन्नसमूहाः वर्गाः च किमर्थम् असन्तुष्टाः आसन्?

राष्ट्रवादस्य उदयः

उपर्युक्तपरिवर्तनैः जनाः कस्यचित् कठिनप्रश्नस्य विषये चिन्तयितुं बाध्याः कृताः – अयं देशः किम् अस्ति ? कस्य कृते च अस्ति ? एतादृशप्रश्नानाम् उत्तरं शनैः शनैः अनेन रूपेण दृष्टिपथम् आगतम् – भारतम् इत्यस्य शब्दस्य अर्थः अस्ति अत्रत्यजनता अर्थात् भारतीयजनाः। भारतदेशः अत्र जातस्य, अत्रत्यवासिनः, कस्मिन् अपि वर्गविशेषे जातस्य, कीदृशस्य अपि वर्णयुक्तस्य, कस्य अपि सम्प्रदायसम्बद्धस्य, कस्याः अपि भाषाभाषिणः, कीदृशस्य अपि लिङ्गयुक्तस्य जनस्य यथार्थतः समस्तजनानां गृहम् आवासः वा अस्ति इति।

अयं देशः एतस्य च सम्पूर्णसंसाधनानि एतस्य च सम्पूर्णव्यवस्था तेषां सर्वेषां जनानां कृते अस्ति। अनेन उत्तरेण सह विषयः बुद्धिगतः जातः यत् आङ्ग्लीयाः भारतस्य संसाधनानाम् अत्रत्यजनानां जीवनानां च अधिग्रहणं कृतवन्तः तथा च यावत् पर्यन्तम् इदं नियन्त्रणं समाप्तं न भवति तावत्पर्यन्तं भारतदेशः अत्रत्यानां भारतीयानां च न भवितुं शक्नोति।

सम्प्रभुः – बाह्यहस्तक्षेपं विना स्वतन्त्ररूपेण प्रक्रमारम्भस्य क्षमता।

इयं चेतना 1850 तमवर्षात् परं संस्थापितेषु राजनैतिकसङ्घटनेषु च स्पष्टतया दृश्यते स्म। 1870 - 1880 तमदशकयोः स्थापितेषु राजनैतिकसङ्घटनेषु इयं चेतना इतोऽपि घनिष्ठा जाता आसीत्। एतेषां सङ्घटनानां नेतृत्वं प्रायः अधिवक्त्रादयः शिक्षितव्यवसायिनः कुर्वन्ति स्म। पूना-सार्वजनिक-सभा, इण्डियन एसोसिएशन,मद्रास महाजन सभा, बाम्बे रेजीडेंसी एसोसिएशन भारतीयराष्ट्रियकाङ्ग्रेस इत्यादीनि प्रमुखसङ्घटनानि आसन्।

पूना सार्वजनिक सभा इत्येतत् नाम सावधानं पश्यन्तु। सार्वजनिक इत्यस्य अर्थो भवति, सर्वेषां जनानाम्, अथवा सर्वेषां जनानां कृते इति। यद्यपि एतेषु नैकानि सङ्घटनानि देशस्य केषुचित् विशिष्टभागेषु कार्यं कुर्वन्ति स्म परन्तु तेषां स्वीयलक्ष्यं भारतस्य सर्वेषां जनानां लक्ष्यम् अस्ति इति सूचयन्ति स्म। तेषाम् अनुसारम्, तेषां लक्ष्यं कस्यचित् विशिष्टक्षेत्रस्य समुदायस्य वर्गस्य च लक्ष्यं न आसीत्। ते एतादृशेन चिन्तनेन सह कार्यं कुर्वन्ति स्म यत् जनाः सम्प्रभुता-सम्पन्नाः स्युः। सम्प्रभुता इति कश्चित् आधुनिकविचारस्य राष्ट्रवादस्य च आधारभूततत्त्वरूपेण भवति। एतानि सङ्घटनानि अनया धारणया प्रवर्तन्ते स्म यत् भारतीयजनता तेषां जीवनसम्बद्धानां प्रकरणानां विषये निर्णयं स्वीकर्तुं स्वतन्त्राः भवेयुः इति।

1870 – 1880 तमेषु शतकेषु ब्रिटिशशासनं प्रति असन्तोषः अतीव घनिष्ठः जातः। 1878 तमे वर्षे शस्त्राधिनियमः (आर्म्स एक्ट) पारितः यस्य माध्यमेन भारतीयानाम् आत्मरक्षायै शस्त्रस्थापनसम्बद्धः अधिकारः समाप्तिं नीतः। तस्मिन् एव वर्षे वर्नाक्यूलर-प्रेस– एक्ट इत्यपि पारितः येन ये सर्वकारस्य आलोचनं कुर्वन्ति स्म तेषां मौनं कारितम्। एतस्मिन् अधिनियमे प्रावधानम् आसीत् यत् यदि कस्मिंश्चित् वार्तापत्रे काचित् आपत्तिजनकवार्त्तायाः प्रकाशनं भवति तर्हि सर्वकारः तस्य प्रकाशकस्य मुद्रणयन्त्रसहितायाः सम्पूर्णसम्पत्तेः अधिग्रहणम् आहरणं च कर्तुं शक्नोति स्म। 1883 तमवर्षे सर्वकारः इल्बर्ट-विधेयकः कार्यं कुर्यात् इति दिशि प्रयासम् अकरोत्। एतं विषयम् अधिकृत्य जनाः कोलाहलं कृतवन्तः। एतस्मिन् विधेयके प्रावधानं कृतम् आसीत् यत् भारतीयन्यायाधीशाः अपि ब्रिटिशान् यूरोपीयान् च जनान् उद्दिश्य अभियोगान् प्रवर्तयितुं शक्नुवन्ति यतः भारते कार्यकर्तृणाम् आङ्ग्लीयानां भारतीयानां च न्यायाधीशानां मध्ये समानतायाः स्थापना भवितुं शक्नुयात्। यदा आङ्ग्लीयानां विरोधकारणात् सर्वकारः एतं विधेयकं प्रतिस्वीकृतवान् तदा भारतीयाः एतस्य विषयस्य अतीव विरोधम् अकुर्वन्। अनया घटनया भारते आङ्ग्लीयानां यथार्थप्रवृत्तेः अवगमनं भवति स्म।

अधीतविद्यानां भारतीयानां कस्यचित् अखिलभारतीयसङ्घटनस्य आवश्यकता 1880 तमवर्षात् एव अनुभूयते स्म परन्तु इल्बर्ट-विधेयकेन इच्छा प्रबलतमा कृता। 1885 तमे वर्षे आदेशं 72 प्रतिनिधयः मुम्बानगर्यां सभां कृत्वा भारतीय-राष्ट्रिय-काङ्ग्रेसस्य स्थापनायाः निर्णयं कृतवन्तः। सङ्घटनस्य प्रारम्भिकनेतारः दादा-भायी-नौरोजी, फिरोजशाह-मेहता, बदरूद्दीन-तैयब-जी, डब्ल्यू.सी.बैनर्जी, सुरेन्द्रनाथ-बैनर्जी, रोमेशचन्द्रदत्तः, एस.सुब्रह्मण्यमः, अय्यरः इत्यादयः अन्ये च प्रायः मुम्बानगरीयाः कलकत्तावासिनः च आसन्। नौरोजी व्यवसायी प्रचारकः च आसीत्। सः लन्दननगरे निवसति स्म तथा च अल्पावधये ब्रिटिशसंसदः सदस्यरूपेण अपि आसीत्। सः युवराष्ट्रवादिनां मार्गदर्शनम् अकरोत्। सेवानिवृत्तः ब्रिटिशाधिकारी ए.ओ.ह्यूमः अपि विभिन्नक्षेत्राणां भारतीयजनान् सङ्घीकर्तुम् अतीव साहाय्यम् अकरोत्।

प्रचारकः – एतादृशः जनः यः सूचनानां प्रसारेण समाख्यया गोष्ठीषु च भाषणादिमाध्यमेन कस्यचित् विशिष्टविचारस्य प्रचारं प्रसारं च करोति।

स्रोतः – 1

काङ्ग्रेस इति दलं कस्य पक्षे प्रतिपादयितुं प्रयासं करोति स्म ?

1886 तमवर्षस्य जनवरीमासे दि इण्डियन मिरर इत्यस्मिन् वार्त्तापत्रे प्रकाशितम् –

मुम्बानगर्याम् आयोजितः प्रथम-राष्ट्रिय-काङ्ग्रेस इति कार्यक्रमः अस्माकं देशस्य भाविसंसदः केन्द्ररूपेण अस्ति तथा च अयं कार्यक्रमः अस्माकं देशवासिनां कृते अकल्पनीयरूपेण लाभकारिपरिणामान् उत्पादयिष्यति।

बदरूद्दीन-तैयबजी 1887 तमे वर्षे अध्यक्षरूपेण काङ्ग्रेस इति सभां सम्बोधयन् अवदत् –

एतस्य काङ्ग्रेस इति संस्था भारतस्य कस्यचित् एकस्य वर्गस्य समुदायस्य च प्रतिनिधिभिः मिलित्वा न सङ्घटिता अस्ति अपि तु इयं भारतस्य सर्वेषां समुदायानां संस्था अस्ति।

चित्रम् 2 – दादा-भायी-नौरोजी।

नौरोजी इत्यस्य पुस्तकस्य पावर्टी एण्ड अन-ब्रिटिश रूल इन इण्डिया इत्यस्मिन् ब्रिटिशशासनस्य आर्थिकपरिणामानां तीक्ष्णतया आलोचनं कृतम् आसीत्।

उदीयमानं राष्ट्रम्-

प्रायः उच्यते यत् प्रारम्भिकेषु स्वीयेषु विंशतिवर्षेषु काङ्ग्रेस इति दलं स्वीयोद्देश्यस्य उपायानां च कारणात् मध्यमार्गिदलम् इति आसीत्। एतस्मिन् काले काङ्ग्रेसेन सर्वकारे शासने च भारतीयाः बाहुल्येन तत्र युक्ताः स्युः इत्यर्थं घोषणं कृतम्। काङ्ग्रेसस्य आग्रहः आसीत् यत् विधानपरिषत्सु भारतीयाः अधिकाधिकस्थानं प्राप्नुयुः, परिषदां पार्श्वे अधिकाः अधिकाराः स्युः तथा च येषु प्रान्तेषु परिषदः न सन्ति तत्रापि परिषदां स्थापनं स्यात्। काङ्ग्रेस इति दलम् इच्छति स्म यत् सर्वकारीयतन्त्रे भारतीयाः उच्चपदासीनाः स्युः। एतदर्थं तेन अभ्यर्थितं यत् प्रशासनिकसेवाकार्यार्थम् आयोज्यमाना परीक्षा लन्दनेन सह भारते अपि आयोजिता स्यात् इति।

➢ गतिविधिः

आरम्भात् एव काङ्ग्रेसदलं सर्वेषां भारतीयजनानां पक्षे तथा च तेषां पक्षतः विषयप्रतिपादनस्य सङ्कल्पम् अभिव्यञ्जयति स्म। काङ्ग्रेसदलेन इत्थं किमर्थं कृतम् ?

निरस्तीकरणम् – कस्यचित् अधिनियमस्य समाप्तीकरणम्, कस्यचित् अधिनियमस्य वैधतायाः अधिकृतरूपेण समापनम्।

शासनव्यवस्थायाः भारतीयकरणं स्यात् इत्येतादृशी अभ्यर्थना जातिवादं विरुध्य जायमानान्दोलनस्य भागरूपेण आसीत् यतो हि तस्मिन् काले अधिकतर-महत्त्वपूर्ण-पदेषु प्रशासनिकसेवासु च आङ्ग्लीयाधिकारिणः एव कार्यरताः आसन्। आङ्ग्लीयाः प्रायः चिन्तयन्ति स्म यत् भारतीयानां महत्त्वपूर्णपदेषु नियुक्तिः न भवितुं शक्नोति। यतः आङ्ग्लीयाधिकारिणः स्वीयवेतनस्य अधिकभागं ब्रिटेनं प्रति प्रेषयन्ति स्म अतः भारतीयकरणेन अत्रत्यसम्पत्तिः भारते एव स्थास्यति इति। भारतीयाः अभ्यर्थयन्ति स्म यत् न्यायपालिका कार्यपालिकातः पृथक् रूपेण कार्यं कुर्यात्, शस्त्राधिनियमस्य समाप्तिः (निरस्तीकरणं) स्यात् अभिव्यक्तेः भाषणस्य च स्वतन्त्रता स्यात्।

आरम्भिकेषु वर्षेषु काङ्ग्रेसदलेन नैकानि आर्थिकप्रकरणानि अपि समुपस्थापितानि। तस्य कथनम् आसीत् यत् भारते ब्रिटिश शासनस्य कारणात् एव निर्धनता दुर्भिक्षं चास्ति। अत्यधिक-कराधानेन कृषिजीविनः भूस्वामिनः च विपन्नाः जाताः आसन् तथा च अन्नानां व्यापकनिर्यातकारणात् खाद्यपदार्थानाम् अभावः जातः। काङ्ग्रेस इति दलस्य अभ्यर्थनम् आसीत् यत् राजस्वं न्यूनं स्यात्, सैन्यव्ययः न्यूनः स्यात् तथा च कृषिसेचनाय अधिकानुदानराशेः प्रावधानं स्यात्। काङ्ग्रेसदलेन लवणराजस्वस्य, विदेशेषु भारतीयश्रमिकैः सह क्रियमाणस्य दुर्व्यवहारस्य, भारतीयानां कार्येषु बाधकभूतस्य वनप्रशासनस्य कारणात् वनवासिजनानां समक्षं जायमानसमस्यानां च विषये नैकविधेयकाः (प्रस्तावाः) पारिताः। एतस्मात् ज्ञायते यत् काङ्ग्रेसदलं साक्षर-सम्पन्न-वर्गीय-जनानां संस्थायां सत्याम् अपि काङ्ग्रेसदलेन केवलम् उद्योगपतीनां व्यवसायिक-समवायानां भूस्वामिनां पक्षे एव कार्यं न कृतम्।

मध्यमार्गिनेतारः जनतां ब्रिटिशशासनस्य अन्यायपूर्णचरित्रस्य विषये अवगमयितुम् इच्छन्ति स्म। ते वार्त्तापत्राणां प्रकाशनं कृतवन्तः, लेखान् लिखितवन्तः, तथा च एतत् प्रमाणीकर्तुं प्रयत्नं कृतवन्तः यत् ब्रिटिशशासनेन देशः आर्थिकनाशं प्रति नीयते। ते स्वीयवक्तव्यैः ब्रिटिशशासनस्य निन्दां कृतवन्तः तथा च जनमतनिर्माणाय देशस्य विभिन्नभागान् प्रति स्वीयप्रतिनिधीः प्रेषितवन्तः। परन्तु मध्यमार्गिणः नेतारः इत्थम् अपि अनुभवन्ति स्म यत् आङ्ग्लीयाः स्वतन्त्रतायाः न्यायस्य च आदर्शानां सम्मानं कुर्वन्ति अतः ते भारतीयानां न्यायसङ्गताः अभ्यर्थनाः नूनं स्वीकरिष्यन्ति। परिणामतः, काङ्ग्रेसदलस्य मतम् आसीत् यत् सर्वकारः भारतीयजनानां भावनाः विचारान् च अवगच्छेत् तदर्थं सर्वकाराय सूचना दातव्या इति।

"स्वतन्त्रता अस्माकं जन्मसिद्धः अधिकारः अस्ति"

1890 तमदशकपर्यन्तम् अस्माकं नैके जनाः काङ्ग्रेसदलस्य राजनैतिक-कार्य-प्रक्रिया-विषये प्रश्नान् समुपस्थापयितुम् आरब्धवन्तः। बङ्गाले पञ्जाबे महाराष्ट्रे च बिपिनचन्द्रपाल- बालगङ्गाधरतिलक-लालालाजपतराय-सदृशाः नेतारः आधिक्येन आमूलं परिवर्तनवादिनाम् उद्देश्यानां पद्धतीनां च अनुरूपं कार्यं कर्तुम् आरब्धवन्तः आसन्। ते "निवदेनशीलराजनीतिः" इत्यस्य कृते शान्तिपथिकानां जनानाम् आलोचनां कृतवन्तः तथा च आत्मनिर्भरतायाः रचनात्मककार्याणां महत्त्वविषये सबलं प्रतिपादितवन्तः। तेषां कथनम् आसीत् यत् जनैः सर्वकारस्य "सत्यनिष्ठसंकल्पेषु" नैव अपि तु निजपौरुषे विश्वासः करणीयः, जनैः स्वराजार्थं योद्धव्यम्। तिलकेन उद्घोषितं – "स्वतन्त्रता अस्माकं जन्मसिद्धः अधिकारः अस्ति अपि च एतं प्राप्य एव विरंस्यामि" इति।

स्रोतः 2

डिनशॉवाचा नामकः कश्चित् मध्यमार्गी नेता 1887 तमे वर्षे नौरोजिनं सम्बोधयन् अलिखत् –

> अद्यत्वे फिरोजशाहः व्यक्तिगतकार्येषु अतीव व्यस्तः अस्ति --। ते जनाः तु पूर्वमेव अतीव धनाढ्याः सन्ति ---। तेलङ्गमहोदयः अपि व्यस्तः भवति। अहं न अवगच्छामि यदि सर्वे जनाः सुवर्णस्य अभिलाषेण एतावन्तः व्यस्ताः भविष्यन्ति तर्हि देशस्य प्रगतिः कथं भवितुं शक्नोति ?

➢ गतिविधिः

उपर्युक्तटिप्पण्याः आधारेण आरम्भिककाङ्ग्रेसस्य विषये कासां समस्यानां विषये ज्ञानं भवति ?

1905 तमे वर्षे वायसराज-कर्जनः बङ्गालस्य विभाजनम् अकरोत् । तस्मिन् काले बङ्गालप्रान्तः ब्रिटिशकालिकभारतस्य बृहत्तमः प्रान्तः आसीत् । बिहारोडीसाप्रान्तयोः केचन भागाः अपि तस्मिन् काले बङ्गालस्य भागरूपेण आसन् । आङ्ग्लीयानां कथनम् आसीत् यत् प्रशासकीयसौविध्यं मनसि निधाय बङ्गालविभाजनम् आवश्यकम् अस्ति । परन्तु एतस्याः "प्रशासकीयसौविध्यस्य" अभिप्रायः कः आसीत् ? अनेन केषां लाभः आसीत् ? स्पष्टम् अस्ति यत् अनेन आङ्ग्लीयाधिकारिणां वणिजां चैव लाभः आसीत् । परन्तु सर्वकारेण अबङ्गालीयक्षेत्राणि न पृथक्कृतानि अपि तु बङ्गालस्य पूर्वभागाः पृथक्कृत्वा असमप्रान्ते सम्मेलिताः । पूर्वबङ्गालस्य पृथक्करणस्य उद्देश्येषु आङ्ग्लीयानां प्रमुखोद्देश्यं एतत् स्यात् यत् बङ्गालीयराजनेतॄणां प्रभावे अङ्कुशः स्यात् तथा च बङ्गालजनतायाः ऐक्यभावः समाप्तिं गच्छेत् ।

चित्रम् 3 – बाल-गङ्गाधर-तिलकः । उत्पीठिकायां स्थापितस्य वार्त्तापत्रस्य नाम पश्यन्तु । तिलकद्वारा सम्पादितं मराठी-वार्त्तापत्रं केसरी इति ब्रिटिशशासनस्य प्रखरालोचकरूपेण जातम् आसीत् ।

बङ्गालस्य विभाजनेन आदेशं क्रोधभावाः परिवृत्ताः । मध्यमार्गिनाम् आमूलं परिवर्तनवादिनां काङ्ग्रेसस्य च सर्वैः दलैः एतस्य विरोधः कृतः । विशालजनसभानाम् आयोजनं कृतं तथा च विरोधाय संप्रचलानि आयोजितानि । जनप्रतिरोधस्य विरोधस्य च नवीनाः उपायाः आविष्कृताः । अनेन यः सङ्घर्षः प्रादुर्भूतः तत् स्वदेश्यान्दोलन-नाम्ना ख्यायते । इदम् आन्दोलनं बङ्गाले बलवत्तरम् आसीत् परन्तु अन्यक्षेत्रेषु अपि एतस्य व्यापकोद्घोषः अनुश्रुतः । उदाहरणार्थम्,

चित्रम् 4 – स्वदेशी इति आन्दोलनकाले सहस्राधिकाः जनाः सम्प्रचलनेषु सम्मेलयितुम् आरब्धवन्तः ।

चित्रम् 5 – लाला-लाजपतरायः ।

लाजपतरायः पञ्जाबस्य सुप्रसिद्धेषु राष्ट्रवादिषु कश्चन आसीत् । सः याचिकायाः निवेदनानां च राजनीतेः विरोधिनाम् आमूलं परिवर्तनवादिनां च गणस्य कश्चन प्रमुखनेता आसीत् । सः आर्यसमाजस्य अपि सक्रियः सदस्यः आसीत् ।

क्रान्तिकारिहिंसा – समाजे आमूलं परिवर्तनाय हिंसायाः उपयोगः ।

परिषद् – प्रशासकीय-परामर्शदातृ-प्रातिनिधिक-दायित्वानां निर्वहणार्थं मनोनीता निर्वाचिता वा काचित् संस्था ।

➢ **गतिविधिः**

अवजानन्तु यत् प्रथमविश्वयुद्धं केषां देशानां मध्ये अभवत् ?

आन्ध्रप्रदेशस्य (डेल्टा) नदीमुखद्वीप-क्षेत्रेषु एतत् वन्देमातरम् इत्यस्य आन्दोलनस्य नाम्ना ज्ञायते स्म ।

स्वदेश्यान्दोलनेन ब्रिटिशशासनस्य विरोधः कृतः तथा च स्वयंसहायता, स्वेदेशि-उद्यमः, राष्ट्रियशिक्षा, भारतीय-भाषा इत्येतेषाम् उपयोगः बाहुल्येन स्यात् तदर्थं कार्यं कृतम् । स्वराजस्य कृते आमूलं परिवर्तनं स्यात् तदर्थं कार्यकर्तृदलेन सबलं जनता निर्दिष्टा यत् ब्रिटिशसंस्थानाम् आङ्ग्लवस्तूनां च बहिष्कारः भवेत् । केचन जनाः ब्रिटिश-शासनम् उत्पाटयितुं "क्रान्तिकारिभिः क्रियमाणहिंसायाः " अपि समर्थकाः आसन् ।

विंशतितमशताब्द्याः प्रारम्भिकदशकेषु नैकाः अन्याः महत्त्वपूर्णघटनाः अपि जाता । 1906 तमवर्षे मुसलमान-भूस्वामिनां शासकानां च केनचित् समूहेन ढाकायाम् ऑल इण्डिया मुसलिम लीग इत्यस्य स्थापना कृता । लीग इत्यनेन बङ्गालविभाजनस्य समर्थनं कृतम् । लीगजनानाम् अभ्यर्थना आसीत् यत् मुस्लिमजनानां कृते कस्याश्चित् पृथक् निर्वाचिकायाः व्यवस्था भवेत् । 1909 तमे वर्षे सर्वकारेण उपर्युक्ताः अभ्यर्थनाः अङ्गीकृताः । अधुना परिषत्सु कानिचन आसनानि मुसलमान-प्रत्याशिनां कृते आरक्षितानि कृतानि एतादृशाः प्रत्याशिनः मुसलमान-मतदातृभिः एव चित्वा प्रेषणीयाः आसन् । एतस्मात् कारणात् मुसलिमराजनेतारः स्वीय-धार्मिक-समुदायस्य जनान् स्वीय-राजनैतिक-समर्थकान् कर्तुं प्रेरिताः जाताः ।

1907 तमे वर्षे काङ्ग्रेसदलं खण्डितं जातम् । मध्यमार्गिनेतारः बहिष्कारस्य राजनीतेः विरोधिनः आसन् । एवंविधजनानां मतम् आसीत् यत् एतदर्थं बलप्रयोगस्य आवश्यकता भवति बलप्रयोगः च समुचितः उपायः नास्ति । सङ्घटननाशात् परं काङ्ग्रेसदले मध्यमार्गिसमूहेन प्रभावः उत्पादितः अपरञ्च तिलकस्य अनुयायिनः अप्रत्यक्षरूपेण कार्यं कर्तुम् आरब्धवन्तः । 1915 तमवर्षस्य दिसम्बरमासे द्वयोः दलयोः पुनः एकदा ऐक्यभावः स्थापितः । ततः आगामिनि मासे काङ्ग्रेसस्य मुसलिमलीगस्य च मध्ये ऐतिहासिके लखनवु-सन्धौ हस्ताक्षराणि जातानि तथा च द्वाभ्याम् एव सङ्घटनाभ्यां देशे प्रातिनिधिक-सर्वकार-स्थापनार्थं सम्भूय कार्यकरणस्य निर्णयः कृतः ।

जनराष्ट्रवादस्य उदयः –

1919 तमवर्षात् परम् आङ्ग्लीयान् विरुध्य प्रवर्तमानसङ्घर्षः शनैः शनैः कस्यचित् जनान्दोलनस्य रूपेण परिवर्तयितुम् आरब्धः । कृषकाः, आदिवासिनः, विद्यार्थिनः महिलाः च व्यापकसङ्ख्यया अनेन आन्दोलनेन सम्मिलिताः जाताः । बहुधा औद्योगिकश्रमिकाः अपि आन्दोलने योगदानं कृतवन्तः । विंशतितमशतकात् आरभ्य केचन विशिष्टाः व्यावसायिकसमूहाः अपि काङ्ग्रेसदलाय सक्रियसमर्थनं दातुम् आरब्धवन्तः आसन् । इत्थं किमर्थम् अभवत् ?

प्रथमविश्वयुद्धस्य कारणात् भारतस्य आर्थिकराजनैतिकस्थितिः परिवृत्ता आसीत् । एतस्य युद्धस्य कारणात् ब्रिटिशभारतसर्वकारस्य रक्षाव्यये विपुलवृद्धिः जाता । एतदर्थं धनार्जनाय सर्वकारेण व्यक्तिगते आये व्यावसायिकलाभांशे च विपुलराजस्वं स्थापितम् । सैनिकव्यये वृद्धेः युद्धक-आपूर्तेः च कारणात् आवश्यकवस्तूनानां मूल्यस्य अधिकवर्धनं जातं तस्मात् सामान्यजनानां जीवनं कठिनं सञ्जातम् । अपरतः व्यावसायिकसमूहाः

युद्धकारणात् अपरिमितलाभांशम् अर्जयन्ति स्म । यथा भवन्तः सप्तमे अध्याये दृष्टवन्तः, अनेन युद्धेन औद्योगिकवस्तूनां (शणगोणी, वस्त्रं, कटः, इत्यादीनां) प्राप्तेः आकाङ्क्षाः वर्धिताः तथा च अन्यदेशेभ्यः भारतं प्रति आयातवस्तूनां परिमाणं न्यूनीकृतम् । अनेन प्रकारेण युद्धकाले भारतीयोद्योगानां विस्तारः जातः तथा च भारतीयव्यावसायिकसमूहाः विकासाय इतोऽपि अधिकान् अवसरान् याचितुम् आरब्धवन्तः ।

युद्धेन आङ्ग्लीयाः निजसैन्यविस्तारं कुर्युः इति एतदर्थं ते बाध्याः जाताः । कस्यचित् वैदेशिकयुद्धार्थं सैनिकानां नियुक्तये ग्रामजनाः बाध्याः क्रियन्ते स्म । नैके सैनिकाः युद्धे अन्यदेशेषु नियोजिताः । तेषु प्रतिनिवृत्तेषु सैनिकेषु नैके सैनिकाः युद्धात् परम् अवगतवन्तः यत् साम्राज्यवादिशक्तयः एशिया-अफ्रीकास्थ-जनानां च कथं शोषणं कुर्वन्ति । फलतः, एतादृशाः जनाः अपि भारते औपनिवेशिकशासनस्य विरोधं कर्तुम् आरब्धवन्तः आसन् ।

एतदतिरिच्य, 1917 तमे वर्षे रूसदेशे क्रान्तिः सञ्जाता । एतस्याः घटनायाः कारणात् कृषकाणां श्रमिकाणां च सङ्घर्षवार्त्ताः तथा च समाजवादिविचाराः व्यापकपरिमाणेन प्रसरन्तः आसन् यतः भारतीयराष्ट्रवादिनः नवीनप्रेरणां प्राप्तवन्तः ।

महात्मगान्धिनः आगमनम् –

प्रवर्तमाने घटनाचक्रे महात्मगान्धिः कस्यचित् राजेनेतुः रूपेण दृष्टिपथम् आयातः । यदा गान्धिः षट्चत्वारिंशद्वर्षीयः आसीत् तदा 1915 तमे वर्षे सः दक्षिणाफ्रीकातः भारतं प्रत्यागतवान् । सः तत्र जातिभेद-प्रतिबन्धान् विरुध्य अहिंसकान्दोलनं सञ्चालयति स्म तथा च अन्ताराष्ट्रियस्तरे तस्य मतं स्वीक्रियते स्म तथा च जनैः सः आद्रियते स्म । दक्षिणाफ्रीकीय-आन्दोलनानां कारणात् गान्धिः हिन्दुजनैः मुसलमानैः पारसिभिः ईसायिभिः गुजरातिजनैः तमिलैः उत्तरभारतीयैः उच्चवर्गीयवणिग्भिः अधिवक्तृभिः श्रमिकैः सर्वविधभारतीयैः च सह मेलितुम् अवसरं प्राप्तवान् ।

महात्मगान्धिः प्रथम-वर्षे सम्पूर्ण-भारतस्य भ्रमणं कृतवान् । तस्मिन् काले सः अत्रत्यजनानां तेषाम् आवश्यकतानां स्थितेः च विषये अवगतवान् । तस्य आरम्भिकप्रयासाः चम्पारण, खेडा, अहमदाबाद इत्येतेषां स्थानीयान्दोलनानां रूपेण दृष्टिपथं समागताः ।

चित्रम् 6 – नटाल-काङ्ग्रेसस्य संस्थापकाः, डरबन इति, दक्षिणाफ्रीका, 1895,

1895 तमे वर्षे अन्यैः भारतीयैः सह महात्मगान्धिः जातीयभेदभावस्य विरोधाय नटालकाङ्ग्रेसस्य स्थानपनाम् अकरोत् । किं भवन्तः चित्रे गान्धिनं परिचेतुं शक्नुवन्ति ? सः पृष्ठस्थपङ्क्तेः सर्वथा मध्ये प्रावारकं गलबन्धं (टाई) च धृत्वा दृश्यते ।

➢ गतिविधिः

जलियाँवालाबागहत्याकाण्डस्य विषये सूचनाः एकत्रीकुर्वन्ति । जलियाँवालाबाग इति किम् अस्ति ? अत्र कीदृशाः अत्याचाराः जाताः ? एते अत्याचाराः कथं जाताः ?

एतेषाम् आन्दोलनानां माध्यमेन तस्य राजेन्द्रप्रसादेन वल्लभभायीपटेलेन च सह परिचयः अभवत् । 1918 तमे वर्षे अहमदाबादे सः वस्त्रोद्योगस्य श्रमिकाणां कार्यबहिष्कारस्य साफल्येन नेतृत्वम् अकरोत् ।

आयान्तु, अधुना 1919 तमवर्षाद् आरभ्य 1922 तमवर्षाभ्यन्तरे जातानि कानिचन आन्दोलनानि गभीरतया पश्यामः ।

रॉलट-सत्याग्रहः

1919 तमे वर्षे गान्धिः आङ्ग्लीयैः सद्योजातेषु वर्षेषु पारितस्य रालट-अधिनियमं विरुध्य सत्याग्रहस्य आह्वानम् अकरोत् । अयं रॉलट इति अधिनियमः अभिव्यक्तेः स्वतन्त्रतासदृशानां मूलभूताधिकाराणाम् अङ्कुशाय आरक्षकेभ्यः च अधिकाधिकारप्रदानाय कल्पितः आसीत् । महात्मगान्धिः, मोहम्मदाली जिन्ना तथा च अन्ये नेतारः मन्यन्ते स्म यत् सर्वकारस्य पार्श्वे जनानाम् आधारभूतस्वतन्त्रतायाः प्रतिबन्धस्य कश्चित् अपि अधिकारः नास्ति । ते नेतारः अवदन् यत् एतत् "असुरकार्यं निरङ्कुशवादि कार्यं" च अस्ति । गान्धिः जनान् आहूतवान् यत् ते अस्य अधिनियमस्य विरोधाय 1919 तमवर्षस्य अप्रैलमासस्य षड् दिनाङ्कम् अहिंसकविरोधदिवसस्य रूपेण "अपमानम् एवं याचना" इत्यस्य

चित्रम् 7 – सः परिसरः यत्र जनरलडायरेण जनसभाम् उद्दिश्य गुलिकाप्रहाराः कारिताः । अनन्तरकालिके अस्मिन् चित्रे जनाः भित्त्यां जातानि गुलिकाचिह्नानि प्रति सङ्केतयन्ति ।

दिवसस्य च रूपेण आयोजयेयुः तथा च कार्यबहिष्कारम् अपि कुर्युः । आन्दोलनस्य आरम्भाय सत्याग्रहसभानां स्थापना जाता ।

रॉलटसत्याग्रहः ब्रिटिशसर्वकारं विरुध्य प्रथमः अखिलभारतीयसङ्घर्षः आसीत् यद्यपि अयं स्थूलरूपेण नगरपर्यन्तम् एव सीमितम् आसीत् । 1919 तमे वर्षे अप्रैलमासे सम्पूर्णे देशे स्थाने स्थाने संप्रचलनानि जातानि तथा च कार्यबहिष्कारस्य आयोजनम् अभवत् । सर्वकारेण एवंविधानाम् आन्दोलनानां नाशाय दमनकारिमार्गः अङ्गीकृतः । वैशाख्युत्सवे (13 अप्रिलमासे) अमृतसरे जनरलडायरद्वारा जलियांवालाबागमध्ये कृतं हत्याकाण्डम् एतादृशस्य एव दमनस्य भागरूपेण आसीत् । एतस्मिन् जनसंहारस्य सन्दर्भे रवीन्द्रनाथटैगोरः आत्मव्यथाम् आक्रोशं च प्रकटयन् नाइटहुड इत्याख्याम् उपाधिं प्रत्यार्पितवान् ।

नाइटहुड इति – ब्रिटिशराजस्य राज्ञ्याः च पक्षतः कस्मैचित् जनाय तस्य विशिष्टानां व्यक्तिगतसाफल्यानां जनसेवायाः च कृते प्रदीयमानः कश्चित् उपाधिविशेषः ।

रॉलटसत्याग्रहकाले जनानां प्रयासाः आसन् यत् ब्रिटिशशासनस्य विरोधाय हिन्दूनां मुसलमानानां च मध्ये घनिष्ठैक्यभावः स्यात् । महात्मगान्धिः अपि इत्थम् एव इच्छति स्म। तस्य मतम् आसीत् यत् भारतदेशः तेषां सर्वेषां जनानां देशः अस्ति ये अत्र निवसन्ति अर्थात् सर्वेषां हिन्दुजनानां मुस्लिमजनानाम् अन्येषां च सर्वेषां धर्मावलम्बिनां च इति। तस्य घनिष्ठाकाङ्क्षा आसीत् यत् हिन्दुमुस्लिमजनाः कस्यापि न्यायपूर्णोद्देश्यस्य कृते अन्योऽन्येषां समर्थनं कुर्युः।

खिलाफतान्दोलनम् असहयोगान्दोलनं च

खिफालत इत्यस्य आन्दोलनस्य विषयः एवंविधः एव कश्चन विषयविशेषः आसीत्। 1920 तमे वर्षे आङ्ग्लीयैः तुर्कीदेशस्य शासके (सुल्ताने) कश्चन दृढसन्धिः बलात् आरोपितः । जलियाँवालाबाग-हत्याकाण्डस्य घटनायाः इव एतस्याः घटनायाः विषये अपि भारतीयजनेषु व्यापकः आक्रोशः आसीत्। भारतीयाः मुस्लिमजनाः इदम् अपि इच्छन्ति स्म यत् पुरातने ऑटोमन-साम्राज्ये स्थितेषु पवित्रेषु मुस्लिमस्थानेषु राज्ञः (खलीफा) एव नियन्त्रणं भवेत्। खिलाफत इत्यस्य आन्दोलनस्य नेता मोहम्मदः अली, शौकतः अली च अधुना कस्यचित् सर्वव्यापिनः असहयोग इत्यस्य आन्दोलनस्य आरम्भं कर्तुम् इच्छतः स्म । गान्धिः तयोः आह्वानस्य समर्थनम् अकरोत् तथा च काङ्ग्रेसदलं साग्रहं निवेदितवान् यत् काङ्ग्रेसनेतारः पञ्जाबप्रान्ते जातानाम् अत्याचाराणां (जलियाँवालाबाग-हत्याकाण्डम्) खिलाफत इत्यस्य च विषये जातात्याचारस्य विरोधाय मिलित्वा अभियानानि सञ्चालयेयुः स्वराजसम्बद्धां च अभ्यर्थनां कुर्युः।

1921 – 1922 तमवर्षयोः असहयोगान्दोलनम् अधिकगतिशीलं जातम् । सहस्राधिकाः विद्यार्थिनः सर्वकारीयान् विद्यालयान् महाविद्यालयान् च त्यक्तवन्तः । मोतीलालनेहरुः, सी.आर.दासः, सी. राजगोपालाचारी, आसफाली इत्येतादृशाः अधिवक्तारः अधिवक्तृत्वं परित्यक्तवन्तः। आङ्ग्लीयैः प्रदत्ताः उपाधयः प्रत्यर्पिताः तथा च विधानमण्डलानां बहिष्कारः कृतः। स्थाने स्थाने जनाः वैदेशिकवस्त्राणि प्रज्वालितवन्तः। 1920 तमवर्षस्य 1922 तमवर्षस्य च मध्ये वैदेशिकवस्त्राणाम् आयाते विपुलन्यूनता आगता। परन्तु इदं तु भविष्यति काले आगम्यमानस्य झञ्झावातस्य किञ्चित् स्वल्पदृश्यम् आसीत्। देशस्य अधिकतराः भागाः कस्यचित् व्यापकविद्रोहस्य शिखरे स्थिताः आसन्।

जनैः कृतः आरम्भः –

नैकेषु स्थानेषु जनाः ब्रिटिशशासनस्य अहिंसकविरोधं कृतवन्तः। परन्तु नैकेषु स्थानेषु विभिन्नवर्गीयाः जनाः गान्धिद्वारा कृताह्वानस्य अभिप्रायः स्वीयदृष्ट्या गृहीतवन्तः तथा च एवंविधमार्गान् अङ्गीकृतवन्तः ये गान्धिनः विचारानुगुणं न आसन्। सर्वेषु स्थानेषु जनाः स्वीयान्दोलनानि स्थानीयप्रकरणैः सह मेलयित्वा अग्रे सारितवन्तः । आयान्तु, एतादृशानाम् उदाहरणानां विषये विचारं कुर्मः।

खेडा, गुजरात इत्यनयोः स्थानयोः पाटीदारकृषकाः आङ्ग्लीयैः निर्धारितम् अधिकराजस्वं विरुध्य अहिंसकाभियानं सञ्चालितवन्तः । तटीयान्ध्रप्रदेशस्य तमिलनाडुप्रान्तस्य च आन्तरिकभागेषु मद्यशालानां प्रतिबन्धः कृतः। आन्ध्रप्रदेशस्य गुण्टूरजनपदे आदिवासिनः निर्धनकृषकाः च नैकान् "वन-सत्याग्रह" इत्येतान् कार्यक्रमान् आयोजितवन्तः । एतेषु सत्याग्रहेषु नैकधा ते चारण-शुल्कम् अदत्त्वा एव स्वीयपशून् वनेषु चरणाय प्रापयन्ति स्म।

स्रोतः 3

पीडायाः चिरन्तन-सिद्धान्तः

अहिंसा इत्यनेन गान्धिनः कः आशयः आसीत् ? अहिंसा कस्यचित् सङ्घर्षस्य आधारः कथं भवितुं शक्नोति स्म ? एतस्मिन् विषये गान्धिनः एतत् कथनम् आसीत् – प्रतिफलं स्वल्पाम् अपि इच्छाम् अकृत्वा अजस्रं सुकार्यकरणेन अहिंसायाः आविर्भावः भवति ---। इदम् एव अहिंसायाः अमूल्यस्वरूपम् अस्ति--- । दक्षिणाफ्रीकायाम्--- अहम् अन्यायस्य अत्याचारस्य च रोधनं स्यात् इत्यनेन उद्देश्येन पीडायाः अनन्तसिद्धान्तम् अवगतवान् । एतस्य सकारात्मकः आशयः अहिंसा इत्यनेन अस्ति । एतदर्थं भवद्भिः केनापि जनेन क्रियमाणायाः हिंसायाः सहनाय सहर्षं सज्जीभवितव्यं तथा च भवन्तः कम् अपि जनं प्रति दुर्भावनां मनसि न धारयिष्यन्ति, भवद्भिः सह ये दुर्व्यवहारं कुर्वन्ति तान् प्रति अपि भवन्तः द्वेषभावं न धरन्ति।

महात्मगान्धिः, 12 मार्चमासः, 1938।

परिवेष्टनम् (उपरोधनम्) (घेरेबन्दी) – जनाः कमपि आपणं भवनं च न प्रविशेयुः इति तेषां वारणाय क्रियमाणं विरोधप्रदर्शनम्।

मठाधीशः (महंत) – सिक्खगुरुद्वाराणां धार्मिकः प्रमुखः।

अवैधानिकः हस्तक्षेपः - आविहितभयात् निरूपितमूल्येन येभ्यः जनेभ्यः भूमिः प्रदत्ता आसीत् बलपूर्वकं तादृश-जनानां तस्याः भूमेः अवैधानिकरूपेण निष्कासनम्।

ते एतदर्थं विरोधं कुर्वन्ति स्म यतः औपनिवेशिकसर्वकारः वनसंसाधनेषु तेषाम् अधिकारान् अतीव सङ्कोचितान् सीमितान् च अकरोत्। ते विश्वसन्ति स्म यत् गान्धिः तान् उद्दिश्य नियोजितराजस्वं न्यूनीकारयिष्यति तथा च वनाधिनियमान् समापयिष्यति। नैकेषु वनग्रामेषु कृषकाः स्वराजस्य घोषणां कृतवन्तः यतः ते आशान्विताः आसन् यत् "गान्धिराजः" शीघ्रमेव स्थापितं भविष्यति।

सिन्धे (वर्तमान-पाकिस्थाने) मुसलिमवणिजः कृषकाः च खिलाफत इत्यस्य आन्दोलनस्य आह्वानेन अतीव उत्साहिनः आसन्। बङ्गाले अपि खिलाफत-असहयोग इत्यनयोः सङ्घटनेन प्रचण्डः साम्प्रदायिकः ऐक्यभावः प्रादुर्भूतः तथा च राष्ट्रियान्दोलनं च ततः नवीनशक्तिसम्पन्नं जातम्।

पञ्जाबप्रान्ते सिक्खजनानाम् अकालिसङ्घटनैः आङ्ग्लीयानां साहाय्येन गुरुद्वारेषु आसीनान् भ्रष्टमठाधीशान् अपसारयितुम् आन्दोलनानि सञ्चालितानि। एतादृशम् आन्दोलनम् असहयोग-आन्दोलनेन अतीव घनिष्ठरूपेण संयुक्तः इति दृश्यते स्म। असमप्रान्ते "गान्धिमहाराजस्य जयः" इति उद्घोषयन्तः चाय-उद्यान-सम्बद्धाः श्रमिकाः स्वीयवेतनवृद्धये अभ्यर्थनाम् आरब्धवन्तः। ते आङ्ग्लीय-स्वामित्वयुक्तेषु उद्यानेषु सेवाकार्यं त्यक्तवन्तः। तेषां कथनम् आसीत् यत् गान्धिः अपि इदमेव इच्छति। तात्कालिकेषु नैकेषु असमीय-वैष्णवगीतेषु कृष्णस्य स्थाने "गान्धिराज" इत्यस्य यशोगानं कर्तुं जनाः आरब्धवन्तः।

जनतायाः महात्मा

एतेषाम् उदाहरणानाम् आधारेण वयं द्रष्टुं शक्नुमः यत् नैकेषु स्थानेषु जनाः गान्धिनं ईश्वरतुल्यरूपेण मन्तुम् आरब्धवन्तः आसन् ते अनुभवन्ति स्म यत् सः एव तान् सङ्कटेभ्यः निर्धनतातः च मोचयितुं शक्नोति। गान्धिः वर्गीयसङ्घर्षाणां स्थाने वर्गीयैक्यस्य समर्थकः आसीत्। परन्तु कृषकाः अनुभवन्ति स्म यत् गान्धिः भूस्वामिनं विरुध्य क्रियमाणे सङ्घर्षे तेषां साहाय्यं करिष्यति। कृषिजीविकृषकाः विश्वसन्ति स्म यत् गान्धिः तेभ्यः भूमिं दापयितुं शक्ष्यति। नैकधा सामान्यजनाः अपि स्वीयोपलब्धीनां कृते अपि गान्धिने श्रेयः दत्तवन्तः। उदाहरणार्थं, कस्यचित् शक्तिशालिनः आन्दोलनात् परं संयुक्तप्रान्ते (वर्तमाने उत्तरप्रदेशे) स्थिते प्रतापगढस्य कृषकाः भाटकरूपेण प्रदत्तभूमेः स्वामिभिः अवैधानिकहस्तक्षेपस्य उपरोधने साफल्यं प्राप्तवन्तः। परन्तु ते अनुभवन्ति स्म यत् गान्धिनः कारणात् ते साफल्यं प्राप्तवन्तः सन्ति। नैकधा गान्धिनः नाम स्वीकृत्य आदिवासिभिः कृषकैः च एतादृशाः प्रतिक्रियाः सम्पादिताः याः गान्धिनः आदर्शानुरूपं नासन् इति।



चित्रम् 8 – जनानां प्रतिनिधिरूपेण महात्मगान्धिः।
जनतामध्ये विख्यातेषु परिदृश्येषु अपि महात्मगान्धिः प्रायः कस्याश्चित् दैवीशक्तिरूपेण दर्श्यते स्म। एतस्मिन् चित्रे सः कृष्णसारथिरूपेण वर्तते। मार्गदर्शनं च करोति। सः आङ्ग्लीयान् विरुध्य जायमाने युद्धे अन्यराष्ट्रवादिनेतॄणां मार्गदर्शनं करोति।

"ते एव आसन् ये प्रतापगढे हस्तक्षेपम् उपरोधितवन्तः आसन्"

इलाहाबादजनपदे कृषकान्दोलने सीआईडीद्वारा 1921 तमवर्षे जनवरीमासे सज्जीकृतायाः समाख्यायाः कश्चन अंशः इत्थम् आसीत् –

दूरस्थग्रामेषु अपि गान्धिनः प्रभावः यावान् आसीत्, तावन्तं तं प्रभावं दृष्ट्वा आश्चर्यं भवति। कश्चित् अपि न जानाति यत् सः कः अस्ति किं च करोति ? पुनरपि सर्वे अङ्गीकृतवन्तः सन्ति यत् सः यत् वदति तत् सत्यमस्ति समुचितं चास्ति, तथा तस्य यः अपि आदेशः अस्ति सः सर्वैः पालनीयः एव इति । सः कश्चित् महात्मा उत साधुः पण्डितः इलाहाबादस्य च कश्चित् विप्रः, देवता च अस्ति इति कथने अपि अतिशयोक्तिः न स्यात्-- तस्य नामप्रभावः एतस्मात् अनुभवितुं शक्यते - प्रतापगढस्य जनाः मन्यन्ते यत् महात्मगान्धिनः एव तत्र अवैधानिकहस्तक्षेपः रोधितः आसीत्-- सामान्यतः जनाः गान्धिनं सर्वकारस्य विरोधी इति न मन्यन्ते अपि तु केवलं भूस्वामिनां विरोधी इति मन्यन्ते-- वयं गान्धिनः सर्वकारस्य च पक्षे स्मः ।

1922 – 1929 वर्षीयाः घटनाः ---

महात्मगान्धिः हिंसकान्दोलनानां विरोधी आसीत् । एतस्मात् कारणात् 1922 तमवर्षस्य फरवरीमासे यदा कृषकजनानां केनचित् जनसम्मर्देन चौरी-चौरा-आरक्षि-स्थानके आक्रमणं कृत्वा तस्य प्रज्वालनं कृतं तदा गान्धिः सहसा असहयोगान्दोलनं प्रतिस्वीकृतवान्। तस्मिन् दिने द्वाविंशतिः आरक्षकाः मृतवन्तः। कृषकाः एतस्मात् कारणात् अनियन्त्रिताः जाताः आसन् यतो हि आरक्षकाः तैः क्रियमाणे शान्तिपूर्णे संप्रचलने गुलिकाप्रहारान् कृतवन्तः ।

असहयोगान्दोलनस्य समाप्तेः परं गान्धिनः अनुयायिनः ग्रामीणक्षेत्रेषु रचनात्मककार्याणि ऊर्जया कर्तुम् आरब्धवन्तः । चितरञ्जनदासः तथा च मोतीलालनेहरुसदृशाः अन्ये नेतारः तर्कम् उपस्थापयन्ति स्म यत् दलीयपरिषदा निर्वाचनेषु भागः ग्रहीतव्यः तथा च परिषदां माध्यमेन सर्वकारीयनीतिषु प्रभावः समुत्पादनीयः । विंशतितमशतकस्य मध्यकाले ग्रामेषु कृतानां व्यापकसामाजिककार्याणां कारणात् गान्धिवादिनः स्वीयजनाधारं प्रसारयितुम् अतीव साहाय्यं प्राप्तवन्तः। 1930 तमे वर्षे कृतस्य सविनय-अवज्ञा-आन्दोलनस्य कृते अयं जनाधारः अतीव उपयोगी इति जातः ।

भारतीय-साम्यवादि-दलस्य हिन्दुसङ्घटनस्य राष्ट्रियस्वयंसेवकसङ्घस्य स्थापना विंशतितमशतकस्य मध्ये जाते द्वे महत्त्वपूर्णे घटने आस्ताम्। भारतस्य भविष्यत्कालं मनसि निधाय एतादृशानां दलानां चिन्तने व्यापकमतभेदः चिरात् अस्ति। स्वीयाध्यापकानां साहाय्येन तेषां विचाराणां विषये अवजानन्तु। तस्मिन् काले क्रान्तिकारि-राष्ट्रवादी भगतसिंहः अपि सक्रियः आसीत्। एतस्य शतकस्य

➢ गतिविधिः

चतुर्थं स्रोतसं पठन्तु।
एतस्याः समाख्यायाः अनुसारं जनाः महात्मगान्धिं केन रूपेण पश्यन्ति स्म। भवतां चिन्तनानुसारं जनाः इत्थं किमर्थं चिन्तयन्ति स्म यत् गान्धिः भूस्वामिनां विरोधी अस्ति परन्तु सर्वकारस्य विरोधी नास्ति। भवताम् अनुसारं जनाः गान्धिनः अनुयायिनः किमर्थम् आसन् ?

चित्रम् 9 - चितरञ्जनदासः।

स्वतन्त्रतान्दोलने चितरञ्जनदासः कश्चित् मुख्यनेता आसीत् । सः पूर्वबङ्गाले अधिवक्ता आसीत्। असहयोगान्दोलने सः अतीव सक्रियः आसीत्।

चित्रम् 10 – साइमनकमीशन इत्यस्य विरोधं कुर्वन्तः आन्दोलनकारिणः ।

1927 तमे वर्षे इङ्ग्लैण्डस्थः ब्रिटिशसर्वकारः लॉर्ड-साइमन इत्यस्य नेतृत्वे कञ्चित् आयोगं भारतं प्रति प्रेषितवान् । अनेन आयोगेन भारतस्य राजनैतिकभविष्यस्य निर्णयः करणीयः आसीत् । अस्मिन् आयोगे कश्चित् अपि भारतीयप्रतिनिधिः न आसीत् । एतादृशस्य निर्णयकारणात् भारतीयेषु अतीव असन्तोषः समुत्पन्नः । सर्वैः राजनैतिकसङ्घटनैः अपि आयोगस्य बहिष्कारस्य निर्णयः कृतः । यदा कमीशन इत्यस्य सदस्याः भारतं प्राप्तवन्तः तदा विरोधप्रदर्शनैः तेषां स्वागतं कृतम् । प्रदर्शनकारिणाम् उद्घोषः आसीत्, "साइमन भारतात् प्रतिगच्छ" ।

अन्तिमेषु वर्षेषु पूर्णस्वराजस्य प्रस्तावः पारितः । जवाहरलालनेहरोः अध्यक्षतायां 1929 तमे वर्षे पारितस्य एतस्य प्रस्तावस्य आधारेण 1930 तमे वर्षे जनवरीमासस्य 26 दिनांके सम्पूर्णदेशे "स्वतन्त्रतादिवसः" इत्यस्य आयोजनं कृतम् ।

चित्रम् 11 – हुतात्मा भगतसिंहः ।

बधिराणां जनानां श्रावणाय विस्फोटस्य आवश्यकता भवति ।
इङ्कलाब जिन्दाबाद !

हुतात्मा भगतसिंहः तस्य मित्राणि यथा क्रान्तिकारिणः राष्ट्रवादिनः च औपनिवेशिकशासनेभ्यः तथा धनिकशोषकवर्गेभ्यः योद्धुं श्रमिकैः कृषकैः च क्रान्तिम् इच्छन्ति स्म । एतत्कार्यं पूर्णतया कर्तुं ते 1928 तमे वर्षे देहलीस्थे फिरोजशाहकोटलामध्ये हिन्दुस्थान-सोशलिस्ट-रिपब्लिकन-एसोसिएशन (एचएसआरए) इत्यस्य स्थापनां कृतवन्तः । एचएसआरए इत्यस्य सदस्याः लालालाजपतरायम् उद्दिश्य दण्डप्रहर्तुः साण्डर्स इति नामकस्य आरक्षकाधिकारिणः हत्यां कृतवन्तः आसन् । एतस्य दण्डप्रहारस्य कारणात् अनन्तरकाले लाजपतरायस्य मृत्युः अभवत् ।

स्वीयेन राष्ट्रवादिमित्रेण बी.के.दत्तेन सह भगतसिंहः 1926 तमे वर्षे अप्रिलमासस्य अष्टदिनाङ्के केन्द्रीयविधानपरिषदि बमबिस्फोटनं कृतवान् । क्रान्तिकारिणः स्वीयपत्रे लिखितवन्तः आसन् यत् तेषाम् उद्देश्यं कस्यचित् हननं नास्ति अपितु "बधिराणां श्रावणम् अस्ति" तथा च वैदेशिकसर्वकारद्वारा क्रियमाणस्य भयानकशोषणस्य बोधनम् आसीत् । बिस्फोटनस्य आरोपिरूपेण भगतसिंहः राजगुरुः सुखदेवः च घोषिताः अतः तेषु अभियोगः सञ्चालितः अपि च भगतसिंहः राजगुरुः सुखदेवः च 1931 तमे वर्षे मार्चमासे 31 दिनाङ्के मृत्युदण्डेन दण्डिताः । तस्मिन् काले भगतसिंहः केवलः त्रयोविंशतिवर्षीयः आसीत् ।

दाण्डीमार्चं इति

पूर्णस्वराजस्य प्राप्तिः अनायासेन स्वयंमेव न भविष्यति। एतदर्थं जनैः सङ्घर्षः करणीयः आसीत्। 1930 तमे वर्षे गान्धिः अघोषयत् यत् सः नमक इत्यस्य अधिनियमस्य नाशाय यात्रां कृत्वा जनान् आन्दोलयिष्यति। तस्मिन् काले लवणोत्पादने विक्रयणे च सर्वकारस्य एकाधिकारः भवति स्म। महात्मगान्धिनः अन्येषां च राष्ट्रवादिनां कथनम् आसीत् यत् लवणे कराधानं पापम् अस्ति यतः अस्माकं भोजनस्य कश्चित् आधारभूतः भागरूपेण लवणः भवति। नमक-सत्याग्रहः स्वतन्त्रतायाः प्रबलेच्छां जनानां कस्यचित् विशिष्टदूषणेन सह योजितवान् तथा च अनेन प्रकारेण धनाढ्यानां निर्धनानां च मध्ये असौ मतभेदं न उत्पादितवान्।

गान्धिः तस्य अनुयायिनः च साबरमतीतः 240 किलोमीटरपरिमितदूरं स्थितं दाण्डी इत्येतं तटं प्रति पदातिः गतवन्तः तथा च तत्र ते तटे विकीर्णं लवणम् एकत्रीकुर्वन्तः नमक-अधिनियमस्य सार्वजनिकरूपेण उल्लङ्घनं कृतवन्तः।

चित्रम् 12 -महात्मगान्धिः प्राकृतिकलवणं सङ्गृह्णन् लवण-अधिनियमस्य अवहेलनं करोति, दाण्डी, 1930 तमे वर्षे, अप्रिलमासे 6 दिनाङ्के।

स्वतन्त्रता-सङ्घर्षे महिलाः – कर्णाटकस्य अम्बाबायी

राष्ट्रियान्दोलने पृथक् पृथक् पृष्ठभूमिकायुक्ताः नैकाः महिलाः भागं गृहीतवत्यः। युवत्यः वृद्धमहिलाः अविवाहिताः विवाहिताः ग्रामीण्यः नगरीयाः च महिलाः रूढिवादिनः उदारवादिनः सर्वविधात् च परिवेशात् आगत्य आन्दोलने भागं गृहीतवत्यः। स्वतन्त्रतासङ्घर्षः महिलान्दोलनं च महिलानां कृते चापि एतादृशी सहभागिता अतीव महत्त्वपूर्णा आसीत्।

आङ्ग्लीयाः अधिकारिणः भारतीयाः राष्ट्रवादिनः च द्वौ अपि अनुभवन्ति स्म यत् महिलानां सहभागितया राष्ट्रियसङ्घर्षः अत्यधिकबलं प्राप्नोत्। स्वतन्त्रतान्दोलनस्य कारणात् महिलाः गृहात् बहिर्भागं प्रति आगन्तुम् आरब्धवत्यः आसन्। आन्दोलनेन एव विभिन्नव्यवसायेषु शासनव्यवस्थायां च ताः स्थानं प्राप्तवत्यः तथा च पुरुषैः सह समानताभावम् अपि प्राप्तवत्यः।

महिलानां दृष्ट्या सहभागितायाः कः अर्थः आसीत् ? एतस्य सुप्रकारेण अभिव्यक्तिं महिलाः एव कर्तुं शक्नुवन्ति स्म। उदाहरणार्थम् – कर्णाटकस्य अम्बाबायीमहोदयायाः विवाहः तदा अभवत् यदा सा द्वादशवर्षीया आसीत्। यदा सः षोडशवर्षीया आसीत् तदा सा वैधव्यं प्राप्नोत्। सा उडीपी इत्यस्मिन् स्थाने वैदेशिकवस्त्राणां मद्यशालानां च बहिष्कारम् अकरोत्। सा निगृहीता तथा च दण्डिता। मोचितायां सत्यां सा पुनः निगृहीता। यदा अपि सा कारागारात् बाह्यभागं प्रति मुक्त्वा आयाति स्म सा सभाः सम्बोधयति स्म, वयनादिकार्याणां प्रशिक्षणं सञ्चालयति स्म तथा च प्रभातभ्रमणकार्यक्रमान् आयोजति स्म। अम्बाबायी एतादृशे कार्ये नियोजितकालम् एव स्वीयजीवनस्य सुखदं श्रेष्ठक्षणं च इति मन्यते स्म यतः एतादृशक्षणेषु सा कञ्चित् विशिष्टोद्देश्यं प्रतिबद्धतां च पश्यति स्म।

आन्दोलने महिलानाम् अपि सहभागितायाः अधिकारः स्यात् इत्येतदर्थं महिलाभिः अत्यधिकसङ्घर्षः करणीयः भवति स्म। उदाहरणार्थम् - , नमक-सत्याग्रह-काले आरम्भे स्वयं महात्मगान्धिः अपि एतस्य विषयस्य समर्थनं न करोति स्म यत् महिलानाम् अपि आन्दोलने सहभागिता स्यात् इति। अन्ततः सरोजिनीनायडूः महात्मगान्धिनम् एतत्तथ्यं प्रति सज्जीकृतवती यत् महिलाः अपि आन्दोलने सहभागितां कुर्युः इति।

चित्रम् 13 – महात्मगान्धिना सह सरोजिनीनायडूः, पेरिसम्, 1931।

1920 तमस्य शतकस्य आरम्भिककालात् एव राष्ट्रियान्दोलने सक्रिया नायडूः दाण्डीयात्रायाः मुख्यनेतृषु काचित् आसीत् । भारतीयराष्ट्रियकाङ्ग्रेसस्य अध्यक्षपदे आसीना सा प्रथमा महिला आसीत् (1925)।

एतस्मिन् आन्दोलने, कृषकाः आदिवासिनः महिलाः च अत्यधिकसङ्ख्यया भागं गृहीतवत्यः । लवणस्य विषये केनचित् व्यावसायिकसङ्घेन पत्रं प्रकाशितम् । सर्वकारः शान्तिपूर्णसत्याग्रहिणां निर्ममदमनस्य माध्यमेन आन्दोलनस्य अभिभवाय प्रयासम् अकरोत् । सहस्राधिकाः आन्दोलनकारिणः कारागृहाणि प्रवेशिताः।

भारतीयजनतायाः सामूहिकसङ्घर्षात् अन्ततः 1935 तमे वर्षे प्रवर्तिते गवर्मेंट ऑफ इण्डिया एक्ट इत्यस्मिन् प्रान्तीय-स्वायत्तताया: प्रावधानं कृतम् । सर्वकारः अघोषयत् यत् 1937 तमे वर्षे प्रान्तीयविधायिकानां कृते निर्वाचनानि भविष्यन्ति । एतेषां निर्वाचनानां परिणामे आगते सति 11 प्रान्तानां 7 प्रान्तेषु काङ्ग्रेस- सर्वकारः जातः।

प्रान्तीयस्तरे द्विवर्षात्मके काङ्ग्रेसशासनात् परं 1939 तमे वर्षे सितम्बरमासे द्वितीयविश्वयुद्धं प्रवर्तितम्। हिटलरं प्रति आलोचनात्मकदृष्टेः कारणात् काङ्ग्रेसस्य नेतारः ब्रिटेनस्य युद्धप्रयासे साहाय्यार्थं सज्जाः आसन्। परन्तु ते विनिमये युद्धात् परं भारतस्य स्वातन्त्र्यम् इच्छन्ति स्म। आङ्ग्लीयाः एतत् तथ्यं न स्वीकृतवन्तः। काङ्ग्रेसनीतसर्वकाराः विरोधे त्यागपत्रं दत्तवन्तः।

प्रान्तीय-स्वायत्तता – सङ्घाभ्यन्तरे ये प्रान्ताः आसन् तेभ्यः तुलनात्मकरूपेण स्वतन्त्रनिर्णयस्वीकरणस्य अनुमतिप्रदानम्।

स्रोतः 5

वीरलखननायकः मृत्युदण्डेन दण्डितः

त्रिंशत्तमे शतके नबरङ्गपुर-काङ्ग्रेसस्य उडीसायाः अध्यक्षः, बाजीमुहम्मदः लिखति –

1942 तमे वर्षे अगस्तमासे 25 दिनाङ्के -- नवविंशतिः जनाः नबरङ्गपुरस्थिते पपरन्दीमध्ये जातेन आरक्षक- गुलिकाप्रहारेण तत्क्षणमेव दिवङ्गताः । नैके जनाः व्रणिताः जाताः ते अनन्तरकाले मृतवन्तः । त्रिंशताधिकजनाः व्रणिताः । सहस्राधिकाः जनाः कोरापुटजनपदस्य कारागृहे प्रवेशिताः। नैके गुलिकाप्रहारेण मारिताः तथा च नैके मृत्युदण्डेन दण्डिताः। वीरलखननायकः (आङ्ग्लीयवचनानाम् अवहेलनकर्ता कश्चित् विख्यातः जनजातीयनेता) अपि मृत्युदण्डेन दण्डितः।

बाजी अस्मान् सूचयति यत् लखननायकः स्वीयमृत्युदण्डस्य विषये चिन्तितः न आसीत् अपि तु सः केवलम् एतस्मात् दुःखी आसीत् यत् सः स्वतन्त्रतायाः प्रभातकालं न द्रष्टुं शक्ष्यति इति।

बाजीमुहम्मदः राष्ट्रियसङ्घर्षे सम्मेलयितुं 20,000 जनान् प्रेरितवान्। सः नैकधा सत्याग्रहम् अकरोत्। सः द्वितीयविश्वयुद्धं विरुध्य जाते भारत छोडो आन्दोलन इत्यस्मिन् भागं गृहीतवान् तथा च नैकधा चिरकालपर्यन्तं कारागृहे अपि समयं यापितवान्।

चित्रम् 14 – भारत छोडो आन्दोलनम्, 1942 तमवर्षम् अगस्तमासः ।

प्रदर्शनकारिणः सर्वत्र आरक्षकैः सह सङ्घर्षं कुर्वन्तः आसन् । सहस्राधिकाः जनाः निगृहीताः, सहस्राधिकाः च मृताः असङ्ख्यजनाः च व्रणिताः ।

भारत छोड़ो इत्यान्दोलनं ततः अनन्तरं च

महात्मगान्धिः द्वितीयविश्वयुद्धात् परम् आङ्ग्लीयान् विरुध्य जातान्दोलनस्य कञ्चित् नवीनं चरणम् आरब्धवान् । सः आङ्ग्लीयान् पूर्वं सूचितवान् प्रतिबोधितवान् च यत् ते अतिशीघ्रं भारतं त्यजेयुः । गान्धिः भारतीयजनतायाः आह्वानं कृतवान् यत् सा "करो या मरो" इत्यस्य सिद्धान्तम् अनुपालयन्ती आङ्ग्लीयान् विरुध्य अहिंसकरूपेण सङ्घर्षं कुर्यात् । गान्धिः अन्ये च नेतारः अतिशीघ्रं कारागृहे निवेशिताः । ततः परम् इदम् आन्दोलनं प्रसृतम् । कृषकाः युवकाः च अस्मिन् आन्दोलने विपुलसङ्ख्यया सम्मिलितवन्तः । विद्यार्थिनः अध्ययनकार्यं परित्यज्य आन्दोलने भागं गृहीतवन्तः । आदेशं सञ्चारस्य राजसत्तायाः च प्रतीकेषु आक्रमणानि जातानि । नैकेषु स्थानेषु जनाः निजसर्वकारस्य स्थापनां कृतवन्तः ।

सर्वादौ आङ्ग्लीयाः नृशंसं दमनकारिणं च मार्गम् आश्रितवन्तः । 1943 तमवर्षस्य अन्तिमभागपर्यन्तं नवतिसहस्राधिकाः जनाः निगृहीताः तथा च प्रायः 1,000 जनाः आरक्षकगुलिकाप्रहारेण मृताः । नैकेषु क्षेत्रेषु वायुयानैः अपि जनसम्मर्दम् उद्दिश्य गुलिकाप्रहारस्य आदेशः दत्तः । परन्तु अन्ततः अनेन विद्रोहेण आङ्ग्लीयाः ब्रिटिशशासकाः च पराजेतुं बाध्याः कृताः ।

स्वतन्त्रतां विभाजनं च प्रति

1940 तमे वर्षे मुसलिमलीगः देशस्य पश्चिमोत्तर-पूर्व-क्षेत्रेषु च मुस्लिमजनानां कृते "स्वतन्त्र-राज्यानाम्" अभ्यर्थनाविषयकः प्रस्तावः पारितः । अस्मिन् प्रस्तावे विभाजनस्य पाकिस्थानस्य च वर्णनं न आसीत् । मुसलिमलीग इत्यनेन उपमहाद्वीपीय-मुस्लिम-जनानां कृते स्वायत्त-व्यवस्था-सम्बद्धा अभ्यर्थना किमर्थं न कृता आसीत् ?

1930 तमस्य दशकस्य अन्तिमवर्षेभ्यः मुसलिमलीग इति संस्था मुस्लिमराष्ट्रं हिन्दुजनेभ्यः पृथक् रूपेण द्रष्टुम् आरब्धती । 1920, 1930 तमयोः शतकयोः हिन्दुमुस्लिमजनानां च केषाञ्चित् सङ्घटनानां मध्ये यः अवसादभावः उत्पन्नः तदपि विभाजनाय कारणरूपेण जातः स्यात् ।

बोसः आईएनए इति च

चित्रम् 15 - सुभाषचन्द्रबोसः ।

समाजवादि-विचारकः आमूलं परिवर्तनवादी राष्ट्रवादी सुभाषचन्द्रबोसः अहिंसायाः गान्धिवादि-आदर्शेषु च न विश्वसति स्म यद्यपि "राष्ट्रपिता" इत्यस्य रूपेण गान्धिनः सम्मानं करोति स्म । 1941 तमे वर्षे सः कमपि असूचयित्वा कलकत्तानगरं त्यक्तवान् तथा च जर्मनीमार्गेण सिङ्गापुरं प्राप्नोत् । भारतदेशम् आङ्ग्लीयशासनात् मोचयितुं सः आजाद हिन्द फौज (इण्डियन नैशनल आर्मी(आईएनए) इत्यस्य) स्थापनाम् अकरोत् । 1944 तमवर्षे आजाद-हिन्द-सेना इम्फालस्य कोहिमायाः च मार्गेण भारतं प्रवेष्टुं प्रयत्नम् अकरोत् परन्तु तत्र साफल्यं न प्राप्तवती । आईएनए इत्यस्य सदस्याः निगृहीताः तथा च तान् उद्दिश्य अभियोगाः अपि प्रवर्तिताः तान् अभियोगान् विरुध्य जायमाने सङ्घर्षे नैके भारतीयाः जनाः भागं गृहीतवन्तः ।

चित्रम् 16 – मौलानाजादः, काङ्ग्रेस-कार्यकारि-समितेः च अन्ये सदस्याः, सेवाग्रामः, 1942।

मौलानाजादस्य जन्म मक्का इत्यस्मिन् स्थाने अभवत् । तस्य पिता बङ्गालीयः माता च अरबदेशीया आसीत् । आजादः नैकभाषाविज्ञः आसीत् तथा च सर्वेषु धर्मावलम्बिषु च ऐक्यं स्यात् इत्यस्य पक्षे आसीत् । गान्धिवादिषु आन्दोलनेषु सदैव सक्रियः सन् सः हिन्दुमुस्लिमैक्यस्य अपि दृढतया पक्षधरः आसीत् । सः जिन्नायाः राष्ट्रद्वयसिद्धान्तस्य विरोधी आसीत् ।

चित्रम् 17 – गान्धि-जिन्ना-वार्त्तालाप-कार्यक्रमात् पूर्वं चक्रवर्ति-राजगोपालाचारी गान्धिना सह वार्तालापं कुर्वन् अस्ति, 1944।

वयोवृद्धः राष्ट्रवादी दक्षिणे च नमकसत्याग्रहस्य नेता सी.राजगोपालाचारी 1946 तमे वर्षे स्थापितस्य अन्तरिमसर्वकारस्य सदस्यः आसीत् तथा च स्वतन्त्रभारतस्य प्रथमः भारतीयगवर्नरजनरलपदे आसीनः आसीत् । जनाः तं राजा जी इति नाम्ना सम्बोधयन्ति स्म ।





चित्रम् 18 सरदार-वल्लभ-भायि-पटेलः 1945 - 1947 तमवर्षावधौ स्वतन्त्रतायै प्रवर्तमानेषु वार्तालाप-कार्यक्रमेषु महत्त्वपूर्णं साहाय्यम् अकरोत् ।

पटेलः गुर्जरप्रान्तस्थस्य नादियाड इति नामकस्य कस्मिंश्चित् निर्धनव्यवसायिकुटुम्बे जातः आसीत् ।

1918 तमवर्षानन्तरं स्वतन्त्रतान्दोलनस्य अग्रगण्यः पटेलः 1931 तमे वर्षे काङ्ग्रेस इत्यस्य अध्यक्षः अपि आसीत् ।

चित्रम् 19 - महात्मगान्धिना सह मोहम्मदाली जिन्ना, 1944 सितम्बरमासः ।

1920 तमवर्षपर्यन्तं हिन्दु-मुस्लिमयोः मध्ये ऐक्यभावस्य समर्थकः जिन्नामहोदयः लखनवु-सन्धि-सम्पादने महत्त्वपूर्णं साहाय्यम् अकरोत् । 1934 तमवर्षानन्तरं सः मुसलिमलीग इत्येतां संस्थां पुनरुज्जीवयितुं कार्यम् अकरोत् तथा च अन्ते सः पाकिस्थानस्य स्थापनायाः समर्थकेषु अग्रगण्यः आसीत् ।

चित्रम् 20 – जवाहरलालनेहरुः काङ्ग्रेसस्य बम्बयीमध्ये जातात् अधिवेशनात् प्राक् महात्मगान्धिना सह वार्तालापं करोति, 1946 जुलैमासः।

गान्धिनः शिष्यः, काङ्ग्रेससम्बद्धः समाजवादी, अन्ताराष्ट्रियतावादि-विचाराणां पोषकः, नेहरुः राष्ट्रियान्दोलनस्य स्वतन्त्रभारतस्य च आर्थिक-राजनैतिक-व्यवस्थायाः प्रमुखेषु शिल्पिषु कश्चन आसीत्।

"सामान्य"-निर्वाचन-क्षेत्रम् – एतादृशानि निर्वाचनक्षेत्राणि यत्र कस्यचित् धार्मिकस्य अन्यसम्प्रदायस्य च कृते आरक्षणस्य काचित् अपि व्यवस्था न आसीत्।

1937 तमे वर्षे यत् प्रान्तीयनिर्वाचनं जातं तदपि सम्भवतः एतस्मात् अपि गुरुतरं कारणं स्यात्। एतेषु निर्वाचनेषु मुसलिमलीग इति संस्था आश्वस्ता जाता यत् अत्र मुस्लिमजनाः अल्पसङ्ख्यकाः सन्ति तथा च कस्याम् अपि लोकतान्त्रिकसंरचनायां तैः सदैव गौणभूमिका एव निर्वोढव्या भविष्यति। लीगजनाः एतस्मात् अपि विभ्यति स्म यत् क्वचित् शक्यते यत् मुसलमानजनाः कदापि प्रतिनिधित्वम् एव न प्राप्नुयुः। 1937 तमे वर्षे मुसलिमलीग इति संस्थाजनाः संयुक्तप्रान्ते काङ्ग्रेसदलेन सह मिलित्वा सर्वकारस्य स्थापनाम् इच्छन्ति स्म परन्तु काङ्ग्रेसदलेन तेषाम् एवंविधः प्रस्तावः न स्वीकृतः यतः अन्तरं वर्धितम्।

त्रिंशत्तमे दशके मुसलिमजनतां सङ्घटयितुं काङ्ग्रेसदलस्य वैफल्यम् आसीत् तस्मात् अपि लीगजनाः स्वीयं सामाजिकजनाधारं प्रसारयितुं साहाय्यं प्राप्तवन्तः। चत्वारिंशत्तमस्य शतकस्य आरम्भिकेषु वर्षेषु यदा काङ्ग्रेसस्य अधिकतराः नेतारः कारागृहेषु आसन् तदा लीगजनाः स्वीयं प्रभावं विस्तारयितुं वेगेन प्रयासम् अकुर्वन्। 1945 तमे वर्षे विश्वयुद्धस्य समाप्तेः अनन्तरम् आङ्ग्लीयाः भारतीयस्वतन्त्रतायै काङग्रेसदलेन लीग इति संस्थया च सह वार्त्तालापम् आरब्धवन्तः। वार्तालापेन किञ्चित् अपि समाधानं न अभवत् यतः लीग इति संस्थायाः कथनम् आसीत् यत् लीग इत्येव भारतीयमुस्लिमजनानाम् एकमात्रं प्रतिनिधिरूपेण अस्ति इति सर्वे अङ्गीकुर्युः। काङ्ग्रेसदलम् एतादृशं परामर्शं न स्वीकर्तुं शक्नोति स्म यतः नैके मुस्लिमजनाः अधुना अपि काङ्ग्रेसदलेन सह आसन्।

1946 तमे वर्षे पुनः प्रान्तीयनैर्वाचनिकप्रक्रिया जाता। "सामान्य-निर्वाचन-क्षेत्रेषु" काङ्ग्रेसदलस्य प्रदर्शनं तु समीचीनम् आसीत् परन्तु मुस्लिमजनानां कृते आरक्षितासनेषु लीग इत्यनेन दलेन विपुलसाफल्यम् अधिगतम्। लीग इति दलं "पाकिस्थानस्य" अभ्यर्थनया अग्रे सरति स्म। 1946 तमे वर्षे मार्चमासे ब्रिटिशसर्वकारेण एतादृशाभ्यर्थनायाः अध्ययनाय स्वतन्त्रभारतस्य च कृते समुचित-राजनैतिक-प्रावधानाय च त्रिसदस्यीयपरिसङ्घः भारतं प्रति प्रेषितः। अनेन परिसङ्घेन परामृष्टं यत् भारतदेशः अविभाजितः स्यात् तथा च मुसलिमबहुलक्षेत्रेभ्यः स्वायत्तता स्यात् तथा च तत्र कस्यचित् अदृढस्य महासङ्घस्य रूपेण सङ्घटनं स्यात्। काङ्ग्रेसदलं मुसलिमलीगदलं च द्वे एव एवंविधस्य प्रस्तावस्य केषुचित् विशिष्टप्रावधानेषु सहमतियुक्ते न आस्ताम्। अधुना देशस्य विभाजनम् अवश्यंभावि आसीत्।

चित्रम् 21 - खान-अब्दुल-गफ्फार-खानः पश्चिमोत्तरसीमाप्रान्तस्य प्रमुखेषु पश्तून इत्येतेषु नेतृषु कश्चित् आसीत्। एतस्मिन् चित्रे स्वीयसहयोगिभिः सह बिहारप्रान्ते कस्यांश्चित् शान्तियात्रायां भागं स्वीकरोति, 1947 मार्चमासः।

गफ्फारखानः बादशाहखान इति नाम्ना अपि ज्ञायते। सः खननस्य खिदमतगार इत्यस्य च सङ्घ-घटनस्य संस्थापकः आसीत्। इदम् आन्दोलनं तस्य प्रान्तस्य पठान इत्येतेषु लोकप्रिय-शक्तिशालि-अहिंसक-आन्दोलनम् आसीत्। बादशाहखानः भारतविभाजनस्य प्रबलविरोधी आसीत्। सः 1947 तमे वर्षे एतस्मिन् निर्णये स्वीकृतिं प्रदातुं काङ्ग्रेसदलीयानां स्वीयसहयोगिनां सः भर्त्सनाम् अकरोत्।

चित्रम् 22 – हिंसाग्रस्तात् पञ्जाबप्रान्तात् आगताः शरणार्थिनः आश्रयस्य भोजनस्य च अन्वेषणे देहल्यां समवेताः भवन्ति।

मन्त्रिमण्डलीय-नियोजितसभायाः एवंविधस्य वैफल्यात् परं मुसलिमलीगसंस्था पाकिस्थानविषये स्वीयायाः अभ्यर्थनायाः पूर्तये जनान्दोलनम् आरब्धवती। तया 1946 तमे वर्षे अगस्तमासे 16 दिनाङ्के "प्रत्यक्ष-प्रतिक्रिया-दिवस"इत्यस्यआयोजनस्यआह्वानं कृतम्। एतस्मिन् एव दिने कलकत्तामध्ये उपद्रवाः जाताः ये नैकदिनपर्यन्तं प्रावर्तन्त। एतैः उपद्रवैः सहस्राधिकाः जनाः हताः। 1947 तमे वर्षे मार्चमासे उत्तरभारतस्य विभिन्नभागेषु अपि हिंसा प्रसृता आसीत्। लक्षाधिकाः जनाः मृत्युं प्राप्तवन्तः। असङ्ख्यमहिलाः विभाजनसम्बद्धायां हिंसायाम् अकथनीयात्याचारान् सम्मुखीकृतवत्यः। कोट्यधिकजनाः स्वीयगृहाणि परित्यज्य पलायनं कर्तुं बाध्याः जाताः। स्वीयमूलस्थानानि परित्यज्य परस्परं वियुक्ताः भूत्वा च एते जनाः रात्र्याभ्यन्तरे अपरिचितभूमौ शरणार्थीभूत्वा स्थातुं बाध्याः जाताः। विभाजनस्य परिणामः अयम् अपि आसीत् यत् भारतस्य स्वरूपं परिवर्तितम्। भारतस्य नगराणां स्वरूपं वातावरणं च परिवर्तितं तथा च एकस्य नवीनस्य पाकिस्थानाख्यदेशस्य जन्म अभवत्। अनेन प्रकारेण ब्रिटिशशासनात् स्वतन्त्रतायाः अयम् आनन्दः विभाजनस्य पीडया हिंसया च सह अस्माकं दृष्टिपथम् आयातः।

अन्यत्र –

अफ्रीकायां राष्ट्रवादः- घानायाः उदाहरणम्

एकोनविंशतितम-शताब्द्याः अन्तिमकाले विंशतितमशताब्द्याः च आरम्भिककाले नैकेषु अफ्रीकीयेषु एशियास्थेशु च देशेषु राष्ट्रवादस्य उदयः अभवत्। एतेषु नैकेषु देशेषु राष्ट्रवादस्य उदयः स्वतन्त्रतायाः कृते उपनिवेशवादविरोधि-सङ्घर्षाणाम् अन्तर्गतः अभवत्।

अफ्रीकायाम् औपनिवेशिकशासनम् ऐकाधिपत्यवत् आसीत्। वैदेशिकशासकानां प्रतिनिधिरूपेण केवलं "प्रमुखेभ्यः" एव शासनस्य स्वातन्त्र्यं दीयते स्म। अथवा पुनः अफ्रीकीयजनानां विषये केवलं श्वेतप्रतिनिधियुक्तसभा एव अधिनियमान् निर्माति स्म। न्यूनातिन्यूनं द्वितीयविश्वयुद्धात् परवर्तिकालपर्यन्तम् अफ्रीकीयजनानां पार्श्वे निर्णयस्वीकरणस्य प्रतिनिधित्वस्य च शक्तिः नासीत्। स्थानीयभूस्वामिनां कृषकाणां च भूमेः बलात् अधिग्रहणं, राजस्ववृद्धीनाम् असमीचीन-कार्यपरिस्थितीनां च कारणात् नैकानि अफ्रीकीयान्दोलनानि आरब्धानि।

1957 तमे वर्षे घाना इति देशः स्वतन्त्रतागृहीतृषु देशेषु उपसहारा-अफ्रीकायाः प्रथमः देशः जातः। इतः पूर्वं सः गोल्ड कोस्ट इति नाम्ना ज्ञायते स्म। अत्र स्वतन्त्रतान्दोलनस्य नेतृत्वं कुआमे नकरूमा इत्यनेन सञ्चालितेन कन्वेंशन-पीपुल्स-पार्टी इत्यनेन दलेन क्रियते स्म। घानायाः जनता स्वतन्त्रतार्थं कार्यबहिष्कारं जनसञ्चारप्रतिरोधं जनान्दोलनानि च अकरोत्। 1951 तमे वर्षे कन्वेंशन-पीपुल्स-पार्टी इत्यनेन दलेन निर्वाचनेषु प्रचण्डसाफल्यं प्राप्तम्। अनेन दलेन तस्याः प्रणाल्याः परम्परायाः वा विरोधः कृतः यत्र ब्रिटिशशासकैः प्रमुखेभ्यः विधानसभाः प्रति स्वीयप्रतिनिधेः प्रेषणस्य अधिकारः प्रदत्तः आसीत्। अनेन दलेन आङ्ग्लीयाः प्रभाविताः यत् ते एतादृशीनां विधानसभानां स्थापनां कुर्युः यत्र कश्चित् मनोनीतः विशेषसदस्यः च न भवेत्। 1954 तमे वर्षे एषा अभ्यर्थना अङ्गीकृता। 1956 तमे वर्षे नवीनविधानपरिषदः कृते निर्वाचनानि जातानि। केन्वेंशनपीपुल्स इत्यनेन दलेन एतेषु निर्वाचनेषु साफल्यं प्राप्तम् अपि च अनेन प्रकारेण "घानानाम्ना" कस्यचित् नवीनस्य स्वाधीनराष्ट्रस्य च निर्माणमार्गः प्रशस्तः जातः।

पुनः स्मरन्तु -

1. 1870 - 1880 इत्येतयोः दशकयोः जनाः ब्रिटशशासनात् किमर्थम् असन्तुष्टाः आसन् ?
2. भारतीय-राष्ट्रिय-काङ्ग्रेसदलं केषां जनानां पक्षे वदति स्म ?
3. प्रथमविश्वयुद्धात् भारते के आर्थिकप्रभावाः जाताः ?
4. 1940 तमवर्षीये मुसलिमलीग इत्यस्य प्रस्तावे का अभ्यर्थना कृता आसीत् ?

आयान्तु विचारं कुर्मः -

5. मध्यमार्गिणः के आसन् ? ते ब्रिटिशशासनं विरुध्य कीदृशं सङ्घर्षं कर्तुम् इच्छन्ति स्म ?
6. काङ्ग्रेसे आमूलं परिवर्तनवादिवर्गस्य राजनीतिः मध्यमार्गिवर्गस्य राजनीतेः कथं कृत्वा पृथक् आसीत् ?
7. चर्चां कुर्वन्तु यत् भारतस्य विभिन्नेषु भागेषु असहयोगान्दोलनेन कीदृशानि रूपाणि गृहीतानि ? जनाः गान्धिनः विषये किम् अवगच्छन्ति स्म ?
8. गान्धिजिः नमकाधिनियमभङ्गस्य निर्णयं किमर्थम् अकरोत् ?
9. 1937 – 47 तमवर्षेषु जातासु घटनासु चर्चां कुर्वन्तु यासां फलस्वरूपं पाकिस्थानस्य जन्म अभवत् ?

आयान्तु कृत्वा पश्यामः

10. अवजानन्तु यत् भवतां नगरे जनपदे क्षेत्रे राज्ये च राष्ट्रियान्दोलनं कथम् आयोजितम् । के जनाः तत्र भागं गृहीतवन्तः तथा च केषां जनानां नेतृत्वे आन्दोलनं जातम् ? भवतां क्षेत्रे आन्दोलनेन कीदृशं साफल्यम् अधिगतम् ?
11. राष्ट्रियान्दोलनस्य कयोश्चित् द्वयोः सहभागिनोः नेत्रोः वा जीवनस्य कृतित्वस्य च विषये इतोऽपि जानन्तु तथा च तेषां विषये संक्षिप्तनिबन्धं लिखन्तु । भवन्तः तादृशम् अपि जनं चेतुं शक्नुवन्ति यस्य अस्मिन् अध्याये वर्णनं नास्ति ।

आयान्तु कल्पनां कुर्मः

कल्पनां कुर्वन्तु यत् भवन्तः भारतीय-राष्ट्रिय-आन्दोलने सक्रियाः सन्ति । एतस्य अध्यायस्य अध्ययनानन्तरं संक्षेपेण सूचयन्तु यत् भवन्तः सङ्घर्षाय कान् कान् उपायान् अग्रहीष्यन्त, अपि च भवन्तः कीदृशं स्वतन्त्रभारतदेशं निरमाप्स्यन्त ?

॥ इति एकादशः अध्यायः ॥

12 स्वतन्त्रतायाः अनन्तरम्

किञ्चन नवीनं खण्डितं च राष्ट्रम्

1947 तमे वर्षे अगस्तमासे यदा भारतदेशः स्वतन्त्रः जातः तदा तस्य पुरतः नैकानि आह्वानानि आसन् । विभाजनस्य कारणात् 80 लक्षं शरणार्थिनः पाकिस्थानतः भारतम् आगतवन्तः । तेषां जनानां कृते वासस्य प्रबन्धनम् आजीविकायाः च व्यवस्था अतीव आवश्यकम् आसीत् । ततः परं राज्य-सम्बद्धाः समस्याः आसन् । प्रायः 500 राज्यानां व्यवस्था नृपाणां प्रान्ताध्यक्षाणां च शासने प्रवर्तते स्म । एतेषां सर्वेषां अपि प्रान्ताध्यक्षाणां शासकानां च नवीने राष्ट्रे सम्मेलनं किञ्चित् कठिनकार्यम् आसीत् । शरणार्थिनां राज्यसम्बद्धानां च समस्यानां निदानं यथाशीघ्रम् आवश्यकम् आसीत् । चिरन्तनकालानन्तरम् एतस्मिन् नवजातराष्ट्रे कस्याश्चित् राजनैतिकव्यवस्थायाः विकासः करणीयः आसीत् यया अत्रत्याः जनाः स्वीयाः आशाः आकाङ्क्षाः च सुप्रकारेण व्यक्तीकर्तुं शक्नुयुः ।

चित्रम् 1 - *इलाहाबादे महात्मगान्धिनः अस्थिविसर्जनम्, 1948, फरवरीमासः ।*

स्वतन्त्रतायाः प्राप्तेः षण्मासाः अपि व्यतीताः न आसन् यत् सम्पूर्णराष्ट्रवासिनः गहने शोके निमग्नाः जाताः । 1948 तमे वर्षे जनवरीमासे 30 दिनाङ्के नाथूरामगोडसे इति नामकः जनः महात्मगान्धिनः हत्याम् अकरोत् । महात्मगान्धिनः मतम् आसीत् यत् मुसलमानजनाः हिन्दुजनाः च परस्परं सद्भावनया सम्भूय तिष्ठेयुः परन्तु गोडसे महात्मनः एतं मतं न अङ्गीकरोति स्म अतः मतभेदः तयोर्मध्ये आसीत् । तस्मिन् एव सायंकाले स्तब्धराष्ट्रेण आकाशवाणीमाध्यमेन जवाहरलालनेहरोः भावुकभाषणं श्रुतम् --- "मित्राणि, अस्माकं जीवनप्रकाशस्य निर्वापणं जातं सर्वत्र तमः प्रसृतम् अस्ति--- अस्माकं प्रियनेता—राष्ट्रपिता अधुना अस्मान् विहाय दिवङ्गतः" ।

1947 तमे वर्षे भारतस्य जनसङ्ख्या अत्यधिका आसीत् ---- प्रायः 34.5 कोटिपरिमिता। इयं जनसङ्ख्या अपि परस्परं विभक्ता आसीत् । एतस्याम् उच्चजातीयाः निम्नजातीयाः, हिन्दुबहुलसमुदायाः अन्यधर्मावलम्बिनः च भारतीयाः आसन्। एतस्य विशालदेशस्य जनाः विविधभाषाभिः भाषन्ते स्म, तेषां वेशेषु अपि महत् वैभिन्न्यम् आसीत्, भोज्यपदार्थादिषु कार्येषु व्यवसायेषु चापि महती विविधता आसीत् । एतावन्तः विविधतासम्पन्नाः जनाः कस्यचित् एकस्य राष्ट्रस्य राज्यस्य च रूपेण कथं सङ्घटयितुं शक्यन्ते स्म ?

ऐक्यस्य समस्यया सह एव विकासः अपि कश्चित् व्यापकसमस्यारूपेण आसीत् । स्वतन्त्रताकाले भारतस्य काचित् विशाला सङ्ख्या ग्रामेषु निवसति स्म । आजीविकायाः कृते कृषकाः कृषिजीविनः च वृष्टौ आश्रिताः भवन्ति स्म। इयम् एव स्थितिः अर्थव्यवस्थायाः अकृषकीयक्षेत्रेषु आसीत्। यदि सस्यस्य कथञ्चिद् अपि नाशः भवति स्म तदा नापितानां काष्ठकाराणां लौहकाराणां तन्तुवायानाम् अन्यशिल्पिनाम् आजीविका अपि सङ्कटग्रस्ता भवति स्म । नगरेषु शिल्पशालायाः श्रमिकाः जनसम्मर्दयुक्तेषु पर्णकुटीरेषु वस्तिषु च निवसन्ति स्म यत्र शिक्षायाः स्वास्थ्यस्य च सौविध्यानां विशिष्टव्यवस्था न आसीत्। एतां विशालजनसङ्ख्यां निर्धनताक्रोडात् मोचयितुं न केवलं कृषेः उत्पादनवर्धनस्य आवश्यकता आसीत् अपि तु नवीनोद्योगागाराणां निर्माणस्य अपि आवश्यकता आसीत् यत्र जनाः आजीविकां प्राप्तुं शक्नुयुः ।

ऐक्यस्य विकासस्य च प्रक्रियानां सहैव सञ्चालनं करणीयम् आसीत्। यदि भारतस्य विभिन्नानां वर्गाणां मध्ये विद्यमान-मतभेदानाम् अपसारणं न क्रियेत तर्हि ते हिंसकानां भयङ्कराणां च सङ्घर्षाणां रूपं ग्रहीतुं शक्नुवन्ति स्म । परिणामतः, एतादृशैः सङ्घर्षैः देशस्य महती हानिः अपि भवितुं शक्नोति स्म। क्वचित् उच्चजातीयानां निम्नजातीयानां च मध्ये क्वचित् हिन्दूनां मुस्लिमजनानां च मध्ये केनचित् अन्यकारणेन अवसादस्य आशंका आसीत्। अपरतः, यदि आर्थिकविकासस्य लाभं जनसंख्यायाः व्यापकभागरूपाः जनाः न प्राप्नुवन्ति तर्हि आधिक्येन भेदभावाः भवितुं शक्नुवन्ति स्म । एतादृश्यां स्थितौ निर्धनानां धनिकानां, नगराणां ग्रामाणां, सम्पन्नानाम् अविकसितक्षेत्राणां च मध्ये भेदभावः उत्पन्नः भवितुं शक्नोति स्म ।

नवीनसंविधानस्य रचना

1946 तमवर्षस्य दिसम्बरमासात् आरभ्य 1949 तमवर्षस्य नवम्बरमासं यावत् प्रायः 300 भारतीयाः देशस्य राजनैतिकभविष्यस्य विषये दीर्घसत्रीयं विचारमन्थनं कृतवन्तः । यद्यपि एतस्याः "संविधानसभायाः" उपवेशनानि नवदेहल्याम् आयोजितानि आसन् परन्तु एतस्याः सदस्याः आ देशात् आसन् तथा च नैकेषां राजनैतिकदलानां प्रतिनिधयः आसन् । एतासां चर्चाना फलस्वरूपं भारतीयसंविधानस्य लेखनकार्यं जातं यत् संविधानं 1950 तमवर्षे जनवरीमासे 26 दिनाङ्के कार्यार्थं प्रवर्तितम् ।

अस्माकं संविधानस्य किञ्चित् वैशिष्ट्यम् इदम् आसीत् यत् तत्र सार्वभौमिक-वयस्क-मताधिकारस्य प्रावधानं कृतम् आसीत्। एतस्य अभिप्रायः अयम् आसीत् यत् 21वर्षीयः ततोऽधिकः च कश्चित् अपि भारतीयः प्रान्तीयेषु राष्ट्रियेषु च निर्वाचनेषु मतदानाय अधिकारी भविष्यति। अयं कश्चित् क्रान्तिकारी प्रयासः आसीत्। इतः पूर्वं कदापि भारतीयानाम् अयम् अधिकारः नासीत् यत् ते स्वीयनेतुः चयनं स्वयं कर्तुं शक्नुयुः । ब्रिटेन-अमेरीका-सदृशेषु अन्यदेशानां जनता अमूम् अधिकारं विभागशः प्राप्नोत् -------

➢ गतिविधिः

कल्पनां कुर्वन्तु यत् भवान् 1947 तमे वर्षे भारतात् निर्गच्छन् कश्चित् ब्रिटिशाधिकारी अस्ति । तस्मिन् एव काले भवान् स्वीयगृहजनेभ्यः पत्रं लिखति यत्र भवान् अस्मिन् विषये चर्चां करोति यत् आङ्ग्लीयानाम् अनुपस्थितौ भारतस्य का दशा भविष्यति । भारतस्य भविष्यतः कालस्य विषये भवतः किं चिन्तनं स्यात् ?

सार्वभौमिक-वयस्क-मताधिकारः --- सर्वेषां वयस्कनागराणां कृते मतदानस्य अधिकारः ।

चित्रम् 2 - जवाहरलालनेहरुः तं प्रस्तावं पठति यत्र संविधानस्य उद्देश्यानां वर्णनम् अस्ति।

तत्र सर्वादौ सम्पन्नपुरुषेभ्यः मतदानस्य अधिकारः जातः । ततः परं शिक्षितपुरुषेभ्यः अपि मताधिकारः प्रदत्तः । श्रमिकपुरुषेभ्यः चिरकालपर्यन्तं जातस्य सङ्घर्षस्य अनन्तरम् अयम् अधिकारः प्रदत्तः । महिलाभ्यः च सर्वान्ते मताधिकारः प्रदत्तः ताः अपि प्रचण्डसङ्घर्षं कृतवत्यः ततः परम् एव ताः एतादृशम् अधिकारं प्राप्तवत्यः । उपर्युक्तस्य सर्वस्य विपरीतं, भारते स्वतन्त्रतायाः केषाञ्चित् वर्षाणाम् अनन्तरम् एव निर्णीतं यत् देशस्य सर्वे पुरुषाः सर्वाः च स्त्रियः मतदानस्य अधिकारं प्राप्स्यन्ति कामं ते निर्धनाः स्युः अथवा धनिकाः, निरक्षराः सन्तु अथवा साक्षराः इति।

संविधानस्य अपरं वैशिष्ट्यम् इदम् आसीत् यत् सर्वे नागराः वैधानिकदृष्ट्या समानाः सन्ति ते कस्यापि जातिसम्बद्धाः कस्यापि धर्मसम्बद्धाः च भवेयुः अथवा कीदृशी अपि पृष्ठभूमिः तेषां स्यात् । भारतस्य केचन जनाः इच्छन्ति स्म यत् भारतस्य राजनैतिकव्यवस्था हिन्दु-आदर्शेषु आधारिता स्यात् तथा च भारतदेशः हिन्दुदेशरूपेण घोषितः स्यात् । स्वीयतथ्यस्य समर्थनाय ते पाकिस्थानदेशम् उदाहरणरूपेण उपस्थापितवन्तः यस्य स्थापना कस्यचित् विशिष्टसमुदायस्य अर्थात् मुसलमानजनानां हितरक्षार्थं कृता आसीत् । परन्तु भारतीय-प्रधानमन्त्रिणः जवाहरलालनेहरोः स्पष्टं मतम् आसीत् यत् भारतदेशः "हिन्दुपाकिस्थानम् इति" न भवेत् तादृशी रचना चापि न भवेत्।

मुस्लिमजनान् अतिरिच्य भारते सिखजनानाम् ईसायिजनानां चापि अत्यधिका सङ्ख्या आसीत् एतान् अतिरिच्य पारसिजनाः जैनाः अन्यधर्मावलम्बिनः जनाः अपि आसन्। नवीनसंविधाने एतेषां सर्वेषां समुदायस्य जनानां कृते अपि ते एव अधिकाराः प्रदत्ताः ये अधिकाराः हिन्दुजनेभ्यः प्रदत्ताः आसन्। कामं तत्र सर्वकारीये निजे क्षेत्रे च वृत्तीनां प्रावधानं स्यात् अथवा अधिनियमसम्बद्धं किञ्चित् प्रकरणं स्यात्, एतेषां सर्वेषां समुदायानां जनेभ्यः अपि समानरूपेण ते एव अवसराः प्रदत्ताः प्रावधानं च तादृशं कृतं यथा हिन्दुजनेभ्यः कृतम् आसीत्।

संविधानस्य तृतीयं वैशिष्ट्यम् इदम् आसीत् यत् तत्र समाजस्य निर्धनस्य सर्वाधिकवञ्चितस्य च वर्गस्य कृते विशेषसौविध्यानां व्यवस्था कृता आसीत् । "भारतस्य सम्मानस्य" नाशिका कलङ्कर्त्री च अस्पृश्यताप्रथायाः समाप्तिः कृता। अधुना पर्यन्तं हिन्दूनां मन्दिराणि केवलम् उच्चजातीयाः जनाः एव गच्छन्ति स्म परन्तु अधुना तानि मन्दिराणि सर्वजातीयाः जनाः प्रवेष्टुं शक्नुवन्ति स्म । दीर्घसत्रीयचर्चायाः अनन्तरं संविधानसभया निर्णीतं यत् विधायिकायाः कानिचन स्थानानि तथा च सर्वकारीयसेवासु कश्चित् भागः निम्नजातीयानां सदस्यानां कृते आरक्षितः स्यात् । केषाञ्चित् जनानां मतम् आसीत् यत् ये अस्पृश्यजातीयाः जनाः तत्काले हरिजन इत्याख्याः आसन् – तादृशानां प्रत्याशिनां पार्श्वे तावान् अङ्काः अथवा शैक्षणिकी योग्यता च तादृशी न भवति यया ते भारतीयप्रशासनिकसेवासदृशीषु प्रतिष्ठितसेवाक्षेत्रेषु कार्यं कर्तुं शक्नुयुः इति । परन्तु, यथा – संविधानसभायाः सदस्यः एच.जे.खाण्डेकरः उक्तवान् आसीत् यत् हरिजनानाम् "अक्षमतायै" उच्चजातीयाः जनाः उत्तरदायिनः सन्ति। स्वीयान् सुविधासम्पन्नान् सहकर्मिणः सम्बोधयन् खाण्डेकरः अवदत् -

> वयं सहस्राधिकवर्षाणि यावत् अभिभूय स्थापिताः । भवन्तः सवर्णाः स्वीयसेवाकार्ये अस्मान् चिरकालपर्यन्तं नियोजितवन्तः तेन प्रकारेण च अस्माकं शोषणम् अभवत् यत् अधुना पर्यन्तम् अस्माकं मस्तिष्कं शरीरं चैव न अपि तु अस्माकं हृदयम् अपि समीचीनतया कार्यं न करोति न चैव वयम् उन्नतिं कर्तुम् अधुना अपि क्षमाः स्मः ।

भूतपूर्वास्पृश्यजनैः सह एव आदिवासिनाम् अनुसूचितजनजातीयानां च कृते अपि विधायिकायां सेवासु वृत्तेः अवसरेषु च आरक्षणव्यवस्था प्रवर्तिता । अनुसूचितजातीयाः इव एते भारतीयाः अपि वञ्चिताः इति रूपेण स्थापिताः तथा च तैः सह भेदभावपूर्णः व्यवहारः क्रियते स्म । आदिवासिनः आधुनिकस्वास्थ्यसौविध्यैः शिक्षया च अपि वञ्चिताः आसन् । तेषां भूमेः वनानां च समुदायेतरैः बलवद्भिः जनैः अधिग्रहणं क्रियते स्म । संविधानमाध्यमेन ये नवीनान् अधिकारान् प्राप्तवन्तः तेषाम् उद्देश्यम् एतस्याः स्थितेः संशोधनस्य आसीत् ।

संविधानसभायाः सदस्याः केन्द्रस्य राज्यसर्वकारस्य च शक्तीनाम् अधिकाराणां च विभाजनविषये अपि दीर्घसत्रीयचर्चाम् अकुर्वन् । केषाञ्चित् जनानां मतम् आसीत् यत् केन्द्रस्य हितानि सर्वाधिकमहत्त्वपूर्णानि भवेयुः । तेषां कथनम् आसीत् यत् यदि केन्द्रं दृढं भविष्यति तर्हि तदा एव तत् सम्पूर्णदेशस्य उन्नतिविषये चिन्तयितुं योजनाः कर्तुं च सक्षमं भविष्यति। नैकेषाम् अन्यसदस्यानां मतम् आसीत् यत् राज्येभ्यः अधिका स्वायत्तता स्वतन्त्रता च स्यात् । मैसूरस्य कस्यचित् सदस्यस्य कथनम् आसीत् यत् वर्तमानव्यवस्थायां "लोकतन्त्रं देहल्यां केन्द्रितम् अस्ति अत एव च अवशिष्टे देशे तत् अनया एव भावनया अर्थेन च न साकारीभवति ।"

स्रोतः 1

अस्माभिः तेभ्यः सुरक्षा अधिकाराः च अवश्यमेव दातव्याः ।

मुख्यमन्त्रिभ्यः लिखिते पत्रे नेहरुः अवदत् –

---अस्माकं भारते मुसलिम-अल्पसङ्ख्यक-समुदायः अस्ति यः सङ्ख्यादृष्ट्या एतावान् व्यापकः अस्ति यत् यदि ते इच्छेयुः तर्हि अपि क्वचित् अपि न गन्तुं शक्नुवन्ति । इदं किञ्चित् आधारभूततथ्यम् अस्ति यस्य विषये चर्चायाः लेशमात्रम् अपि स्थानं नास्ति । पाकिस्थानपक्षतः यादृशम् अपि आह्वानं स्यात् तथा च तत्रत्यान् अमुस्लिमजनान् उद्दिश्य के अपि अत्याचाराः स्युः अस्माभिः भारतीयाल्पसङ्ख्यसमुदायेन सह सभ्यप्रकारेण एव व्यवहर्तव्यम् । अस्माभिः एतस्मै समुदायाय अपि तथाविधा एव सुरक्षा तादृशाः चैव अधिकाराः प्रदातव्याः भविष्यन्ति ये कस्यापि लोकतान्त्रिकराज्यस्य नागराः प्राप्नुवन्ति ।

➢ गतिविधिः

कस्मिंश्चित् मुस्लिमकुटुम्बे पितुः पुत्रस्य च मध्ये जायमानवार्त्तालापस्य विषये कल्पनां कुर्वन्तु । पुत्रः मन्यते यत् विभाजनात् परं कुटुम्बेन पाकिस्थानदेशं प्रति गन्तव्यम् अपरञ्च पिता विश्वसिति यत् तैः भारते एव स्थातव्यम् । एतस्मिन् अध्याये (तथा च 11 अध्याये) प्रदत्तसूचनानाम् आधारेण अभिनयं कृत्वा सूचयन्तु यत् द्वाभ्यां के तर्काः उपस्थापिताः स्युः ।

चित्रम् 3 – डॉ.बी.आर.अम्बेडकरः ।

डॉ.बी.आर.अम्बेडकरं (1891-1956) जनाः सस्नेहं बाबासाहेब इति नाम्ना सम्बोधयन्ति स्म। सः केनचित् मराठीभाषि-दलित-कुटुम्बेन सम्बद्धः आसीत् । डॉ.अम्बेडकरः कश्चित् प्रख्यातः अधिवक्ता अर्थशास्त्री च आसीत् । सः दलितानां कस्यचित् महतः नेतुः भारतीयसंविधानस्य च जनकस्य रूपेण मन्यते।

मद्रासस्य कस्यचित् सदस्यस्य आग्रहः आसीत् यत् "राज्यस्तरे जनानां कुशलक्षेमस्य प्रारम्भिकः भारः प्रान्तीयसर्वकारेषु एव भवेत्"।

एतेषां मतभेदानां दूरीकरणाय संविधाने विभिन्नविषयाः सूचीत्रये विभक्ताः – केन्द्रीयसूच्यां, राज्यसूच्यां समवर्तिसूच्यां च । केन्द्रीयसूच्यां कराधानस्य रक्षायाः विदेशसम्बद्धानि च प्रकरणानि स्थापितानि । एते एतादृशाः विषयाः आसन् ये केवलाः केन्द्रसर्वकारस्य अधीनस्थाः आसन् । राज्यसूच्यां शिक्षास्वास्थ्यसदृशाः विषयाः परिगणिताः येषां सम्बद्धं दायित्वं मुख्यरूपेण राज्यसर्वकाराणाम् आसीत् । समवर्तिसूच्यां वन-कृष्यादिसम्बद्धाः तादृशाः विषयाः समाविष्टाः येषां विषये केन्द्रस्य राज्यस्य च सर्वकारः संयुक्तरूपेण निर्णेतुं शक्नोति स्म।

संविधानसभायां भाषासम्बद्धे प्रश्ने दीर्घकालिकी प्रखररूपेण च चर्चा जाता । नैकेषां जनानां मतम् आसीत् यत् आङ्ग्लीयैः सह आङ्ग्लभाषायाः अपि त्यागः स्यात् । तेषां कथनम् आसीत् यत् आङ्ग्लभाषायाः स्थाने हिन्दीभाषायाः सर्वथा अङ्गीकारः स्यात् परन्तु ये जनाः हिन्दीभाषया न भाषन्ते स्म तेषां मतं पृथक् आसीत् । संविधानसभायां भाषयन् टी.टी.कृष्णमाचारी "दाक्षिणात्यजनानां पक्षतः" पूर्वसूचनाम् अददात् यत् यदि बलात् हिन्दी तत्रत्यजनानान् उद्दिश्य प्रवर्तिता तर्हि नैके जनाः भारतात् पृथक् भविष्यन्ति। एतस्य विवादस्य शान्तये अन्ततः मध्यमार्गः आविष्कृतः । संविधान-निर्मातारः, हिन्दी भारतस्य "राजभाषारूपेण" स्यात् इति स्थानं तस्यै दत्तवन्तः अपरञ्च न्यायालयेषु सेवासु विभिन्नराज्यमध्ये सञ्चारादिकस्य च कृते आङ्ग्लभाषायाः प्रयोगः स्यात् इति निर्णीतम्।

संविधानस्य रचनाकार्ये नैके भारतीयाः योगदानं कृतवन्तः । तेषु अत्यधिकं महत्त्वपूर्णं योगदानं सम्भवतः डॉ.बी.आर.अम्बेडकरस्य आसीत् यः संविधानसभायाः प्रारूपसमितेः अध्यक्षः आसीत् तथा च यस्य नेतृत्वे अभिलेखस्य अन्तरिमप्रारूपं सज्जीकृतम्। संविधानसभायाः समक्षे स्वीये अन्तिमे भाषणे डॉ. अम्बेडकरः अवदत् यत् राजनैतिकलोकतन्त्रेण सह आर्थिकं सामाजिकं च लोकतन्त्रम् अपि आवश्यकम् अस्ति । यदि जनेभ्यः मतदानस्य अधिकारः दीयते तर्हि एतस्मात् धनिकनिर्धनयोः निम्नोच्चजातीयानां च मध्ये प्रसृतम् अन्तरं स्वयमेव समाप्तिं न गमिष्यति। सः अवदत् यत् नवीनसंविधानेन सह भारतदेशः –

अन्तर्विरोधानां कञ्चित् नवीनयुगं प्रविशति। राजनीतौ अस्मत्सविधे समानता भविष्यति तथा च सामाजिके आर्थिके च जीवने वयम् असमानतामार्गे चलिष्यामः। राजनीतौ वयम् एकलजनस्य मतस्य समानमूल्यकस्य च सिद्धान्तस्य अनुपालनं करिष्यामः। एतद्विपरीतं, स्वीयायाः सामाजिक्याः आर्थिक्याः च संरचनायाः फलस्वरूपं वयं सामाजिके आर्थिके च जीवने एकजनस्य एकमूल्यस्य च सिद्धान्तस्य निषेधं सदैव करिष्यामः।

➢ गतिविधिः

आङ्ग्लभाषां भारते भाषारूपेण स्थापनस्य निर्णयस्य अद्यतनस्य दिनाङ्के जायमानस्य कस्मिंश्चित् लाभे कस्मिंश्चित् हानौ च स्वकीयायां कक्ष्यायां परस्परं चर्चां कुर्वन्तु।

राज्यानां निर्माणं कथं स्यात् ?

1920 तमे दशके स्वतन्त्रतासङ्घर्षस्य प्रमुखदलं– भारतीय-राष्ट्रिय-काङ्ग्रेस इति आसीत् तेन आश्वासनं प्रदत्तं यत् यदा एव देशः स्वतन्त्रतां प्राप्स्यति तदा एव प्रत्येकम् अधिकजनसङ्ख्यायुक्तस्य भाषाभाषिणः समूहस्य स्वीयः पृथक् प्रान्तः भविष्यति । स्वतन्त्रतायाः प्राप्तेः परं काङ्ग्रेसदलेन एतादृशस्य प्रदत्ताश्वासनस्य पूर्तये कश्चित् अपि प्रयासः उपायः च न विहितः । यतः भारतदेशः धर्मस्य आधारेण विभक्तः आसीत् अतः महात्मगान्धिनः समस्तेच्छानां प्रयासानां च अनन्तरम् एकराष्ट्रस्य नैव अपितु द्वयोः राष्ट्रयोः कृते आसीत् । देशविभाजनस्य फलस्वरूपं हिन्दूनां मुस्लिमजनानां च मध्ये जातेषु भीषणोपद्रवेषु 10 लक्षाधिकाः जनाः हताः आसन् । एतस्याम् अवस्थायां चिन्ता स्वाभाविकी आसीत् यत् किम् अस्माकं देशः भाषायाः आधारेण एतादृशानि अन्यानि विभाजनानि सोढुं शक्नोति स्म ?

भाषीयः - भाषासम्बद्धः ।

प्रधानमन्त्री जवाहरलालनेहरुः उपप्रधानमन्त्री वल्लभभायिपटेलः च द्वौ एव भाषायाः आधारेण राज्यानां निर्माणस्य नीतेः विरोधिनौ आस्ताम् । विभाजनात् परं नेहरुः अवदत् यत् "उपद्रवकारिप्रवत्तयः पुनः शिरसः उन्नयनं कुर्वन्ति" यासाम् नियन्त्रणाय राष्ट्रेण शक्तिशालिना ऐक्यभावयुक्तेन च भवितव्यम् । नो चेत् , यथा पटेलेन कथितम् ----

> ... अस्मिन् काले भारतस्य प्रथमा अन्तिमा च आवश्यकता इयम् अस्ति यत् तस्य एकराष्ट्ररूपेण निर्माणं स्यात्--- । राष्ट्रवादस्य पोषकं प्रत्येकम् अपि वस्तु वर्धेत तथा च तस्य मार्गे विघ्नोत्पादकं प्रत्येकं वस्तुनः नाशः स्यात्... । अस्माभिः अयम् एव मानदण्डः भाषाधारेण प्रान्तविषयके प्रश्ने अपि स्वीकृतः तथा च एतस्य मानदण्डस्य अनुसारम् अस्माकं विचारानुसारम् एतादृश्याः अभ्यर्थनायाः समर्थनं न कर्तुं शक्यते ।

यतः काङ्ग्रेसस्य नेतारः तैः कृतसङ्कल्पे स्थिराः न आसन् ततः ते विरमन्ति स्म अतः सर्वत्र असन्तोषः समुत्पन्नः व्यापृतः च । कन्नडभाषिणः मलयालमभाषिणः मराठीभाषिणः च सर्वे एव जनाः स्वीयस्य पृथक् पृथक् प्रान्तस्य प्रतीक्षां कुर्वन्ति स्म । सर्वाधिकगहनः असन्तोषः मद्रास-प्रेडीडेंसी इत्यस्य तेलुगूभाषिजनपदेषु दृष्टः । यदा 1952 तमे वर्षे सामान्यनिर्वाचनानां प्रचारार्थं नेहरुः तत्र अगच्छत् तदा जनाः कृष्णध्वजां स्वीकृत्य नेहरुं दर्शितवन्तः तथा च "वयम् आन्ध्रम् इच्छामः" इत्येवंविधान् उद्घोषान् आरब्धवन्तः । तस्मिन् एव वर्षे अक्तूबरमासे वयोवृद्धः गान्धिवादी पोट्टी श्रीरामुलुः तेलुगुभाषिजनानां हितरक्षार्थम् आन्ध्रराज्यस्य निर्माणसम्बद्धाम् अभ्यर्थनां कुर्वन् अनशनसहितं कार्यबहिष्कारम् आचरितवान् । यथा यथा अनशनेन वर्धितं तथा च नैके जनाः श्रीरामुलोः समर्थनाय सहयोगम् आरब्धवन्तः । स्थाने स्थाने जनाः कार्यबहिष्कारं कृतवन्तः तथा च संप्रचलनानि अपि कर्तुम् आरब्धवन्तः ।

चित्रम् 4 – गान्धिवादी नेता पोट्टी श्रीरामुलुः । तेलुगूभाषिणां कृते पृथक् राज्यम् अभ्यर्थयन् अनशनकार्यक्रमे एव तस्य मृत्युः अभवत् ।

58 दिनानाम् अनशनस्य अनन्तरं 1952 तमे वर्षे दिसम्बरमासे 15 दिनांके पोट्टी-श्रीरामुलोः देहान्तः जातः । यथा कस्मिंश्चित् वार्त्तापत्रे प्रकाशितम् आसीत्, "श्रीरामुलोः देहावसानस्य सूचना सम्पूर्णान्ध्रम् अव्यवस्थितम् अकरोत्" विरोधः एतावान् व्यापकः गहनः च आसीत् यत् केन्द्रसर्वकारः अन्ततः एतां याचनाम् अङ्गीकर्तुं बाध्यः जातः । अनेन प्रकारेण, 1953 तमे वर्षे अक्तूबरमासे 1 दिनाङ्के आन्ध्ररूपेण कस्यचित् नवीनराज्यस्य निर्माणम् अभवत्, यत् अनन्तरकाले आन्ध्रप्रदेशनाम्ना जातम् ।

आन्ध्रप्रदेशस्य स्थापनायाः अनन्तरम् अन्ये भाषाभाषिणः समुदायाः अपि स्वीयानि स्वीयानि पृथक् पृथक् राज्यसम्बद्धानि अभ्यर्थनानि आरब्धवन्तः । फलस्वरूपं, कस्यचित् राज्यपुनर्निमाणायोगस्य स्थापना जाता येन 1956 तमे वर्षे काचित् समाख्या सर्वकाराय अर्पिता । आयोगेन परामृष्टं यत् असमिया-बङ्गला-उडिया-तमिल-मलयालम-कन्नड-तेलुगु-भाषिणां पृथक् पृथक् प्रान्तानां निर्माणस्य उद्देश्येन जनपदानां प्रान्तानां च सीमानिर्धारणं पुनः सुनिश्चितं स्यात् । उत्तरभारतस्य विशालहिन्दीभाषिक्षेत्रस्य विभाजनं कृत्वा नैकराज्याणां निर्माणं कृतम् । किञ्चित् कालानन्तरं, 1960 तमे वर्षे बम्बयीप्रान्तस्य विभाजनं कृत्वा मराठीभाषाभाषिणः गुजरातीभाषाभाषिणः च प्रान्तस्य रूपेण कृतम् । 1966 तमे वर्षे पञ्जाबस्य विभाजनं जातं तथा च हरियाणायाः पृथक् राज्यस्य रूपेण स्थापना जाता । पञ्जाबे पञ्जाबभाषाभाषिणां तथा च हरियाणायां हरियाणवीभाषाभाषिणां च जनानां बाहुल्यम् आसीत् ।

भाषाधारेण राज्यानां निर्माणम्

चित्रम् 5 – (क)

1947 तमवर्षस्य अगस्तमासस्य 14 दिनाङ्कात् पूर्वं भारतीयप्रान्ताः देशीय-राज्यानि च ।

देशीयराज्यानि

आङ्ग्लीयभारतम्

भूतपूर्वदेशीयराज्यानि

अन्यराज्यानि

यदा देशीयराज्यानां शासकाः भारतेन पाकिस्थानेन च सह सम्मेलयितुं सहमतिं प्रकटितवन्तः अथवा पुनः पराजिताः तदा तेषां देशीयराज्यानि नष्टानि । परन्तु 1956 तमवर्षस्य अक्तूबरमासस्य 31 दिनाङ्कपर्यन्तम् एतादृशानि देशीयराज्यानि प्रशासनिकघट्टानां रूपेण यथावत् स्थापितानि । अतः 1947-48 तमवर्षयोः अक्तूबरमासस्य 31 दिनाङ्कपर्यन्तम् एतानि भूतपूर्वदेशीयराज्यरूपेण कथितानि ।

चित्रम् 5 – (ख) – 1956 तमवर्षस्य नवम्बरमासस्य 1 दिनाङ्कात् पूर्वं भारतीयराज्यानि ।

➢ गतिविधिः

चित्रं 5 (क), 5 (ख) अपि च चित्रं 5 (ग) इत्येतानि पश्यन्तु । अवजानन्तु यत् 5 (ख) इति चित्रे देशीयराज्यानि न दृश्यन्ते । तानि राज्यानि अन्वेषयन्तु येषां 1956 तमवर्षात् परं निर्माणं कृतम् आसीत् । तेषां राज्यानां भाषाः काः आसन् ?

चित्रम् 5 (ग) --- 1975 तमे वर्षे भारतीयराज्यानि ।



चित्रम् 6 - महानद्याः जलं रोद्धुं निर्मितः सेतुः (जलबन्धः)।

स्वतन्त्रभारते सेतोः जलबन्धस्य च विकासः प्रतीकरूपेण जातः आसीत्।

राज्यम् – सर्वकारसम्बद्धम्, (अवजानन्तु यत् "राज्यम्" इत्यस्य शब्दस्य अर्थः देशस्य विभिन्नराज्यैः प्रान्तैः च नास्ति)।

विकासपरियोजनानां निर्माणम्

भारतदेशस्य भारतीयजनानां च निर्धनतायाः मुक्तेः आधुनिकप्रविधेः औद्योगिकाधारस्य च निर्माणस्य नवीनभारतस्य समक्षे किञ्चित् महत् लक्ष्यम् आसीत्। 1950 तमे वर्षे सर्वकारः आर्थिकविकासाय नीतीनां निर्माणाय तासां च प्रवर्तनाय कस्यचित् योजनायोगस्य निर्माणम् अकरोत्। एतस्मिन् विषये प्रायः सहमतिः आसीत् यत् भारतदेशः "मिश्रितार्थव्यवस्थायाः" मार्गेण अग्रे सरिष्यति। अत्र राज्यं निजक्षेत्रं च इति द्वे अपि उत्पादनस्य वृद्धये आजीविकायाः च उत्पादनाय महत्त्वपूर्णं पारस्परिकं च पूरकसहयोगं करिष्यति। कस्य क्षेत्रस्य का भूमिका भविष्यति – अर्थात् के उद्योगाः सर्वकारद्वारा के च उद्योगाः विपणिद्वारा अर्थात् निजोद्योगपतिभिः स्थापयिष्यन्ते, विभिन्नक्षेत्राणां राज्यानां च मध्ये कीदृशस्य सामञ्जस्यस्य स्थापनं भविष्यति एतेषां सर्वेषां विषयाणां व्याख्यानं कार्यनिर्धारणं मार्गदर्शनं च योजनायोगस्य कार्यम् आसीत्।

चित्रम् 7 – गान्धिसागर-जलबन्धे प्रवर्तमानं कार्यम्।

मध्यप्रदेशस्थितायां चम्बलनद्यां निर्मितेषु चतुर्षु जलबन्धेषु अयं प्रथमः आसीत्। एतस्य निर्माणकार्यं 1960 तमे वर्षे पूर्तिं गतम्।



1956 तमे वर्षे द्वितीया पञ्चवर्षीया योजना सज्जीकृता। एतस्यां योजनायाम् इस्पातसदृशेषु भारि-उद्योगानां विशाल-जलबन्ध-परियोजनानां च विषये विशेषरूपेण बलं प्रदत्तम्। एतानि कार्याणि सर्वकारीयनियन्त्रणे भविष्यन्ति इति निर्धारितम्। भारीय-उद्योगागारविषयकः प्रयासः तथा च राज्यनियन्त्रणसम्बद्धः उपायाः अग्रिमान् काञ्चन दशकान् यावत् आर्थिकनीतिं प्रभावितवन्तः। एतस्याः पद्धत्याः नैके समर्थकाः आसन् तथा च केचन मुखरविरोधिनः आसन्। केचन जनाः अनुभवन्ति स्म यत् एतस्यां प्रणाल्यां कृषिविषये पर्याप्तबलं न दीयते।

पञ्चवर्षीययोजनानां विषये नेहरोः विचाराः

प्रधानमन्त्री जवाहरलालनेहरुः योजनाप्रक्रियायाः प्रबलसमर्थकः आसीत्। सः विभिन्नराज्यानां मुख्यमन्त्रिभ्यः पत्राणि अलिखत् तत्र स्वीयेषु पत्रेषु सः नियोजनस्य आदर्शानाम् उद्देश्यानां च व्याख्यां कृतवान्। 1952 तमे वर्षे दिसम्बरमासस्य 22 दिनाङ्के लिखिते पत्रे सः प्रतिपादितवान्--

---पञ्चवर्षीययोजनायाः पृष्ठे भारतस्य ऐक्यस्य देशस्य च विभिन्नजनसमूहानां विशालस्य पारस्परिकसहयोगस्य अवधारणा निहिता अस्ति ----। अस्माभिः इदं तथ्यं सदैव स्मर्तव्यं यत् एतस्यां प्रक्रियायां केवलं सर्वकारीयतन्त्रस्य एव महत्त्वं न भवति अपि तु जनतायाः उत्साहस्य सहयोगस्य महत्त्वम् एतस्मात् अधिकम् अस्ति। अस्माकं जनतायां कस्मिंश्चित् विशाले उद्यमे सहभागितायाः उत्साहः स्यात् तथा च जनता अनुभवेत् यत् सा अग्रिमोद्देश्यस्य प्राप्तये सहयात्रिरूपेण अस्ति इति। निःसन्देहं योजना नैकेषाम् अर्थशास्त्रिणां सांख्यिकीयविशेषज्ञाणां तादृशानां चैव अन्येषां जनानां गणनाधारेण भवितुं शक्नोति भविष्यति च। परन्तु केवलम् अङ्कानां संख्यानां च अपेक्षया एषा योजना महत्त्वपूर्णा अस्ति, उपर्युक्ताः विशेषज्ञादयः योजनासु जीवनं न उत्पादयन्ति। जीवनसम्बद्धः अयम् उच्छ्वासः तु कुतश्चित् अन्यस्मात् स्थानात् एव आयाति। अधुना इदम् अस्माकं दायित्वम् अस्ति यत् शिथिलाक्षरैः लिखितां योजनां तथा जीवन्तां गतिशीलाम् उद्यमयुक्तां च कुर्वन्तु यत् ताभिः जनानां कल्पनाः साकारीभवन्तु इति।

चित्रम् 8 – भिलायि-इस्पात-संयन्त्रे जवाहरलालनेहरुः।

भिलायि-स्थितस्य इस्पातसंयन्त्रस्य स्थापना 1959 तमे वर्षे तात्कालिकसोवियतसंघस्य साहाय्येन कृता आसीत्। छत्तीसगढस्य अविकसिते ग्रामीणक्षेत्रे स्थितम् इदं संयन्त्रम् आधुनिकभारतस्य विकासस्य कश्चित् महत्त्वपूर्णप्रतीकरूपेण जातम् आसीत्।

केषाञ्चित् जनानां कथनम् आसीत् यत् प्राथमिकशिक्षायाः उपेक्षा जायते। केषाञ्चित् अन्येषां जनानां मतम् आसीत् यत् आर्थिकनीतीनां कारणात् पर्यावरणे जायमानप्रभावेषु समुचितावधानं न क्रियते। महात्मगान्धिनः अनुयायिनी भगिनीमीरा 1949 तमे वर्षे अलिखत्, "विज्ञानेन यन्त्रेण च मानवतायाः अत्यधिकः लाभः भवितुं शक्नोति परन्तु अन्ततः विनाशः एव प्राप्स्यते। अस्माभिः प्रकृतिसम्बद्धस्य सन्तुलनविषयस्य अध्ययनं कृत्वा तस्याः च नियमानाम् अनुसारं स्वीयजीवनं जीवनीयम्, तदा वयं स्वस्थाः भूत्वा नैतिकरूपेण च सभ्यरूपेण जीवनं यापयितुं शक्ष्यामः।"

➢ गतिविधिः

किं भगिनीमीरायाः इदं मतं समुचितम् आसीत् यत् विज्ञानं यन्त्राणि च मानवसभ्यतायाः कृते समस्याम् उत्पादयिष्यन्ति। एतस्मिन् विषये स्वीयकक्षायां चर्चां कुर्वन्तु। एतस्यै चर्चायै भवन्तः औद्योगिकप्रदूषणेन वनानां च विनाशेन अस्माकं विश्वे जायमानप्रभाव-सदृशानाम् उदाहरणानां विषये चिन्तयितुं शक्नुवन्ति।

कस्याश्चित् स्वतन्त्रविदेशनीतेः अभिलाषः

चित्रम् 9 - संयुक्तराष्ट्रे जवाहरलालनेहरुः कृष्णामेननः च।

कृष्णामेननः 1952 तमवर्षात् आरभ्य 1962 तमवर्षं यावत् संयुक्तराष्ट्रे भारतीयप्रतिनिधिमण्डलस्य नेतृत्वम् अकरोत् तथा च गुटनिरपेक्षतायाः नीतेः समर्थनम् अकरोत्।

यस्मिन् काले भारतदेशेन स्वतन्त्रता प्राप्ता तस्मिन् काले द्वितीयविश्वयुद्धस्य नाशः किञ्चित् पूर्वम् एव जातः आसीत्। 1945 तमे वर्षे स्थापिता अन्ताराष्ट्रिय-संस्था, संयुक्तराष्ट्रम् इति – अधुना स्वीये शैशवकाले एव आसीत्। 1950 तमे 1960 तमे दशके च शीतयुद्धस्य प्रादुर्भावः जातः। शक्तिशालिदेशाभ्यन्तरे प्रतिद्वन्द्विता समुत्पन्ना तथा च अमरीकायाः सोवियतसङ्घस्य च मध्ये वैचारिकसङ्घर्षाः जाताः। फलतः द्वौ देशौ स्वीयसमर्थकदेशौ संयोज्य सैनिकसङ्घटनानि निर्मितानि। अयम् एव कालः आसीत् यदा औपनिवेशिकसाम्राज्यानि ध्वस्तानि भवन्ति स्म तथा च नैके देशाः स्वतन्त्रतां प्राप्नुवन्ति स्म। प्रधानमन्त्री जवाहरलालनेहरुः नवस्वाधीनभारतस्य विदेशमन्त्री अपि आसीत्। सः एतस्मिन् सन्दर्भे स्वतन्त्रभारतस्य विदेशनीतेः प्रारूपं सज्जीकृतवान्। गुटनिरपेक्षान्दोलनम् एतस्याः एव विदेशनीतेः मूलाधाररूपेण आसीत्।

मिस्र-यूगोस्लाविया-इण्डोनेशिया-घाना-भारत-देशानां राजनेतॄणां नेतृत्वे गुटनिरपेक्षान्दोलने विश्वस्य देशानाम् आह्वानं कृतं यत् ते एतयोः द्वयोः मुख्यसैनिकसङ्घटनयोः सम्मिलिताः न भवन्तु। परन्तु घटबन्धनेभ्यः दूरे वासस्य एतस्याः नीतेः अभिप्रायः "पृथक् पृथक्" अथवा "तटस्थरूपेण" अपि न स्थातव्यम् आसीत्। पृथक् पृथक् रूपेण कार्यकरणस्य अभिप्रायः आसीत् यत् विभिन्नदेशाः अन्ताराष्ट्रियप्रकरणेभ्यः दूरे तिष्ठन्तु अपरञ्च भारतसदृशस्य गुटनिरपेक्षः (सङ्घनिरपेक्षदेशः) तु अमेरिकीयानां सोवियत-घटबन्धनानाम् आभ्यन्तरे सन्ध्यादिकार्ये महत्त्वपूर्णसहयोगं कुर्वन्ति स्म। एतैः देशैः प्रयासः कृतः यत् युद्धं न स्यात् अपि च प्रायः युद्धं विरुध्य मानवतावादिनी नैतिकी च दृष्टिः अङ्गीकृताः। परन्तु विभिन्नकारणैः भारतसहिताः नैके सङ्घनिरपेक्षदेशाः युद्धस्य सम्मुखीकरणं कर्तुं बाध्याः जाताः।

1970 तमदशकं यावत् नैके देशाः गुट-निरपेक्ष इत्यस्य आन्दोलनस्य सदस्यरूपेण जाताः आसन्।

चित्रम् 10 - बांडुंगे, इण्डोनेशियायाम् एशियाफ्रिकादेशानां नेतॄणाम् उपवेशनम्, 1955।

अस्मिन् प्रसिद्धे सम्मेलने एकोनत्रिंशदधिकानां नवस्वाधीनदेशानां प्रतिनिधयः अस्मिन् विषये चर्चां कृतवन्तः यत् एशियाफ्रीकास्थदेशाः उपनिवेशवादस्य पश्चिमप्रभुत्वस्य च विरोधे स्वीयप्रयासान् केन प्रकारेण यथावत् स्थापयितुं शक्नुवन्ति स्म।

राष्ट्रं षष्टिवर्षाणाम् अनन्तरम्

2007 तमे वर्षे अगस्तमासे 15 दिनाङ्के अस्माभिः कस्यचित् स्वतन्त्रराष्ट्रस्य रूपेण स्वीया षष्टितमवार्षिकी आयोजिता आसीत् । एतस्मिन् कालावधौ अस्माकं देशस्य प्रदर्शनं कथम् आसीत् ? संविधाने निर्धारितादर्शान् वयं कियता परिमाणेन चरितार्थान् कर्तुं शक्तवन्तः ?

भारतदेशः अधुना अपि ऐक्यभावे अस्ति अपि च लोकतान्त्रिकव्यवस्थया प्रवर्तते । अयं गर्वस्य विषयः अस्ति । नैकेषां वैदेशिकप्रेक्षकाणां मतम् आसीत् यत् भारतं कस्यचित् देशस्य रूपेण चिरकालं यावत् न प्रवर्तितुं शक्ष्यति । ते अनुभवन्ति स्म यत् भारतस्य प्रत्येकं क्षेत्रं भाषिभाषिसमूहः च स्वीयपृथक् राष्ट्ररूपेण अभ्यर्थनां करिष्यति तथा च भारतदेशः नैकखण्डेषु विभक्तः भविष्यति । केषाञ्चित् विशेषज्ञानां मतम् आसीत् यत् भारतदेशः सैनिकशासनेन अधिग्रहीष्यते । परन्तु एताः सर्वाः अपि आशङ्काः असत्याः जाताः । स्वतन्त्रताप्राप्तेः अधुना पर्यन्तं 13 सामान्यनिर्वाचनानि जातानि सन्ति तथा च राज्यानां स्थानीयनिकायानां च कृते शताधिक-नैर्वाचनिकप्रक्रियाः जाताः सन्ति । अस्माकं देशे सञ्चारतन्त्राणां सूचनातन्त्राणां च स्वातन्त्र्यम् अस्ति तथा च काचित् स्वतन्त्रन्यायपालिका अस्ति । एतदतिरिच्य, अत्रत्यजनानां भाषासम्बद्धा विविधता अथवा धार्मिक-विविधता अपि राष्ट्रियैकस्य मार्गे अवरोधकत्वेन न जाता ।

चित्रम् 11 - बम्बयीस्थितं धारावी इति स्थानं विश्वस्य सर्वाधिकासु पर्णकुटीरयुक्तासु वस्तिषु किञ्चन अस्ति । एतस्य दूरस्थे प्रान्तभागे भवन्तः गगनचुम्बिभवनानि द्रष्टुं शक्नुवन्ति ।

परन्तु अपरस्मिन् पक्षे इदम् अपि सत्यम् अस्ति यत् अद्य अपि अस्माकं देशे गहनमतभेदाः सन्ति । संवैधानिकनिश्चिततानाम् अनन्तरम् अस्पृश्यसमुदायाः अथवा ये अधुना दलित इति दलेन सम्बोध्यन्ते – अद्य अपि हिंसाग्रस्ताः भेदभावेन सह सङ्घर्षं कुर्वन्ति । ग्रामीणभारतस्य नैकेषु भागेषु अधुना अपि ते सार्वजनीनानां जलस्रोतसां मन्दिराणां क्रीडाक्षेत्राणाम् अन्येषां च सार्वजनीनस्थानानां प्रयोगं न कर्तुं शक्नुवन्ति । संविधाने प्रदत्तानां धर्मनिरपेक्षादर्शानाम् अनन्तरं नैकेषु राज्येषु विभिन्नधार्मिकसमूहाभ्यन्तरे नैकवारं सङ्घर्षाः जाताः सन्ति । अपि च सर्वाधिककष्टप्रदं तथ्यम् इदम् अस्ति यत् एतस्मिन् कालावधौ निर्धनानां धनिकानां च मध्यस्थान्तरं नैरन्तर्येण वर्धितम् अस्ति । भारतस्य केषाञ्चित् भागानां समूहानां च आर्थिकविकासेन विपुललाभः जातः अस्ति । ते विशिष्टगृहेषु निवसन्ति, बहुमूल्योपाहारनिकेतनेषु भोजनं कुर्वन्ति, स्वीयान् पुत्रान् बहुमूल्यानि निजविद्यालयान् प्रवेशयन्ति तथा च अवकाशकाले विदेशं गत्वा प्रभूतं धनं तत्र व्ययीकुर्वन्ति । अपरस्मिन् पक्षे अधुना अपि नैके जनाः निर्धनतारेखातः अधः सन्ति । नगरीयेषु पर्णकुटीरवस्तिषु अथवा निर्जनेषु स्थानेषु अकृष्टग्रामेषु ये जनाः निवसन्ति ते अधुना अपि निजपुत्रान् विद्यालयान् न प्रवेशयितुं शक्नुवन्ति ।

अस्माकं संविधानस्य दृष्ट्या सर्वे समानाः सन्ति परन्तु वास्तविकजीवने केचन भारतीयाः अन्येषाम् अपेक्षया आधिक्येन समाः सन्ति । स्वतन्त्रताकाले ये मानदण्डाः निर्धारिताः आसन् तेषाम् अनुसारं पश्यामः चेत् भारतीयगणतन्त्रं स्वीयम् एतम् अभिमतं साधिकारं प्रकटयितुं न शक्नोति यत् तेन भारतीयगणतन्त्रेण बाहुल्येन साफल्यं प्राप्तम् अस्ति । परन्तु इदम् अपि सत्यम् अस्ति यत् तेन वैफल्यम् अपि न प्राप्तम् अस्ति इति ।

अन्यत्र –

श्रीलङ्कायां किम् अभवत्

1956 तमे वर्षे, यस्मिन् काले भारते भाषायाः आधारेण राज्यानां पुनः स्थापना क्रियते स्म, तस्मिन् काले श्रीलङ्कायाः (तात्कालिकं नाम सीलोन इति) संसद् किञ्चित् अधिनियमं पारितं कृत्वा सिंहलाभाषा देशस्य राजभाषारूपेण भविष्यति इति निर्धारितम्। एतस्य अधिनियमस्य माध्यमेन सिंहलाभाषा सर्वेषां विद्यालयानां महाविद्यालयानां सर्वकारीयपरीक्षाणां न्यायालयानां च भाषारूपेण भविष्यति इत्यपि निर्धारितम्। श्रीलङ्कायाः उत्तरे ये तमिलभाषाभाषिणः अल्पसंख्यकाः जनाः आसन् ते एतादृशस्य अधिनियमस्य विरोधं कृतवन्तः । केनचित् तमिलसांसदेन कथितम् आसीत् यत् "यदा भवन्तः मत्तः मम भाषां बलात् हरन्ति तदा भवन्तः मम सर्वम् अपि परिहरन्ति ।" केनचित् अपरेण नेत्रा अपि पूर्वं सूचितं यत् "भवन्तः सीलोनस्य विभाजनम् इच्छन्ति । निःश्चिन्ताः भवन्तु अहम् आश्वासनं ददामि यत् भवन्तः अपि निश्चयेन किञ्चन विभाजितसीलोनम् एव प्राप्स्यन्ति । " सिंहलाभाषिणा केनचित् विपक्षिसदस्येन उक्तम् आसीत् यत् यदि सर्वकारः स्वीयाचारणं न परिवर्तयति तथा च एतस्य एव अधिनियमस्य दृढतया पालनं कारयति तस्य परिवर्तनं न करोति तर्हि एतस्मात् लघुदेशस्य द्वौ विदीर्णौ रक्तरञ्जितौ च देशौ अपि प्रादुर्भवितुं शक्नुतः ।

चित्रम् 12 - भुशुण्डिं गृह्णन् तमिलोग्रवादी श्रीलङ्कायां गृहयुद्धस्य प्रतीकरूपेण वर्तते ।

गतेभ्यः नैकदशकेभ्यः श्रीलङ्कायां गृहयुद्धं प्रवर्तते यत् एतस्मात् कारणात् एव उत्पन्नं यत् तत्रत्यान् तमिलभाषाभाषिजनान् उद्दिश्य बलात् सिंहलाभाषा आरोप्यते । अपि च कश्चित् अन्यः दक्षिणैशियायीदेशः पाकिस्थानम् इत्यपि एतस्मात् कारणात् द्वयोः भागयोः विभक्तम् आसीत् यतः पूर्वपाकिस्थानस्य बाङ्ग्लाभाषाभाषिणः जनाः अनुभवन्ति स्म यत् पाकिस्थाने तेषां भाषायाः अभिभवः क्रियते । एतद्विपरीतं भारतदेशः कस्यचित् एकीकृतस्य राष्ट्रस्य रूपेण चिरकालात् अस्ति । तत्र कारणं प्रमुखतया एतत् अपि अस्ति यत् अत्रत्यानां नैकासां क्षेत्रीयभाषाणां विकासक्रमः न अवरोध्यते अपि तु विकासाय अवसरः दीयते चिरकालात् प्रदत्तः च । उपरि चर्चितेषु देशेषु यथा पूर्वपाकिस्थाने उर्दुभाषा, उत्तरश्रीलङ्कादेशे च सिंहलाभाषा बलात् आरोपिता प्रवर्तिता च आसीत् तथैव यदि हिन्दीभाषा अत्र भारतस्य दक्षिणक्षेत्रेषु बलात् प्रवर्तिता कार्ये योजिता च अभविष्यत् तर्हि प्रायः भारतदेशे अपि गृहयुद्धस्थितिः अभविष्यत् तथा च यथा विकासः अधुना जातः तथा न अभविष्यत् । सरदारपटेलस्य जवाहरलालनेहरोः च याः आशंकाः आसन् यत् स्थानीयभाषाभाषिराज्यानि संकटग्रस्तानि भवितुं शक्नुवन्ति इति परन्तु तादृशैः भाषाभाषिराज्यैः भारतस्य ऐक्यभावः न कदापि सङ्कटे पातितः अपि तु ऐक्यभावस्य विस्तारः एव कृतः । एतस्मात् ज्ञायते यत् एकदा स्वीयभाषायाः नाशरूपभयं समाप्तं भवति तदा विभिन्नभाषाभाषिसमूहाः कस्यचित् विशालराष्ट्रस्य अङ्गरूपेण सहजतया विकासपथे नैरन्तर्येण प्रवर्तन्ते ।

आयान्तु कल्पनां कुर्मः

भवन्तः कस्यचित् आदिवासिनः कस्यचित् आरक्षणविरोधिनः च जनस्य चर्चां शृण्वन्ति । कल्पनां कुर्वन्तु यत् द्वौ अपि जनौ स्वीयपक्षतः कान् कान् तर्कान् उपस्थापयिष्यतः ? एतां चर्चाम् अभिनयमाध्यमेन प्रदर्शयन्तु ।

पुनः स्मरन्तु

1. नवस्वाधीनभारतस्य समक्षे काः काः तिस्रः समस्याः आसन् ?
2. योजनायोगस्य का भूमिका आसीत् ?
3. रिक्तस्थानानि पूरयन्तु ----
   क) केन्द्रीयसूच्यां -----,--- तथा च----विषयाः उपस्थापिताः आसन् ।
   ख) समवर्तिसूच्यां --- तथा च --- विषयाः समुपस्थापिताः आसन् ।
   ग) सा आर्थिकयोजना यस्यां सर्वकारीय-निजक्षेत्रे इति उभे विकासे सहयोगाय निर्दिष्टौ आस्तां, तौ ---- प्रारूपम् इति कथ्येते स्म ।

घ) ---- इत्यस्य मृत्योः एतावत् प्रचण्डान्दोलनम् उत्पन्नं यत् सर्वकारः आन्ध्रभाषिराज्यस्य स्थापनार्थं बाध्यः जातः ।

4 . उचितम् अनुचितं च सूचयन्तु ----

क) स्वतन्त्रताकाले अधिकतरभारतीयाः ग्रामेषु निवसन्ति स्म ।

ख) संविधानसभा काङ्ग्रेदलस्य सदस्यैः सह मिलित्वा निर्मिता आसीत् ।

ग) प्रारम्भिकेषु राष्ट्रियनिर्वाचनेषु केवलं पुरुषाः एव मतदानं कर्तुम् अधिकृताः आसन् ।

घ) द्वितीयपञ्चवर्षीययोजनायां भारि-उद्योगाणां विकासविषये बलं प्रदत्तम् आसीत् ।

आयान्तु विचारं कुर्मः -

5. "राजनीतौ अस्माकं पार्श्वे समानता भविष्यति तथा च सामाजिके आर्थिके च जीवने वयम् असमानतामार्गे चलिष्यामः" एतादृशस्य कथनस्य पृष्ठे डॉ.अम्बेडकरस्य कः आशयः आसीत् ?
6. स्वतन्त्रतायाः अनन्तरं देशः भाषायाः आधारेण राज्येषु विभक्तं स्यात् इति कर्तुं सङ्कोचः किमर्थम् आसीत् ?
7. एकं कारणं सूचयन्तु यत् स्वतन्त्रतायाः परम् अपि भारते आङ्ग्लभाषा किमर्थं व्यवहारे अस्ति ।
8. स्वतन्त्रतायाः अनन्तरं प्रारम्भिकदशकेषु भारतस्य आर्थिकविकासस्य कल्पना कथं कृता आसीत् ?

आयान्तु कृत्वा पश्यामः

9. मीराभगिनी का आसीत् ? तस्याः जीवनस्य आदर्शानां च विषये अवजानन्तु ।
10. पाकिस्थाने भाषाधारेण जातानां तेषां विवादानां विषये आधिक्येन जानन्तु येषां कारणात् बाङ्ग्लादेशस्य जन्म अभवत् । बाङ्ग्लादेशः पाकिस्थानदेशात् कथं स्वतन्त्रतां प्राप्तवान् ?

॥ इति द्वादशः अध्यायः ॥

संस्थाः

दि ओसियन आर्काइव एण्ड लाइब्रेरी कलेक्शन, मुम्बयी, (अध्यायः 7,चित्रं 1,8)

नेहरु मेमोरियल म्यूजियम एण्ड लाइब्रेरी, नवदेहली (अध्यायः 9, चित्रं 4,5,7,13, अध्यायः 12,चित्रं 1,2,4,6,7,9) फोटो डिवीजन, भारतसर्वकारः, नवदेहली (अध्यायः 11, चित्रं 20, अध्यायः 12, चित्रं 3,10)

पत्रिकाः

दि इलस्ट्रेटिड लन्दन न्यूज (अध्याय 9 चित्रं 15)

पुस्तकानि ---

अमन नाथ एवं जय विठलानी, होरिजंस : दि टाटा –इण्डिया सेंचुरी, 1904 – 2004 (अध्यायः 7 चित्रं 10,14,15)

सी.ए.बेयली,सं., एन इलस्ट्रेटिड हिस्ट्री ऑफ मार्डन इण्डिया,(अध्यायः 8 चित्रं 2,4,6, अध्यायः 10 चित्रं 6,7,17,22, अध्यायः 11 चित्रं 3,4,5,10)

जान ब्रेमेन, लेबर बॉण्डेज इन वेस्टर्न इण्डिया (अध्यायः 9,चित्रं 11)

ज्योतिन्द्रजैनः एवम् आरती अग्रवालः, नेशनल हेण्डीक्राफ्ट्स एण्ड हेण्डलूम म्यूजियम, नवदेहली, मेपिन (अध्यायः 7, चित्रं 4,5)

मालविका कारलेकरः, री-विजनिंग दि पास्ट (अध्यायः 9 चित्रं 6,8, अध्यायः 8 चित्रं 11)

मारिना कार्टरः, सरवेंट्स, सरदार्स एण्ड सेटलर्स (अध्यायः 9, चित्रं 9)

पीटररूहे, गान्धिः (अध्यायः 11 चित्रं 1,6,12,13,14,16,17,18,19,21)

सूजन एस.बीन, यैंकी इण्डिया, अमेरिकन कॉमर्शियल एण्ड कल्चरल एनकाउण्टर्स विद इण्डिया इन दि एज ऑफ सेल, 1784 – 1860 (अध्यायः 9 चित्रं 3,7)

सूजन स्ट्राङ्ग, सं., दि आर्ट्स ऑफ द सिख किङ्ग्डम (अध्यायः 10 चित्रं 19)

यू बाल, जङ्गल लाइफ इन इण्डिया (अध्यायः 7,चित्रं 12)

वेरियर एल्विन,द एगारिया (अध्यायः 7 चित्रं 13)

टैक्सटाइल्स फॉर टेम्पिल ट्रेड एण्ड डॉवरी, कलेक्शन संस्कृति म्यूजियम ऑफ एवरीडे आर्ट (अध्यायः 7,चित्रं 2,6)

0863

विद्ययाऽमृतमश्नुते

एन सी ई आर टी
NCERT

ISBN 978-81-7450-847-8